कथं भगवान् वासुदेवः श्रुतियुक्तिस्ववचनविरुद्धां जीवोत्पत्तिं ब्रूयात् ? सत्यम् । भ्रांत्या न ब्रूयादिति। विप्रलिप्सया तु ब्रूयादेव। दृष्टो हि तस्यावतारविशेषे विप्रलंभः। तस्माच्च पांच-रात्रेऽपि सः । मोहशास्त्रत्वप्रसिद्धेः । ननु भारतादिषु पाञ्चरात्रस्य प्रामण्यमपि प्रतिपादितं तर्हि अयमपि कश्चन विप्रतिषेधः सूत्रोक्तो भविष्यति । वस्तुतस्तु नायं विप्रतिषेधोऽस्ति । अननुष्ठेयांशेषु कुण्डगोलकस्त्रीशूद्रादिवेदानधिकृतविषयतया प्रामाण्यं तत्र वैदिकाधिकार-वर्णनविषये जीवोत्पत्त्यादिश्रुतियुक्तिस्ववचनविरुद्धविषये चाप्रामाण्यमिति व्यवस्थोपपत्तेः। इयं व्यवस्था कौर्मे दर्शिता । तत्र हि 'स तेषां मायया जातं गोवधं गौतमो मुनिः। केनापि हेतुना ज्ञात्वा शशापातीव कोपनः । भविष्यथ त्रयीबाह्या महापातकिभिः समाः'। इत्यादिना वेदबाह्यत्वेन गौतमशप्तान्प्रस्तुत्य 'सर्वे संप्राप्य देवेशं शंकरं विष्णुमव्ययम् । अस्तुवन् लौकिकैः स्तोत्रैरुच्छिष्टा इव सेवकाः ॥' इत्यादिना शिवकेशवसन्निधौ तेषां वैदिकमन्त्रैः स्तोत्रेऽनधिकारात् भाषाप्रबंधैः स्तुतिपूर्वकं गतिप्रार्थनामुपन्यस्य 'तस्माद्वै वेद-बाह्यानां रक्षणार्थं तु पापिनाम् । संमोहनाय शास्त्राणि करिष्यावो वृषध्वज।एवं संचोदितो रुद्रो माधवेन मुरारिणा । चकार मोहशास्त्राणि केशवोऽपि शिवेरितः।' इत्यादिना वेदबा-ह्यत्वेऽप्यन्तःकरणशुद्धिमतां रक्षणार्थं वैदिकत्वेऽपि मलिनचित्तानां विमोहनार्थं च शिवके-शवाभ्यां पाशुपतपाञ्चरात्रादीनि निर्मितानीति श्रुतम्। कुण्डगोलकादीनां पांचरात्रेऽधिकारो-ऽपि कौर्मे दर्शितः।अथांशोस्सात्वतो नाम विष्णुभक्तः प्रतापवान्।महात्मा दाननिरतो धनु-र्वेदविदां वरः । स नारदस्य वचनात् वासुदेवार्चने रतः । शास्त्रं प्रवर्तयामास कुण्डगोला-दिभिः श्रितम्। तस्य नाम्ना तु विख्यातं सात्वतं नाम शोभनम् । प्रवर्तते महाशास्त्रं कुण्डा-दीनां हितावह'मिति । पांचरात्रे स्त्रीशूद्राधिकारस्त्रिवक्रापुत्रमुपश्लोकं प्रस्तुत्य भागवते वर्णितः । 'तेनात्तं सात्वतं तन्त्रं यज्ज्ञात्वा मुक्तिभाग्भवेत् । यत्र स्त्रीशूद्रदासानामधिकारः परः स्मृतः। संस्कारो वैष्णवः' इति। पाञ्चरात्रप्रविष्टस्य च क्रमेण वैदिकमार्गावाप्तिद्वारा श्रे-यःप्राप्तिरित्युक्तम्। वासिष्ठलैंगे तत्र हि शांडिल्यं प्रति भगवद्वचनम्—'मत्तंत्राश्रयणेनैव मत्पूजा च कृता त्वया । तया न प्रीतवानस्मि तव शाण्डिल्य दुर्मते । कुमार्गेणापि शांडिल्य कृता पूजा मम त्वया। अतः कालेन महता वेदमार्गं गमिष्यसि' ।इति। ये तु पांचरात्रमार्गेण विष्णुं प्रपन्ना अपि प्राचीनदधीच्यादिशापदोषेण शिवनिंदादिषु प्रवर्तंते तेषामाकल्पं निरय एव न तु भवांतरेऽपि वेदमार्गप्राप्तिः। तदुक्तं कौर्मे—'एवमुक्त्वा तु विप्रर्षिश्शशापेश्वरविद्विषः। समागतान्ब्राह्मणांस्तान् दक्षसाहाय्यकारिणः । यस्माद्बहिष्कृता वेदा भवद्भिः परमेश्वरः। विनिंदितो महादेवः शंकरो लोकवंदितः । भविष्यथ त्रयीबाह्यास्सर्वेऽपीश्वरविद्विषः । नि-न्दन्तो ह्यैश्वरं मार्गं कुशास्त्रासक्तमानसाः । मिथ्याधीतसमाचारा मिथ्याज्ञानप्रलोभिनः। प्राप्य घोरं कलियुगं कलहैः कलिपीडिताः। त्यक्त्वा तपोवनं कृत्स्नान् गच्छध्वं नरकान्पुनः। भविष्यति हृषीकेशः स्वाश्रितोऽपि पराङ्मुखः।' इति। तानधिकृत्य सौरपुराणे पठ्यते—'पुरुषो-त्तममाश्रित्य शिवनिंदापरा द्विजाः। कलौ युगे भविष्यंति त्राता तेषां न माधवः'। स्कान्दे शंकरसंहितायां शिवपूजाविधौ—'नेक्षेत पूजावेलायां नरं वत्स बहिष्कृतम्।' इत्युक्त्वा 'कोऽसौ बहिष्कृत' इति जिज्ञासायामुक्तं 'दधीचिना गौतमेन ये शप्ता ब्राह्मणाधमाः। कला-ववतरिष्यन्ति निन्दकास्ते बहिष्कृताः ॥' इति । दुष्करप्रायश्चित्तपापापादितवैदिकमार्गबहि-

भावानामपि तंत्रेष्वधिकारस्साम्बपुराणे दर्शितः'श्रुतिभ्रष्टः श्रुतिप्रोक्तप्रायश्चित्ते भयं गतः। क्रमेण श्रुतिसिद्ध्यर्थं मनुष्यस्तंत्रमाश्रयेत्। धर्मशास्त्रे पुराणे च प्रोक्तं हि मरणांतिकम्। प्रायश्चित्तं मनुष्याणां पापिष्ठानां सुदारुणम्। कलौ दुर्बलचित्तानां मरणे जायते भयम्। तेषामेव हि रक्षार्थं तान्त्रिकं मार्गमुक्तवा'निति। 'पांचरात्रं भागवतं तन्त्रं वैखानसाभिधम्। वेदभ्रष्टान् समुद्दिश्य कमलापतिरुक्तवा'निति च। तानेव कृतमहापातकान् धर्मशास्त्रोक्तप्रायश्चित्ताशक्ततया तंत्राण्याश्रितानधिकृत्योक्तमापस्तंबेन—'अथाभिशस्ताः समवसाय चरेयुर्धार्म्यमिति सांशित्येतरेतरयाजका इतरेतराध्यापका मिथो विवहमानाः' (प्र. १. प० १. ख० २८. सू. ९.) इति। अत्राभिशस्तशब्दोक्तानां पतितानामितरेतरयाजनाध्यापनोक्तिः तांत्रिकविषयैवेति लभ्यते। पतितानां वेदमार्गेऽनधिकारात् उदाहृतपुराणवचनैस्तेषां तंत्रमार्गेऽधिकारसद्भावावगमाच्च। न चात्राभिशस्तशब्दः पतितविषयो न भवतीति शंकनीयम्। 'पुत्रान्सन्निष्पाद्य ब्रूयुः विप्रव्रजतास्मदेवं ह्यस्मत्स्वार्यास्संप्रत्यपत्स्यतेति। (प्र० १. प० १. ख० २६. सू० १०) अथापि न सेंद्रियः पतति (सू ११.) तदेतेन वेदितव्यमंगहीनो हि सांगं जनयति। (सू० १२) मिथ्यैतदिति हारीतः। (सू० १३.) दधिधानीसधर्मा स्त्री भवति। (सू० १४.) यो हि दधिधान्यामप्रयतं पय आतच्य मन्थति न तेन धर्मकृत्यं क्रियत एवमशुद्धि शुक्लं यन्निवर्तते न तेन सह संप्रयोगो विद्यते (सू० १५) इत्यग्रिमसूत्रैः अभिशस्तशब्दसंकीर्तनपूर्वकं पूर्वपक्षसिद्धांताभ्यां तत्पुत्राणामपि असंव्यवहार्यत्वप्रतिपादनात्। एवं चोदाहृतनानापुराणवचनानुसारेण भारतादिषु पांचरात्रप्राशस्त्यवचनान्यधिकारिविशेषविषयतया तत्प्रामाण्यव्यवस्थापनपराणीत्युपपादनीयम्। भारतेऽपि हि—'सांख्यं योगः पांचरात्रं वेदाः पाशुपतं तथा। किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वा मुने'। इति प्रश्ने 'ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै।' इति पांचरात्रादीनां वैदिकमार्गान्मार्गांतरत्वोक्त्यैवावैदिकत्वमाविष्कृतम्। अवैदिकेषु च न वैदिकानामधिकारः। 'या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः। सर्वास्ता निष्फलाः प्रोक्ता निष्ठा तेषां हि तामसी' इति मनुस्मरणात्। वराहपुराणे च बहुधा पांचरात्रप्रशंसां प्रस्तुत्यापि अवैदिकाधिकारित्वमाविष्कृतम्। 'अभावे वेदमन्त्राणां पांचरात्रोदितेन च। मार्गेण मां प्रपद्यंते ते मां प्राप्स्यंति मानवाः' इति। अत्र हि नित्यानां वेदमंत्राणां स्वरूपेणाभावो न विवक्षितः। किं तु तेष्वधिकाराभाव एव। न च पाशुपत इव पांचरात्रे वैदिकावैदिकविभागः कृतो दृश्यते। येन 'ज्ञानान्येतानि राजर्षे' इत्यादिषु पाशुपतस्येव पांचरात्रस्याप्यवैदिकस्य ग्रहणमिति नीयेतेत्यलं प्रसक्तानुप्रसक्त्या। विस्तरोऽन्यत्रानुसन्धेयः। तस्मात्स्थितमेतत्पाञ्चरात्रस्यानुष्ठेयभागेष्वधिकारिविशेषविषयतया प्रामाण्यमस्तीति तत्प्ररोचनार्थं भारतादिषु बहुधा तत्प्रशंसनम्। जीवोत्पत्त्यादिवचनं त्वप्रमाणमेव। मोहशास्त्रत्वेन प्रसिद्धे प्रतीताप्रामाण्यनिरासहेत्वभावात्। तत्प्रसिद्धिरहितेष्वपि हि सर्ववेष्टनादिस्मरणेषु श्रुतिविरोधमात्रेणाप्रामाण्यमभ्युपगम्यते। यत्रापि श्रुतिविरोधो नास्ति तत्रापि हेतुदर्शनमात्रेणाप्रामाण्यमभ्युपगम्यते। उक्तं चापस्तंबेन—'ब्राह्मणोक्ता विधयः। तेषामुत्सन्नाः पाठाः प्रयोगादनुमीयन्ते। यत्र तु प्रीत्युपलब्धितः प्रवृत्तिः न तत्र शास्त्रमस्ति। तदनुवर्तमानो नरकाय राध्यती'ति। किमु वक्तव्यं मोहशास्त्रे प्रतिपाद्यमानं श्रुतिन्यायस्ववचनविरुद्धमप्रमाणमिति। यत्तु भारते

द्धेश्वरकारणवादमुक्तिहेतुत्वतप्तमुद्राधारणादिधर्मपरत्वादिना विप्रतिषेधात् । अतः पाञ्चरात्रमतमसमञ्जसम् ॥

'पाञ्चरात्रे च बौद्धे च तथा कालामुखेऽपि च ।
श्रद्धया दीक्षिता यूयं भवत ब्राह्मणाधमाः ॥'

इत्यादिषु च विशेषेणास्य प्रतिषेधो दृश्यते । अतो विप्रतिषेधात् अप्रमाणं पाञ्चरात्रं मतम् ॥

ननु 'पुरुषो वै रुद्रः' इत्यादिश्रुत्या परमेश्वर एव पुरुषो वासुदेवः, तज्ज्ञानाराधनादिकमपि क्रमेण परमेश्वरपदप्राप्तिसाधनमिति श्रूयते । तदाराधनप्रतिपादकस्य पाञ्चरात्रस्याप्रामाण्ये तस्यानाराध्यत्वप्रसङ्ग इति चेत्–न । श्रुतिविरोधात् पाञ्चरात्रस्याप्रामाण्येऽपि तस्य का हानिः। श्रुतिप्रसिद्धमार्गेण तदाराधनसंभवात्। अतो न विरोधः ॥ इति पाञ्चरात्राधिकरणम् ॥ ९ ॥

'भविष्यति प्रमाणं वै एतदेवानुशासनम्' । इति पांचरात्रं प्रस्तुत्य वचनं तत्तु कूर्मपुराणादिगतकलिदोषकीर्तनप्रकरणेषु 'कुर्वंति चावताराणि ब्राह्मणानां कुलेषु वै । दधीचिशापनिर्दग्धा पुरा दक्षाध्वरे द्विजाः । निंदंति च महादेवं तमसाविष्टचेतसः' । इत्यादिवचनैः येषां कलौ प्राचुर्यमुक्तं ते सर्वेऽपि वैदिकान्प्रति वस्तुतोऽप्रमाणमपि प्रमाणत्वेन ग्रहीष्यंति । तस्मिन्युगे वैदिकमार्गप्रच्युतिप्राचुर्यात् तेऽपि तद्ग्रहीष्यंतीत्येतत्परं न तु बदरफलरक्तत्वादिवद्भाविप्रामाण्यपरम् । पूर्वमप्रमाणस्य पश्चात्प्रमाणत्वायोगात् इति न कश्चिद्विरोधः। श्रुतिविरुद्धेति । श्रुतिविरुद्धेश्वरकारणवादः शिवादन्यो वासुदेवः परमकारणमिति वादः । स तावत्समन्वयाध्यायोदाहृतसकलश्रुतिविप्रतिषिद्धः । तस्य मुक्तिहेतुत्वं 'यदा चर्मवदाकाश' मित्यादिश्रुतिविप्रतिषिद्धम् । तप्तमुद्राधारणस्य श्रुतिस्मृतिपुराणादिप्रतिषिद्धत्वमन्यत्र प्रपंचितमनुसंधेयम् । आदिशब्देन सकलवैदिकदेवतापरित्यागः सकलत्रयीधर्मपरित्यागः इत्यादि पांचरात्रोक्तं श्रुतिविप्रतिषिद्धं गृह्यते । 'किं भोस्त्रयीधर्मेणासंयुक्त इमं धर्मं जिज्ञासीत ओं भोः जिज्ञासीते' त्यादिप्रश्नप्रतिवचनरूपमेकायनशाखागतं श्रुतिवचनं पांचरात्रोक्तसकलवैदिककर्मपरित्यागे मूलमिति कल्पना त्वेकायनशाखां कल्पयतामेव शोभते । 'विप्रतिषेधादि'ति सूत्रस्य निषेधादित्यर्थमभिप्रेत्य पांचरात्रदीक्षानिषेधोज्ञापकं स्कांदवचनमुदाहरति–पांचरात्रे चेति । नन्वित्याशंकापरिहारस्यायमभिप्रायः । सत्यं नारायणः परमेश्वरशक्त्यवस्थाविशेषत्वात् तदनन्यः तदाराधनादिकञ्च क्रमेण परमेश्वरप्राप्तिसाधनमिति । तथापि वैदिकानां तदाराधनार्थं पांचरात्रं नादरणीयम् । वैदिकेष्वेव बोधायनवैखानसादिसूत्रेषु तत्प्रतिष्ठोत्सवादिप्रपञ्चनादिति॥ इति पाञ्चरात्राधिकरणम्॥९॥

इति शिवातिवादिमूर्धन्यशिवदर्शनस्थापनधुरन्धरसकलदेवभूदेवप्रतिष्ठापक-
श्रीमच्चिन्नबोम्मभूपालहृदयकमलकुहरविहरमाणश्रीसांबशिवप्रेरितस्य
श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीविश्वविद्याजिश्रीरंगराजाध्व-
रिवरसूनोरप्पय्यदीक्षितस्य कृतौ श्रीकण्ठाचार्यविरचित-
ब्रह्ममीमांसाभाष्यव्याख्यायां शिवार्कमणिदीपि-

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये द्वितीयस्याध्यायस्य द्वितीयः पादः. ॥ २ ॥

काव्यायां द्वितीयस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

नयमणिमालायाम्

अथ पांचरात्राधिकरणम् ॥ ९ ॥

सू ॥ उत्पत्त्यसंभवात् ॥ ३९ ॥ न च कर्तुः करणम् ॥४०॥ विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४१ ॥ विप्रतिषेधाच्च ॥ ४२ ॥

जीवस्य वासुदेवाज्जनिराचाराश्च तप्तमुद्राद्याः । तन्त्रे सात्वतसंज्ञे कथिता नारायणेनैव ॥ १२६ ॥

मैवं न्यायाम्नायस्मरणविरुद्धार्थसंकलनात् । प्रतिषेधाच्च विशिष्य तदनपेक्ष्यं वक्तृगौरवेऽपि सति ॥ १२७ ॥

इति पाञ्चरात्राधिकरणम् ॥ ९ ॥

इति श्रीमदप्पय्यदीक्षितकृतौ चतुर्मतसारसंग्रहे नयमणिमालाख्ये तृतीयपरिच्छेदे द्वितीयस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

सूत्रार्थचन्द्रिकायाम्

अथ उत्पत्त्यसंभवाधिकरणमथवा पाञ्चरात्राधिकरणम् ॥ ८ ॥

सू ॥ उत्पत्त्यसंभवात् ॥४१॥ न च कर्तुः करणम् ॥ ४२ ॥ विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४३ ॥ विप्रतिषेधाच्च ॥ ४४ ॥

भगवत्पादमते, एवं केवलनिमित्तमेवेश्वर इति वेदासंगते मते निरस्ते निमित्तं प्रकृतिश्चेति भागवतमतस्य वेदसंगतत्वात् तदुक्ते जीवोत्पत्त्यंशेऽपि प्रामाण्यं स्यादिति प्रत्युदाहरणसंगत्येदमारभते–**सू ॥ उत्पत्त्यसंभवात् ॥ ४२ ॥** अत्र वासुदेवः खलु परमात्मा जगत उपादानं निमित्तं च भवति । तस्मात्संकर्षणाख्यो जीव उदेति । तस्मात्प्रद्युम्नाख्यं मनो जायते । तस्मादनिरुद्धाख्योऽहंकारो जायते । इति भागवतसिद्धान्तः किं प्रमाणमूलः उत भ्रान्तिमूलः इति संशये प्रमाणमूल इति **पूर्वपक्षः । सिद्धान्तस्तु** वेदाविरुद्धांशे प्रमाणमूलत्वेऽपि वेदविरुद्धजीवोत्पत्त्यंशे प्रामाण्यं न भवति वासुदेवाज्जीवोत्पत्त्यंगीकारे तस्य घटवदनित्यत्वापत्त्या भगवत्प्राप्तिरूपमोक्षः कस्य स्यात् । अत उत्पत्त्यसंभवात् भ्रान्तिमूलो भागवतसिद्धान्त इति । इत्थं जीवजन्म निरस्य ततो मनोजन्म निराचष्टे– **सू ॥ न च कर्तुः करणम् ॥४३॥** कर्तुर्देवदत्तादेस्सकाशात्करणस्य कुठारादेरुत्पत्त्यदर्शनात् जीवात्कर्तुः करणं मनो जायते इत्येतदसंगतमित्यर्थः ॥

सू ॥ विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४४ ॥ विज्ञानादिभावे वा= संकर्षणादीनां त्रयाणां विज्ञानैश्वर्यादिरूपत्वेऽपि। **तदप्रतिषेधः**=तस्योत्पत्त्यसंभवरूपदोषस्य प्रकारान्तरेण प्राप्तिरित्यर्थः। वासुदेवादयश्चत्वारोऽपीश्वरा इति पक्षे भगवानेको वासुदेव इति स्वसिद्धान्तहानिः।संकर्षणादयस्त्रयो वासुदेवतुल्या इति पक्षे उत्पत्त्यसंभवदोषस्तदवस्थ एवेत्यर्थः ॥

अपिच ॥ **सू ॥ विप्रतिषेधाच्च ॥ ४५ ॥** क्वचित् ज्ञानैश्वर्यादीनि वासुदेवस्य गुणा इति क्वचिच्चोक्तगुणा एव वासुदेव इति च गुणगुणिनोर्भेदमभेदं च वर्णयन्ति । तस्मात्परस्परं विप्रतिषेधादप्रामाणिकमिदं भागवतमतमित्यर्थः ॥ तस्मादेवं **सांख्यवैशेषिकसौगतार्हतमाहेश्वरभागवतमतानां** भ्रान्तिमूलत्वेन तैर्मतैर्निरवद्यादद्वैताद्ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयो न विरुध्यत इति सिद्धम् । अत्र पादे **अस्मिन्मतेऽष्टाधिकरणानि** । सूत्राणि **पंचचत्वारिंशत्** ॥

श्रीकण्ठमते, वासुदेवप्रोक्ते पाञ्चरात्रे जीवोत्पत्त्यादिकमुच्यते तत्संभवति न वेति **संदेहः** । भगवता वासुदेवेन प्रोक्तस्य प्रमाणत्वात्संभवतीति **पूर्वपक्षः**।जीवोत्पत्त्यभिधायकमिदं पाञ्चरात्रं कृतनाशाकृताभ्यागमप्रसंगेन जीवोत्पत्त्यसंभवात् श्रुतिविरुद्धेश्वरकारणवादमुक्तिहेतुत्वतप्तमुद्राधारणादिधर्मपरत्वादिना विप्रतिषेधाच्चाप्रमाणमिति **सिद्धान्तः**। आद्यं सूत्रं व्याख्यातम् । **सू ॥ न च कर्तुः करणम् ॥ ४० ॥** कर्तुर्जीवाच्च करणोत्पत्तिर्न संभवति । तस्य प्रकृतिकार्यत्वेन चेतनकार्यत्वानुपपत्तेरित्यर्थः ॥ **सू ॥ विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४१ ॥** वाशब्दस्य पक्षविपरिवृत्त्यर्थत्वादिदं पूर्वपक्षसूत्रम् । विज्ञानशब्दो जीववाचकः । अत्र जीवादीनामुत्पत्तिर्नाभिधीयते । किं तु संकर्षणादीनां जीवादिभाव उच्यते । जीवाद्यधिष्ठातृत्वं जीवादिभाव इति । ततः **तदप्रतिषेधः**= तस्य पाञ्चरात्रग्रंथस्य प्रामाण्यनिषेधो न भवतीत्यर्थः। **सू ॥ विप्रतिषेधाच्च ॥ ४२ ॥** एवं जीवोत्पत्त्यभिधानदोषपरिहारेऽपि पाञ्चरात्रमतस्य नाभ्युपगमः । कुतः । **विप्रतिषेधाच्च**=

श्रुतिविरुद्धेश्वरकारणवादमुक्तिहेतुत्वतप्तमुद्राधारणादिधर्मपरत्वादिना विप्रतिषेधात् ‘ पांचरात्रे च बौद्धे च ’ इत्यादिनास्य मतस्य विशेषेण निषेधाच्चासमञ्जसमिदं पाञ्चरात्रमतमित्यर्थः॥ **अस्मिन्मते अस्मिन्पादे** सूत्राणि **द्विचत्वारिंशत्** । अधिकरणानि **नव** ॥

रामानुजमते, इदमुत्पत्त्यसंभवाधिकरणमिति व्यपदिश्यते । अस्मिन्मते आद्यं सूत्रद्वयं पूर्वपक्षप्रतिपादकमितरत्सूत्रद्वयं सिद्धान्तप्रतिपादकमित्यवधेयम् । सांख्यादितन्त्रवत्पाञ्चरात्रतंत्रमप्रमाणं वा उत प्रमाणं वेति **संदेहे** ‘ वासुदेवात्संकर्षणो नाम जीवो जायते ’ इति श्रुतिविरुद्धजीवोत्पत्त्यादिप्रतिपादनात् ‘ चतुर्षु वेदेषु पुरुषार्थमलभमान ’ इति वेदगणानादरवचनाच्चाप्रमाणमिति **पूर्वपक्षः । सिद्धान्तस्तु,** संकर्षणप्रद्युम्नानिरुद्धानां, परब्रह्मभावेन ‘ अजायमानो बहुधा विजायत ’ इति श्रुतिप्रसिद्धस्वेच्छावतारप्रतिपादनात्, जीवाहंकारमनश्शब्दानां तत्तच्छरीरकसंकर्षणाद्यभिधायकत्वात् ‘ चतुर्षु वेदेषु पुरुषार्थमलभमान ’ इति वेदगणानादरवचनस्यानुदितहोमनिन्दावद्वक्ष्यमाणप्रशंसार्थत्वात् वेदान्तोदितब्रह्मोपासनविधानाद्वेदाविरुद्धतदर्चनादिविधानाच्चेदं पाञ्चरात्रं प्रमाणमेवेति । **सूत्रार्थस्तु, सू ॥ उत्पत्त्यसंभवात् ॥ ३९ ॥** ‘ न जायते म्रियते वे ’ त्यादिश्रुतेर्जीवस्योत्पत्त्यसंभवात् जीवोत्पत्तिवचनाच्च न प्रमाणमित्यर्थः **॥ सू ॥ न च कर्तुः करणम् ॥ ४० ॥** ‘ एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि चे ’ ति ब्रह्मण एव मनउत्पत्तिश्रवणात् ‘ संकर्षणात्प्रद्युम्नसंज्ञकं मन उत्पद्यत इति मनसः करणस्य कर्तुर्जीवादुत्पत्तिश्च श्रुतिविरुद्धत्वान्न संभवति । इत्यर्थः ॥ **सू ॥ विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४१ ॥** वाशब्दात्पक्षो विपरिवर्तते । विज्ञानं चादि च विज्ञानादि ब्रह्म । संकर्षणादीनां ब्रह्मभावे सति ‘ अजायमानो बहुधा विजायत ’ इति श्रुतिसिद्धस्वेच्छावतारस्यैवात्राभिधानात् **तदप्रतिषेधः**= तस्य प्रामाण्यस्य निषेधो न भवतीति । संकर्षणादीनां जीवादिसमानाधिकरणतया निर्देशस्तेषामधिष्ठातृतयोपपद्यत इत्यर्थः ॥

सू ॥ विप्रतिषेधाच्च ॥ ४२ ॥ अस्मिन्नपि तंत्रे ‘ व्याप्तिरूपेण संबंधः तस्याश्च पुरुषस्य हि । स ह्यनादिरनन्तश्च परमार्थेन निश्चितः ॥’ इति पुरुषस्योत्पत्तिप्रतिषेधाच्चाविरुद्धमिदं पाञ्चरात्रं तंत्रमिति ॥ अस्मिन्**मते**ऽत्र **पादे द्विचत्वारिंशत्सूत्राणि** अधिकरणान्**यष्टौ** ॥

आनन्दतीर्थमते, शाक्तमते तु दूषणान्तरमप्यस्तीति तन्निराकरणाय पृथगधिकरणमारभ्यते । अस्मिन्नधिकरणे शाक्तमतप्रभेदानां त्रयमपि निरस्यते । केवला शक्तिराद्या जगतः कारणं, शिवानुगृहीता शक्तिर्जगतः कारणं,ज्ञानदेहकरणादिसाधनवता शिवेनानुगृहीता शक्तिर्जगतः कारणमिति शाक्तमतस्य त्रिविधा प्रक्रिया। तत्त्रिविधमपि शाक्तं मतं युक्तं न वेति **संदेहे** युक्तमिति **पूर्वपक्षः । सिद्धान्तस्तु ‘ न युक्तमिति ।** यथा–केवला शक्तिराद्या जगतः कारणं न संभवति । कुतः । **उत्पत्त्यसंभवात्**= ततोऽपत्योत्पत्त्यसंभवादित्यर्थः । पुरुषाननुगृहीतस्त्रीमात्रादपत्योत्पत्तेरदर्शनादिति भावः ॥ शिवानुगृहीता शक्तिर्जगतः कारणमिति मध्यमवामशाक्तं निराचष्टे—**सू ॥ न च कर्तुः करणम् ॥ ४३ ॥ कर्तुश्च**= अनुग्राहकस्य शिवस्य । **करणम्**= ज्ञानादिसाधनं **नास्ती**त्यर्थः। शिवस्य करणोत्पादने केवलशक्तेरशक्तेर्न तस्य शक्त्यनुग्राहकत्वं युक्तमिति भावः । अतो न सापि कारणं भवितुमर्हति ॥ ज्ञानदेहादिकरणवता शिवेनानुगृहीता शक्तिर्जगतः कारणमिति तृतीयं वामशाक्तं निराचष्टे— ॥ **सू ॥ विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४४ ॥** कर्तुरित्यस्ति । तस्य शिवस्य विज्ञानादिभावेऽगीकृते सति । **तदप्रतिषेधः**= तस्य प्रकृतशैवमतस्यानुमतिः स्यात् । तथा च तादृशशिवेनैव सर्वकार्योत्पत्तौ व्यर्थं शक्तिकर्तृत्वांगीकरणं शिवकर्तृत्वं तु प्राङ्निरस्तमिति भावः । एवं शाक्तमतत्रयं पृथङ्निरस्य सामान्येनापि निराचष्टे—**सू ॥ विप्रतिषेधाच्च ॥ ४५ ॥** सकलश्रुत्यादिविरुद्धत्वाच्चासमंजसं शक्तिमतमित्यर्थः । तस्मान्निरीश्वरवैशेषिकादिसमयानां दुष्टत्वाद्युक्तं जन्मादिसूत्रोक्तं विष्णोर्जगत्कर्तृत्वादिरूपं लक्षणमिति सिद्धम् ॥ **अस्मिन्मते** अत्र **पादे अधिकरणानि द्वादश । सूत्राणि तु पंचचत्वारिंशत् ॥ इति सूत्रार्थचन्द्रिकायामुत्पत्त्यसंभवाधिकरणम् ॥**

यं प्रासूत विशुद्धशीलमनघं वृद्धांबिकाख्या सती
यं मृत्युञ्जयशर्मणो बुधमणेर्भाग्यं विदुस्साधवः ।
वाधूलान्वयजन्मनोऽस्य सुधियो हालास्यनाथाह्वय-
स्येयं सत्कृतिरेधतामिह चतुर्भाष्यानुगा चन्द्रिका ॥

सूत्रार्थचन्द्रिकायामविरोधाख्ये द्वितीयकेऽध्याये । तर्काविरोधपादो द्वैतीयीकोऽयमभ्यगात्पूर्तिम् ॥
श्रीकण्ठलक्ष्मणानुजमतयोः परपक्षदूषकः प्रोक्तः । **समयाविरोधनाम्ना मध्वमते** तु प्रसिद्धिमुपयातः ॥
इति हालास्यनाथकृतौ सूत्रार्थचन्द्रिकायां द्वितीयस्याध्यायस्य द्वितीयः पादः ॥ २ ॥ २ ॥

॥ श्रीः ॥

शिवाभ्या नमः

श्रीकण्ठाचार्यकृतौ

ब्रह्ममीमांसाभाष्ये

अथ द्वितीयस्याध्यायस्य तृतीयः पादः ॥

अथ वियदधिकरणम् ॥ १ ॥

निरस्तस्समस्तो विरुद्धेतरदर्शनन्यायः । अध्यायशेषेण पुनरवांतरविरोधपरिहारः क्रियते–

सू० ॥ न वियदश्रुतेः ॥ १ ॥

शिवार्कमणिदीपिकायाम्

अथ द्वितीयस्याध्यायस्य तृतीयः पादः॥३॥

नन्वविरोधाध्याये वियदादीनामुत्पत्त्यनुत्पत्तिचिन्ताप्रभृतिचिंता न संगता । सापि वियदुत्पत्त्यादिश्रुतीनां तदनुत्पत्त्यादिश्रुतिविरोधसमाधानार्थेति चेन्न । तावताध्यायसङ्गत्यसिद्धेः । न हि विरोधसमाधानमात्रमध्यायार्थः । किं तु पूर्वाध्यायनिरूपिते वेदान्तानां जगत्कारणब्रह्मसमन्वये परिपंथिनो विरोधस्य समाधानम् । अन्यथाध्याययोराक्षेप्याक्षेपकभावसङ्गतेरलाभात् । यथाकथञ्चिदध्यायसङ्गतिसंभवेऽपि न पादसंगतिः । प्रथमपादवत्स्वमतदूषणपरिहारार्थयोस्तृतीयचतुर्थपादयोः परमतदूषणार्थात् द्वितीयपादात् पूर्वभावस्यैवोचितत्वात् इत्याशङ्क्याध्यायपादसङ्गतिमाह–निरस्त इति । अयमाशयः । अध्यायसंगतिः प्रासंगिकी कारणविषयश्रुतिविरोधसमाधानप्रसङ्गात् कार्यविषयश्रुतिविरोधोऽपि समाधीयत इति । यद्वा । कारणविषयश्रुतीनां ब्रह्मणि समन्वयो वियदाद्युत्पत्तिश्रुतीनां स्वार्थसमन्वयमपेक्षते । अन्यथा वियन्नित्यत्वे पवनादीनां वियदादिजन्यत्वे च ब्रह्म कस्य जगतः कारणं भवेदिति वियदाद्युत्पत्तिश्रुतीनां तदनुत्पत्तिश्रुतिविरोधसमाधानचिंता तावत् सङ्गतैव । तदनुबंधेन जीवनित्यत्वज्ञातृत्वाणुत्वादिश्रुतीनां तज्जननादिश्रुतिविरोधचिन्ता । अथवा 'विप्रतिषेधाच्चासमञ्जस' मित्यादि (ब्र-२-२-९) सूत्रैस्साङ्ख्यादिदर्शनानां परस्परविरोधादप्रामाण्यमुक्तम् । एवं वेदांतेष्वपि क्वचित् वियतो नित्यत्वं प्रतिपाद्यते क्वचिदनित्यत्वम् इत्यादिरूपेण परस्परविरोधेन पराहतत्वात् तेषां कारणविषयेऽपि प्रामाण्यं न संभवतीति प्रथमाध्यायनिरूपितकारणविषयश्रुतिसमन्वयाक्षेपकतयैव कृत्स्नस्याध्यायशेषस्याध्यायसंगतिः । यद्यपि परस्परविरोधेन वेदान्तानामप्रामाण्यशङ्का वक्ष्यमाणाधिकरणेषु पूर्वपक्षत्वेन नोद्भाव्यते तथापि वियदनुत्पत्त्यादिपूर्वपक्षोद्भावनपूर्वकं तदुत्पत्त्यादिश्रुतीनां स्वार्थसमन्वये स्थूणानिखननन्यायेन प्रसाधिते सति विप्रतिषेधेन निरस्तानां सांख्यादीनां हृदि विपरिवर्तमाना, वेदांतविप्रतिषेधप्रसक्तिर्बंद्यपि निरस्ता भवतीति फलतः परस्परविरोधसमाधानार्थत्वमस्त्येव । बाह्यहेतूत्थसमन्वयविरोधनिरासानंतरमांतरहेतूत्थतन्निरास इति तृतीयचतुर्थपादयोर्द्वितीयपादानंतर्यमिति । अनयोः पौर्वापर्यहेतुश्चतुर्थपादारंभे दर्शयिष्यते । सू ॥ न वियदश्रुतेः ॥ १ ॥

निरवयवत्वेनाकार्यत्वभ्रमादाकाशस्योत्पत्तिस्संदिह्यते संभवति न वेति । वियन्नोत्पद्यत इति प्राप्तम् । कुतः । अश्रुतेः । तथा हि–छांदोग्ये 'सदेव सोम्येदमग्र आसी' दित्यारभ्य 'तत्तेजोऽसृजते ' ति तेजःप्रभृतिभूतसृष्टिरभिधीयते । तत्र नाकाशस्योत्पत्तिः श्रूयते । या तु 'तस्माद्वा एतस्मादात्मन आकाशस्संभूत' इति तैत्तिरीये सा गौणी भवितुमर्हति, आकाशोत्पादकसमवाय्यादिनिरूपणासम्भवात् ।

अतो जीववदाकाशोऽपि नोत्पद्यत इति प्राप्ते ब्रूमः—

सू ॥ अस्ति तु ॥ २ ॥

वियत उत्पत्तिरस्त्येव, 'तस्माद्वा एतस्मादात्मन आकाशस्संभूतः' इत्यादिश्रुतेः । आत्मनस्तु 'न जायते म्रियते वा विपश्चि'दि ति प्रतिषेधादनुत्पत्तिः । न वियदुत्पत्तिप्रतिषेधश्रुतिरस्ति । अतो वियदुत्पद्यत एव ॥

वियदुत्पद्यते न वेति तदुत्पत्तिप्रतिपादनक्षमश्रुतिसंभवासंभवाभ्यां संशये पूर्वपक्षः–वियन्नोत्पद्यते तदुत्पत्तिप्रतिपादनक्षमश्रुत्यभावात् । छांदोग्ये तावत् तद्विषया श्रुतिरेव नास्ति तैत्तिरीयाथर्वणादिषु सत्यपि तदुत्पत्तिप्रतिपादनाक्षमा । निरवयवत्वेन सर्वगतत्वेन च तस्य नित्यत्वावगमात् । न च द्वितीयहेतोरसिद्धिः । क्वचिदपि तदभावस्य बुद्ध्यारोहासम्भवात् । अत्र वियन्नास्तीति निषेधस्य व्याहतत्वात् । यत्र निषिध्यते तस्यैव देशस्य वियद्रूपत्वात् 'आकाशे चाविशेषा' दिति वैभाषिकाधिकरण (ब्र-२-२-२३.) सूत्रे इह प्रत्ययवेद्यो देश आकाश इति व्यवस्थापितत्वात् । न च हेत्वोरप्रयोजकत्वम् । निरवयवस्य सर्वगतस्योत्पादकसामग्र्यनिरूपणात् । तस्मादनुमानात् वियतो नित्यत्वावधारणेन तदुत्पत्तिं प्रतिपादयितुमक्षमा तैत्तिरीयादिश्रुतिर्गौणत्वमवलम्बते । न च, तैत्तिरीयश्रुतावेकस्य संभूतशब्दस्य 'एतस्माज्जायते प्राणो मनस्सर्वेंद्रियाणि च । खं वायुर्ज्योतिरापः पृथ्वी विश्वस्य धारिणी' त्याथर्वणश्रुतावेकस्य जायत इति शब्दस्य च क्वचिद्गौणत्वमन्यत्र मुख्यत्वं च न युक्तमिति वाच्यम् । आथर्वणश्रुतावेवैकस्य ब्रह्मशब्दस्य तथात्वदर्शनात् । तत्र श्रवणावृत्तिरस्तीति चेत् तदनुषंगेऽप्यभिधानावृत्तिरविशिष्टा । सकृच्छ्रुतस्यैव च ब्रह्मशब्दस्य गौणमुख्यत्वं दृष्टं 'द्वे ब्रह्मणी वेदितव्ये' इत्यत्र । तस्माद्वियन्नोत्पद्यत इत्येवं प्राप्ते सिद्धांतमाह– सू ॥ अस्ति तु ॥ २ ॥ वियदुत्पत्तिप्रतिपादनक्षमा श्रुतिरिति शेषः । भाष्ये 'वियत उत्पत्तिरस्त्ये' वेति श्रुतिसद्भावसूत्रणस्य फलितार्थ उक्तः । तुशब्दः पूर्वपक्षोपात्तजीवदृष्टांतवैषम्यार्थ इति व्याचष्टे–आत्मनस्त्विति । तथा च परमतानुसारेण प्रथमानुमाने निरवयवद्रव्यत्वरूपसाधनावच्छिन्नसाध्यव्यापकं स्वमतानुसारेण केवलसाध्यव्यापकोत्पत्तिप्रतिषेधश्रवणमुपाधिरिति भावः । सर्वगतत्वहेतुस्त्वसिद्धः । अव्यक्तप्रकृतिकस्याकाशस्य परिच्छिन्नत्वात् । न चोक्तव्याघातः । तन्निषेधे चिच्छक्तेस्तद्देशत्वसंभवात् । न च पतत्रिपतनादावपि सैव प्रत्यक्षविषयो देशः स्यात् । तस्या 'स्सन्घट' इत्यादिप्रत्यक्षविषयत्वसंप्रतिपत्तेः । तथा च 'आकाशे चाविशेषा' दिति सूत्रव्याख्यानभाष्यविरोध इति वाच्यम् । चिच्छक्तिमनंगीकुर्वतो बौद्धस्य तयान्यथासिद्धिशंकानवकाशात् । स्वमते तुशब्दाश्रयत्वयुक्त्यनुगृहीतश्रुतिबलादाकाशसिद्धिः । तस्यावकाशरूप-

यदुक्तमुत्पत्तिर्गौणीति तत्राह–

सू० ॥ गौण्यसंभवाच्छब्दाच्च ॥ ३ ॥

'तत्तेजोऽसृजते' ति तेजसः प्रथमसृष्टिवचनात् 'आकाशस्संभूत' इति श्रुतिर्गौणी, तस्य निरवयवस्य उत्पत्त्यसंभवात् 'वायुश्चांतरिक्षं चैतदमृत'मिति नित्यत्वशब्दाच्च ॥

सू० ॥ स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ४ ॥

एकस्य संभूतशब्दस्याकाशे गौणत्वमन्यत्र मुख्यत्वमनुषङ्गेऽपि श्रवणादावृत्ताविव संभवत्येव । यथैकस्य ब्रह्मशब्दस्य 'तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायत' इति प्रकृतौ गौणत्वं 'तपसा चीयते ब्रह्मे' ति मुख्यत्वमावृत्तौ तद्वदत्रापि । तस्मादाकाशोत्पत्तिरयुक्तेति ॥

अथ परिहार उच्यते–

सू ॥ प्रतिज्ञाहानिरव्यतिरेकात् ॥ ५ ॥

'येनाश्रुतं श्रुतं भवती' त्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अहानिर्वियदा-

---

वत्त्वश्रुतिबलादेव पतत्र्यादिपतनदेशत्वसिद्धिश्चेति द्रष्टव्यम् । पूर्वपक्षबीजोद्घाटनार्थमुत्तरसूत्रद्वयम्–सू ॥ गौण्यसंभवाच्छब्दाच्च ॥ ३ ॥ 'असंभवा'दित्यनेन श्रुत्यर्थापत्त्यनुमानविरोधादुत्पत्त्यसंभव उक्त इति व्याचष्टे–तत्तेज इति ।(तेजसः प्राक्सृज्यसद्भावे तस्य प्रथमं सृष्टिश्रवणं नोपपद्यत इति अर्थापत्तिः ।) निरवयवस्येति । निरवयवस्योत्पादिका सामग्री न संभवतीत्यनुकूलतर्कसहकृते निरवयवत्वहेतौ नोपाधिसंभव इति भावः । सू ॥ स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ४ ॥ 'तस्मादेतद्ब्रह्मे' त्यत्र ब्रह्मशब्दः कार्यब्रह्मरूपहिरण्यगर्भादिपरः इति (के[२]चित्) । वक्तव्यं च वियदुत्पत्तिवादिनापि 'आकाशवत्सर्वगतश्च नित्य' इति श्रुतौ सकृच्छ्रुतयोर्नित्यसर्वगतशब्दयोरेकत्र गौणत्वमन्यत्र मुख्यत्वं च । अतस्तन्न दोष इत्यापादयितुं शक्यत इत्यपि द्रष्टव्यम् । सू ॥ प्रतिज्ञाहानिरव्यतिरेकात् ॥ ५ ॥ यत्र तेजसः प्रथमं सृष्टिः श्रुता तत्रैव छांदोग्ये मृत्पिण्डघटशरावादिदृष्टांतोदाहरणपूर्वकम् एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातं तत आपतद्वियदादेः ब्रह्मकार्यत्वं तत्र वियत्सृष्ट्यश्रवणमात्रेण प्रत्याख्यातुं न शक्यते । अश्रुतस्यापि गुणोपसंहारन्यायतः प्राप्तिसंभवेनाश्रवणस्यान्यथोपपत्तेरनुमानमप्यप्रयोजकम् । निरवयवद्रव्यस्यापि कार्यत्वसंभवात् उदाहृतप्रतिज्ञया सर्वस्यापि प्रपञ्चस्य मृत्पिण्डघटशरावादिन्यायादेककार्यत्वावधारणेन द्रव्याणामवयवसंयोगारभ्यत्वासिद्धेः । दृष्टान्तरूपोपपत्त्युपन्यासपूर्विका प्रतिज्ञा च तात्पर्यलिङ्गवत्त्वात्तद्रहिताभ्यो 'वायुश्चान्तरिक्षं चे' त्यादिश्रुतितो बलवतीति प्रतिज्ञाबलादेव पूर्वपक्षावलंबनहेतुत्रयनिराकरणसिद्धिमभिप्रेत्य सूत्रं व्याचष्टे–येनाश्रुतमिति । ननु, ब्रह्मज्ञानेनाज्ञातस्यापि ज्ञानमात्रं प्रतिज्ञातं न सर्वस्य ज्ञानं तत्तु तेजःप्रभृतिविषयत्वेनाप्युपपन्नमित्याशङ्क्याह–सर्वविज्ञानेति । 'येनाश्रुत' मित्यादौ अश्रुतादिशब्दास्संकोचकाभावात् 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञात' मिति

---

१ ( ) एतद्रेखांकितं वाक्यं ख पुस्तके नास्ति । २ 'केचित्' इत्येतत् ख पुस्तके नास्ति ।

देर्ब्रह्मकार्यत्वेन तदव्यतिरेकादेव भवति । अतो न संभूतशब्दस्य गौणत्वं, प्रतिज्ञाहान्याद्यापत्तेः । यथा प्रतिज्ञाहानिर्न भवति तथा योजनीयम् ॥

सू ॥ शब्देभ्यः ॥ ६ ॥

'आत्मन आकाशस्संभूत' इत्यादिशब्देभ्योऽवगतां वियदुत्पत्तिं 'तत्तेजोऽसृजते' त्यत्राकाशावचनावगतं तेजःप्राथम्यं न विचालयितुं क्षमते ॥

सू ॥ यावद्विकारं तु विभागो लोकवत् ॥ ७ ॥

श्रुत्यंतरैकार्थ्याच्च सर्वविषया इति भावः । ननु प्रतिज्ञाया अहानिरव्यतिरेकादनन्यत्वादेव भवतीति सत्यं, तदनन्यत्वमपृथक्सिद्धिरूपं शरीरशरीरिभावमात्रेणोपपद्यमानं वियदादेर्न कार्यत्वपर्यंतमपेक्षते इत्याशंक्याह—ब्रह्मकार्यत्वेनेति । (अन्यथा सर्वविज्ञानप्रतिज्ञानानिर्वाहात्) मृत्पिण्डघटशरावादिदृष्टांतानुरोधा[2]च्चेति भावः । पूर्वपक्ष्यभिमतहेतुत्रयनिरासार्थं प्रतिज्ञापर्यंतं नान्वेषणीयम् । उक्तहेतुत्रयानुसारेण यस्यास्संभूतादिश्रुतेर्गौणत्वमापाद्यते सैव तन्निराकरणसमर्थेति प्रतिपादनार्थं सूत्रम्—सू ॥ शब्देभ्यः ॥ ६ ॥ छांदोग्ये वियदुत्पत्तिर्न निवारिता तेजस्सृष्टेः प्राथम्यं च न श्रुतं किं तु वियदुत्पत्तेरवचनमात्रम् । न च क्वचित्कस्यचिदवचनमन्यत्र वचनतस्तत्प्राप्तिं निवारयितुमीष्टे । तेजस्सृष्टिः प्रथमश्रुतेति स्थानप्रमाणात् तत्प्राथम्यमवगम्यते इति चेन्न । स्थानप्रमाणकल्प्यप्राथम्यान्यथानुपपत्त्या वियदनुत्पत्तिकल्पनतस्संभूतादिश्रुतेर्बलवत्वात् तेजस्सृष्टिप्राथम्ये वियत्सृष्टिस्तत्प्राथम्यं चोभयं बाध्यं वियत्सृष्टिप्राथम्ये तु तेजःसृष्टिप्राथम्यमात्रं बाध्यमिति बाधककल्पनालाघवेन तेजस्सृष्टिप्राथम्यबाधस्योचितत्वाच्च । तस्मादिह न श्रुत्यर्थापत्तिः प्रवर्तते । नाप्यनुमानम् । प्रमाणांतराप्राप्तामेकस्मादात्मनो वियदुत्पत्तिं ब्रुवाणया श्रुत्यैव द्रव्यस्यावयवसंयोगारभ्यत्वनियमरूपशुष्कतर्कबाधात् । उदाहृतशब्दोऽपि न प्रवर्तते । 'सत्यं ज्ञानमनंतं ब्रह्मे' त्युक्तलक्षणान्तर्गतानंतशब्दार्थभूतवस्तुपरिच्छेदराहित्योपपादनार्थं प्रवृत्तस्य 'आत्मन आकाश' इत्यादेः 'कस्मिन्नु भगव' इत्या[3]दिसर्वविज्ञानप्रतिज्ञोपपादनार्थं प्रवृत्तस्य 'एतस्माज्जायत' इत्यादेश्च प्रबलतया तेनैव तस्य बाध्यत्वादिति पूर्वपक्ष्यभिमतहेतुत्रयनिराकरणमभिप्रेत्य व्याचष्टे—आत्मन आकाश इत्यादिना । छांदोग्ये विय[4]दनुत्पत्तिवचनमंगीकृत्य तैत्तिरीयादिगतवचनांतरतस्तत्सिद्धिः पूर्वसूत्राभिप्रेता भाष्यकृतोपन्यस्ता । अथ छांदोग्येऽपि तद्वचनमस्ति तेजः प्रभृत्युत्पत्त्युक्तेरेवोपलक्षणतया वियदुत्पत्तिवचनरूपत्वस्यापि सद्भावादतो न श्रुत्यर्थापत्तेरवकाशः नाप्युपन्यस्तशब्दानुमानयोरिति प्रतिपादनार्थं सूत्रम्—सू ॥ यावद्विकारं तु विभागो लोकवत् ॥ ७ ॥ तुशब्दश्छांदोग्ये वियदुत्पत्तिवचनं नास्तीति शंकाव्यावृत्त्यर्थः । विक्रियत इति विकारं कार्यम् । कर्मणि घञ् प्रत्ययः । अत एव नपुंसकलिंगतोपपत्तिः । सामान्यवचनसंक्षिप्तं यावत्कार्यजातमस्ति तत्सर्वं कर्म । विभागो विभज्यैकदेशस्योदाहरणतया कथनं व्याप्नोति न तु यावद्विशिष्योदाहृतं तावन्मात्रनिष्ठं भवति । विभागवचनं लोकवत् । यथा लोके 'महता तपसा मयेमे पुत्रा लब्धाः' इत्युक्त्वा 'बहुकालमयं परमेश्वराराधनेन लब्ध' इत्येकस्य द्वयोस्त्रयाणां वा विभज्य कथनं सर्वेषामपि पुत्राणां तथा तपोविशेषलब्धत्वप्रदर्शनार्थं

---

१ ( ) एतद्रेखांकितं वाक्यं ख पुस्तके नास्ति । (२) रोधादिति ख पाठः । (३) 'इत्यादिप्रतिज्ञातसर्वविज्ञानोपपादनार्थ' मिति ख पाठः । (४) 'वियदुत्पत्त्यवचन' मिति ख पाठः ।

'ऐतदात्म्यमिदं सर्व'मित्याकाशादेरपि विकारत्वावगमात्तेजःप्रभृतिविकार-वचनं यावद्विकारजातं तस्य सर्वस्यापि प्रदर्शनार्थमिति विभाव्यते । यथा लोके 'दश मे पुत्रा' इत्युक्त्वा तेषु केषांचिदुत्पत्तिकथनं तथात्रापि । तस्मात् वियदुत्पद्यत इति युक्तमेव ॥ इति वियदधिकरणम् ॥ १ ॥

भवति । यथा वा 'अग्नये जुष्टं निर्वपामी' ति मन्त्रस्य 'विकृतिषु यथादेवतमूहः कर्तव्य' इत्युक्त्या यथा सौर्यचरौ 'सूर्याय जुष्टं निर्वपामीत्यूह' इति विशिष्य क्वचिद्विकृतौ तद्देवतावाचिपदोहकथनं सर्वासु विकृतिषु तथैव तत्तद्देवताविशेषवाचिपदोहकर्तव्यताप्रदर्शनार्थं भवतीति सूत्रार्थं दर्शयन् किमत्र सामान्यतस्संक्षिप्य वचनं किं वा विभागवचनमित्याकांक्षायां तदुभयं विवृणोति–ऐतदात्म्यमिति । इदमुपसंहारगतवाक्योदाहरणमुपक्रमगतस्य 'सदेव सोम्येद' मित्यादिवाक्यस्याप्युपलक्षणम् । तथा च सर्वस्यापि प्रपञ्चस्य सृष्टेः प्राक्सद्रूपकारणात्मत्वावधारणात् उपसंहारगतवाक्यं सृष्ट्यनंतरमपि सद्रूपकारणात्मत्वावधारणार्थमवसीयते । तदेतत् सामान्यतः सर्वस्यापि प्रपञ्चस्य ब्रह्मणश्च कार्यकारणभावप्रतिपादकं संक्षिप्य वचनं तत्रोदाहरणविशेषप्रतिपादनार्थं 'तत्तेजोऽसृजते'त्यादि विभागवचनम् । अतस्तस्य वियदादिसर्वकार्योपलक्षणार्थत्वं युक्तमिति भावः । एवं चार्थापत्तिरनवकाशेति स्पष्टम् । शब्दोऽपि कार्यकारणभावकृतप्रपञ्चब्रह्मानन्यत्वप्रतिपादकोपक्रमोपसंहारतद्विशदीकरणार्थमध्यपरामर्शयुक्तसन्दर्भात् दुर्बल इति स्पष्टमेव । अनुमानमपि वियदादिकं कार्यं वस्तुपरिच्छेदरूपविभागवत्त्वात् घटवदिति प्रत्यनुमानपराहतम् । साध्यमिह स्वरूपान्यथाभावज्ञानसंकोचरूपधर्मान्यथाभावान्यतरकार्यत्वाधिकरणत्वमिति न चिच्छक्तौ जीवात्मनि च व्यभिचारः । निरवयवे सामर्थ्यनिरूपणं तु प्रत्युक्तम् । इदं प्रत्यनुमानमर्थान्तरपरेण सूत्रेण सूचितम् । तत्रायं सूत्रार्थः । विभागो यावद्विकारं विकारा यावन्तः तावत्स्वेव । घटादिवत् । न कार्यत्वमतिक्रम्य विभक्तत्वमस्तीति । अस्मिन्नर्थे 'यावद्विकार' मित्यव्ययीभावसमासेन एकं पदम् । अयमर्थो भाष्यांतरेषूक्तः ततोऽवगन्तुं शक्यत इति भाष्यकृता नोपन्यस्तः । अधिकरणार्थमुपसंहरति–तस्मादिति ॥ इति वियदधिकरणम् ॥ १ ॥

नयमणिमालायाम्

अथ द्वितीयस्याध्यायस्य तृतीयः पादः ।

अथ वियदधिकरणम् ॥ १ ॥

सू ॥ न वियदश्रुतेः ॥ १ ॥ अस्ति तु ॥ २ ॥ गौण्यसंभवाच्छब्दाच्च ॥ ३ ॥ स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ४ ॥ प्रतिज्ञाहानिरव्यतिरेकात् ॥ ५ ॥ शब्देभ्यः ॥ ६ ॥ यावद्विकारं तु विभागो लोकवत् ॥७॥

तेजःप्रभृतिश्रवणात्सृष्टेर्नोत्पद्यते गगनम् । गौणी तज्जननश्रुतिरनवयवत्वेन तदयोगात् ॥ १२८ ॥

सद्बोधेऽखिलबोधप्रतिज्ञया कार्यतावगतेः । गौणी न तज्जनिश्रुतिरनुमानं स्यात्तया बाध्यम् ॥ १२९ ॥

इति वियदधिकरणम् ॥ १ ॥

सूत्रार्थचन्द्रिकायाम् अथ द्वितीयस्याध्यायस्य तृतीयः पादः ।

अथ वियदधिकरणम् ॥

सू ॥ न वियदश्रुतेः ॥ १ ॥ अस्ति तु ॥ २ ॥ गौण्यसंभवाच्छब्दाच्च ॥ ३ ॥ स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ४ ॥ प्रतिज्ञाहानिरव्यतिरेकात् ॥ ५ ॥ शब्देभ्यः ॥ ६ ॥ यावद्विकारं तु विभागो लोकवत् ॥७॥

भगवत्पादमते, पूर्वस्मिन्पादे श्रुतिविरुद्धत्वात्परपक्षाणामुपेक्ष्यत्वमभाणि । तर्हि श्रुतीनामप्यन्योन्यविरुद्धत्वाद्ब्रह्मकारणवादस्याप्युपेक्ष्यत्वापत्तिरित्याशंकानिराकरणार्थं परं पादद्वयमारभ्यते-**न वियदश्रुतेरित्यादि** । अत्रादौ सृष्टिवाक्यानामविरोधं प्रतिपादयितुमाकाशमाश्रित्य विचार्यते । अत्र आकाशस्योत्पत्तिरस्ति वा न वेति संदेहः । यद्यस्ति तर्हि छान्दोग्ये आकाशवायू विना 'तत्तेजोऽसृजते' ति तेजआदिका सृष्टिः श्रूयते । तैत्तिरीयके तु 'आत्मन आकाशस्संभूत' इत्याकाशादिका । तथा चानयोर्वाक्ययोर्विरोध इति **पूर्वपक्षः** । **सिद्धान्तस्तु,** एकदेशिमते छान्दोग्ये आकाशस्योत्पत्त्यभावेऽपि तैत्तिरीयके सा श्रुतिरस्त्येव । तथापि आकाशोत्पत्तौ समवायिकारणादिसामग्र्यभावात् विभुत्वेन नित्यत्वानुमानाच्चाकाशोत्पत्तेरसंभवात्सा आकाशस्योत्पत्तिर्न मुख्या भवितुमर्हति किं तु गौणी । किं च 'वायुश्चान्तरिक्षं चैतदमृतम्' इत्याकाशेऽमृतशब्दप्रयोगदर्शनाच्च नाकाशस्योत्पत्तिः । नन्वेकस्मिन्वाक्ये एकस्य संभूतशब्दस्य मुख्यत्वं गौणत्वं च कथमिति चेत् यथा एकस्मिन्नेव प्रकरणे विषयभेदात् 'अन्नं ब्रह्मे'त्यत्र ब्रह्मशब्दो गौणः 'आनन्दो ब्रह्मे' त्यत्र ब्रह्मशब्दो मुख्यः तथा प्रकृतेऽपि विषयभेदादेकस्य गौणत्वं मुख्यत्वं च स्यात् । एवमाकाशस्यानुत्पत्तौ छान्दोग्यश्रुतेस्तैत्तिरीयश्रुत्या न विरोध इति । एकदेशिमतं दूषयन् सूत्रकारः परमसिद्धान्तमाह—यद्याकाशस्योत्पत्तिर्न स्यात्तर्हि एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा हीयेत । अतस्तत्सिद्ध्ये आकाशस्योत्पत्तिरङ्गीकर्तव्या । किं च । 'सदेव सोम्येदमग्र आसीत्' 'ऐतदात्म्यमिदं सर्वं' मित्यादिशब्देभ्यः प्रतिज्ञासिद्धिरवगम्यते । सर्वस्य वस्तुजातस्य ब्रह्मणोऽव्यतिरेकाद्धि सर्वविज्ञानप्रतिज्ञोपपद्येत । छान्दोग्यश्रुतिस्तैत्तिरीयश्रुत्यनुसारेण आकाशं वायुं च सृष्ट्वा तत्तेजोऽसृजतेति विपरिणम्यत इति नानयोर्विरोधः । यत्तु सामग्र्यभावादाकाशस्यानुत्पत्तिरिति तन्न । ब्रह्मण एव वियत्सामग्रीत्वात् । नित्यत्वानुमानमपि न सिध्यति । आकाशादिः पराधीनसत्ताकः । स्वसमानसत्ताकविभागवत्त्वात् । घटादिवत् । इत्यनुमातुं शक्यत्वात् नित्यत्वानुमाने हेतोरसिद्धेः । यतः यावद्विकारजातं विभागो दृश्यते न त्वविकारे ब्रह्मणि । लोके घटादेर्विकारस्यैव विभक्तत्वदर्शनात् । अत आकाशस्य ब्रह्मकार्यत्वं सिद्धमिति । सूत्रार्थोऽपि व्याख्यातप्रायः । अस्मिन्मते **'शब्दाच्च'** इति पृथक्सूत्रं **'अव्यतिरेकाच्छब्देभ्यः'** इत्येकं सूत्रमिति च मध्वमतसाधारणः श्रीकण्ठरामानुजमताभ्यां विशेषः ॥

श्रीकण्ठमते, सांख्यादिदर्शनविरोधपरिहारानन्तरमध्यायशेषेणावान्तरविरोधः परिह्रियते—**न वियदश्रुतेरित्यादिना ।** अत्राधिकरणे वियदुत्पद्यते न वेत्यादिसंदेहपूर्वपक्षादिकं प्रायः पूर्ववत् । सिद्धान्तनिरूपणे परं सूत्रार्थवर्णनं कियदिव भिद्यत इत्यतस्तन्मात्रमिह निरूप्यते—**सू ॥ न वियदश्रुतेः ॥ १ ॥ वियन्नो**त्पद्यते । कुतः । **अश्रुतेः**=तदुत्पत्तिप्रतिपादनक्षमश्रुत्यभावादित्यर्थः । अतो जीववदाकाशोऽपि नोत्पद्यते इति **पूर्वपक्षे** प्राप्ते **सिद्धान्तमाह—सू ॥ अस्ति तु ॥ २ ॥** वियदुत्पत्तिप्रतिपादनपरा श्रुतिरिति शेषः । छान्दोग्ये तदुत्पत्तिप्रतिपादनाभावेऽपि तैत्तिरीये 'तस्माद्वा एतस्मादात्मन आकाशस्संभूत' इति तदुत्पत्तिपरा श्रुतिरस्त्येव । आत्मनस्तु 'न जायते म्रियते वे' त्यादिप्रतिषेधादनुत्पत्तिः न वियत उत्पत्तिप्रतिषेधश्रुतिरस्ति । तस्माद्वियदुत्पद्यत एवेति ॥ उत्तरसूत्रद्वयेन पूर्वपक्षबीजमुद्घाटयति—**सू ॥ गौण्यसंभवाच्छब्दाच्च ॥ ३ ॥** निरवयवस्याकाशस्योत्पत्त्यसंभवात् 'वायुश्चान्तरिक्षं चैतदमृत' मिति नित्यत्वशब्दाच्च 'तत्तेजोऽसृजते' ति तेजसः प्रथमसृष्टिवचनात् 'आकाशस्संभूत' इति श्रुतिर्गौणी **॥ सू ॥ स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ४ ॥** यथा एकस्य ब्रह्मशब्दस्य 'तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायत' इति प्रकृतौ गौणत्वं 'तपसा चीयते ब्रह्म' इति मुख्यत्वं तद्वदत्रापि एकस्य संभूतशब्दस्याकाशे गौणत्वमन्यत्र मुख्यत्वमावृत्ताविव संभवत्येव । तस्मादाकाशस्योत्पत्तिरयुक्तेति ॥ अथ परिहारमाह—**सू ॥ प्रतिज्ञाहानिरव्यतिरेकात् ॥ ६ ॥** वियदादेर्ब्रह्मकार्यत्वेन तदव्यतिरेकादेव 'येनाश्रुतं श्रुतं भवती 'त्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अहानिर्भवति । अतो न संभूतशब्दस्य गौणत्वम् । इत्यर्थः **॥ सू ॥ शब्देभ्यः ॥ ६ ॥** 'आत्मन आकाशस्संभूत' इत्यादिशब्देभ्योऽवगतां वियदुत्पत्तिं 'तत्तेजोऽसृजते' त्याकाशवचनावगतं तेजःप्राथम्यं न निवारयितुमीष्टे ॥ **सू ॥ यावद्विकारं तु विभागो लोकवत् ॥ ७ ॥** 'ऐतदात्म्यमिदं सर्वं' मित्यादिनाकाशादेस्सर्वस्यापि विकारत्ववचनात् 'तत्तेजोऽसृजते'त्यादि विभज्य कथनं यावन्तो विकारास्तावत्स्वेव व्याप्नोति । यावद्विकारमित्यव्ययीभावादेकं पदम् । यथा लोके 'दश मे पुत्रा' इत्युक्त्वा तेषु केषांचिदुत्पत्तिकथनं तद्वदत्रापीत्यर्थः । तस्माद्वियदुत्पद्यत एवेति सिद्धम् । अमृतत्ववचनमापेक्षिकमित्यर्थः ॥

रामानुजमते, संगतिसंदेहपूर्वपक्षसिद्धान्तसूत्रार्थवर्णनादिकं प्रायः श्रीकण्ठमतसाधारणमेव । अधिकरणरचना परं भिद्यते । श्रीकण्ठमते पृथगधिकरणद्वयतया विभक्तं सूत्रद्वयमनन्तरमेतदधिकरणेऽन्तर्भावितमित्यस्ति विशेषः । तयोरपि सूत्रयोरर्थवर्णनप्रकारस्त्वविशिष्ट एव श्रीकण्ठमतात् । यथा—**सू ॥ एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥** अनेन न्यायेन मातरिश्वनोऽप्युत्पत्तिरुक्ता । अधिकाशंकाभावात् न्यायातिदेशोऽयं न भवति । पृथग्योगकरणमुत्तरार्थम् । **सू ॥ असंभवस्तु सतोऽनुपपत्तेः ॥ ९ ॥** तुशब्दोऽवधारणार्थः । **सतः**=परमकारणस्यैव ब्रह्मणः । **असंभवः**=उत्पत्त्यसंभवः । तद्व्यतिरिक्तस्य सर्वस्यैवैकविज्ञानेन सर्वविज्ञानप्रतिज्ञाद्यनुपपत्तेस्संभव उक्त इति भावः ।

अथ मातरिश्वाधिकरणम् ॥ २ ॥

सू ॥ एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥

'तेजोऽत' इति वक्ष्यति । तदर्थं पृथगुपादानम् । आकाशाद्वायोरुत्पत्तिरस्ति नवेति संशये वायुर्नोत्पद्यत इत्युच्यते । छांदोग्ये तेजःप्राथम्यात् वायोरुत्पत्तेरश्रुतेः बृहदारण्यके 'सैषानस्तमिता देवता यद्वायुरि' ति तज्जन्मनिषेधाच्च सर्वथा वायुर्नोत्पद्यत इति प्राप्ते सिद्धांत उच्यते–छांदोग्ये वायोर्जन्माश्रवणेऽपि गुणोपसंहारन्यायेन 'आकाशाद्वायुरि' ति तैत्तिरीयवाक्यस्योपसंहारे सति श्रुतमेव छांदोग्येऽपि वायोर्जन्म । 'सैषानस्तमिते' ति श्रुतिः स्तुतिपरा । उपासनाप्रकर-

---

अथ मातरिश्वाधिकरणम् ॥ २ ॥

सू ॥ एतेन मातरिश्वा व्याख्यातः ॥ ९ ॥ ननु किमर्थमिदमतिदेशाधिकरणं 'सैषानस्तमिते' ति वाक्यावलंबनशङ्काव्यावर्तनार्थमिति चेन्न । 'वायुश्चान्तरिक्षं चे' ति पूर्वाधिकरणोदाहृतवाक्यावलंबनशङ्काव्यावर्तनेन तस्यापि सिद्धत्वात् इत्याशंक्याह–तेजोऽत इति । वियन्मातरिश्वनोरुभयोरप्येकसूत्रेणोत्पत्तौ समर्थयितुं शक्यायामप्युत्तरसूत्रे सर्वनाम्ना मातरिश्वन एव परामर्शार्थं पृथक्सूत्रकरणमित्यर्थः । ये तु मन्यंते 'वायुश्चान्तरिक्षं चैतदमृत' मित्युभयसाधारण्येनामृतत्वमुक्त्वा पुनर्वायोर्विशिष्योच्यते 'सैषानस्तमिता देवता यद्वायु' रिति ततोऽभ्यासाद्वायोरमृतत्वं विवक्षितमिति ज्ञायत इत्यधिकाशंकाव्यावृत्त्यर्थमातिदेशिकमधिकरणांतरमेवेदमिति तन्मतानुसारेणाधिकरणमुपन्यस्यति–आकाशाद्वायोरित्यादिना । एतदेव भाष्यकाराभिमतं मतम् । पृथग्योगकरणमुत्तरार्थमिति तु मतान्तरप्रदर्शनमात्रम् । न हि 'तेजोऽतस्तथा ह्याह' इत्युत्तरसूत्रे 'अत' इत्यनेन वायुरेव परामर्शनीयः । किं त्वाकाशोऽपि । तत्र सूत्रे वायोरेवाग्निरितिवदाकाशादेव वायुरित्यपि पूर्वपक्षस्य विवक्षितत्वेन तदर्थं वायुरिति पदेऽध्याहृते सत्यावृत्त्या तदन्वयिनोऽत इत्यस्याकाशपरत्वस्याप्यवश्यंभावादिति । उपासनाप्रकरणादिति ।

आनन्दतीर्थमते, अत्र पादे विप्रतिषेधदोषपरिहाराय श्रुतिविरोधो निराक्रियते । अत्राधिकरणे संदेहपूर्वपक्षसिद्धान्ताधिकरणशरीरादिकमविशिष्टमेव शांकरमतात् । सूत्राक्षरार्थवर्णने परमस्ति वैलक्षण्यमिति तन्मात्रमिह निरूप्यते–**सू ॥ न वियदश्रुतेः ॥ १ ॥ वियत्**=आकाशमनुत्पत्तिमन्न । किं त्वीशादुत्पत्तिमदेव । कुतः । **अश्रुतेः**=वियदनुत्पत्तौ श्रुत्यभावादित्यर्थः । **सू ॥ अस्ति तु ॥२॥** आकाशोत्पत्तौ 'आत्मन आकाशस्संभूत' इति श्रुतिरस्त्येवेत्यर्थः ॥ **सू ॥ गौण्यसंभवात् ॥ ३ ॥** 'अनादिर्वायमाकाश' इति श्रुति**र्गौणी**=अमुख्यानादित्वपरा । कुतः । **असंभवात्**=तस्या मुख्यार्थत्वे बहुत्वोत्पत्तिश्रुत्ययोगादित्यर्थः ॥ **सू ॥ शब्दाच्च ॥ ४ ॥** 'अथ ह वाव नित्यानी' ति श्रुतिबलाच्चानादित्वश्रुतिर्गौणार्थेत्यर्थः ॥ **सू ॥ स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ५ ॥** चोऽवधारणे । **ब्रह्मशब्दवत्**=यथा एकस्यैव ब्रह्मशब्दस्य विष्णौ मुख्यत्वं जीवे त्वमुख्यत्वमस्ति तथा एकस्यैव नित्यत्वबोधकशब्दस्य ब्रह्मणि मुख्यार्थता स्यात् ॥ **सू ॥ प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॥ ६ ॥** आकाशस्य मुख्यानुत्पत्त्युक्तौ **प्रतिज्ञाहानिः**=’स इदं सर्वमसृजते' ति विष्णोः स्रष्टृत्वप्रतिज्ञाहानिः स्यात् । कुतः । **अव्यतिरेकात्**=आकाशस्य सर्वशब्दार्थानतिरिक्तत्वात् । किंच ॥ **शब्देभ्यः**=’आत्मा वा इद' मित्यादिस्पष्टश्रुतिभ्यश्च ब्रह्मण एव मुख्यानुत्पत्तिः न त्वन्यस्येत्यवसीयते ॥ **सू ॥ यावद्विकारं तु विभागो लोकवत् ॥ ७ ॥** यावच्छब्दोऽवधारणे । यावद्विकारमित्यव्ययम् । तुशब्दश्चार्थे । तथा च यतः **यावद्विकारं**=विक्रियमाणमेव वस्तु **विभागः**=विभागशब्दितात्पशक्तिमत् न त्वन्यदिति नियमः सिद्धः । अतो **लोकवत्**=लोक इव । यथा लोके घटादौ विभक्तत्वाद्विकारित्वमङ्गीकृतं तथा आकाशादेरपि विभक्तत्वहेतुना विकारित्वं सिध्यति । तत एव सादित्वमपि सिद्ध्यतीत्यर्थः ॥ अत्र मते वियत्पदेन भूतावकाशौ तदभिमानिनौ चेति चतुष्टयमुच्यते ॥

इति सूत्रार्थचन्द्रिकायां वियदधिकरणम् ॥ १ ॥

णात् । तस्मात् वायुरपि जायत एव ॥ इति मातरिश्वाधिकरणम् ॥ २ ॥

अथ असंभवाधिकरणम् ॥ ३ ॥

सू ॥ असंभवस्तु सतोऽनुपपत्तेः ॥ ९ ॥

'सदेव सोम्येदमग्र आसी' दिति सद्रूपाद्ब्रह्मण आकाशादीनामुत्पत्तिरिति निरूपितम् । तदिह सर्वकारणस्य सतोऽपि ब्रह्मणः कुतश्चित्कारणादुत्पत्तिरस्ति न वेति संदेहे सति ब्रह्मणोऽप्युत्पत्तिरस्तीत्युच्यते । यथा कारणत्वेऽप्याका-

---

यद्यपि सर्वत्रापि ब्रह्मप्रकरणे संभृत्यधिकरणन्यायादुपासना विवक्षितास्त्येव । तथाप्यस्य-परत्वमात्रमनया भंग्योच्यते । बृहदारण्यके हि 'अनेन ह्येतत्सर्वं वेदे' त्यात्मविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय तदुपपादनार्थमात्मकार्यं वाय्वादिकं 'वायुश्चे' त्यादिना प्रदर्श्यते । अथ स्वर्गकामवाक्यानुसारेण 'को हि तद्वेद यद्यमुष्मिन् लोक' इत्यादिवाक्यवदिहापि प्रधानवाक्यानुसारेण गुणवाक्यस्य योजनीयत्वात् आत्मकार्यस्यैव वाय्वादेरमृतत्वकीर्तनं स्तुतिपरमवसीयते इति भावः ॥ इति मातरिश्वाधिकरणम् ॥ २ ॥

अथासंभवाधिकरणम् ॥ ३ ॥

तर्हि तद्वदेव 'स बाह्याभ्यंतरो ह्यजः' । 'नित्यं विभुं सर्वगतं सुसूक्ष्मम्' इत्यादौ ब्रह्मणोऽप्यजत्वनित्यत्वादिकीर्तनं स्तुतिपरं स्यात् इत्याशंकानिराकरणार्थमधिकरणान्तरम्—सू ॥ असंभवस्तु सतोऽनुपपत्तेः ॥ ९ ॥ कारणत्वसामान्यादाकाशादिवत् ब्रह्मणोऽप्युत्पत्तिरस्तीति पूर्वः पक्षः । ननु 'अग्र आसीदि' ति सृष्टेः प्राक् ब्रह्मणोऽवस्थानं

नयमणिमालायाम् अथ मातरिश्वाधिकरणम् ॥ २ ॥

सू ॥ एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥

सैषानस्तमितेति श्रुत्यैवान्तस्य वारणाद्वायोः । वायुर्नोत्पद्यत इति शंकायामेवमतिदेशः ॥ १३० ॥
तात्पर्यवत्प्रतिज्ञानुरोधतः स्यात्तदुत्पत्तिः । सैषानस्तमितेति स्तुतिः परमुपासनाशेषः ॥ १३१ ॥

इति मातरिश्वाधिकरणम् ॥ २ ॥

सूत्रार्थचन्द्रिकायाम् अथ मातरिश्वाधिकरणम् ॥ २ ॥

सू ॥ एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥

भगवत्पादमते, अत्रापि वायोरुत्पत्तिरस्ति न वेति **संदेहे** छान्दोग्ये न श्रूयते तैत्तिरीयके तु **'आकाशाद्वायुः' इति** श्रूयते । तथा च पूर्ववदनयोर्विरोधप्राप्तौ तत्परिहाराय वायोरुत्पत्तिर्गौणी वाच्या । 'सैषानस्तमिता देवता यद्वायु' **रिति** लयप्रतिषेधाच्च न वायोरुत्पत्तिरिति **पूर्वपक्षः । सिद्धान्तस्तु, एतेन**=आकाशस्योत्पत्तिमत्त्वव्याख्यानेन **वायुरप्या-**काशावच्छिन्नब्रह्मजन्यत्वेन व्याख्यातः । अन्यथा प्रतिज्ञाहान्यादिदोषापत्तेः । लयप्रतिषेधस्त्वापेक्षिकः स्तुतिपरः । पूर्वं वाय्वाकाशयोस्सामान्येनामृतत्वमभिधाय पुनश्च वायोः 'सैषानस्तमिते' ति लयप्रतिषेधाद्वायोरमृतत्वं **विवक्षितमित्य-**धिकाशंकानिराकरणार्थमिदमातिदेशिकमधिकरणान्तरमिति भावः ॥

श्रीकण्ठमते, नात्राधिकरणे पूर्वस्माद्वैलक्षण्यमिति वेद्यम् ॥

रामानुजमते, अस्य सूत्रस्य पूर्वाधिकरणशेषतया पूर्वस्मिन्नधिकरण एव व्याख्याततया च नात्र पुनस्तत्प्रपञ्चनावकाशः॥

आनन्दतीर्थमते, अविशिष्टमिदं शांकरमतात् । **एतेन**=पूर्वोक्तविभक्तत्वादिहेतुना । **मातरिश्वा**=मुख्यवायुः । **व्याख्यातः**=उत्पत्तिमत्त्वेनोक्त इत्यर्थः ॥

इति मातरिश्वाधिकरणम् ॥ २ ॥

---

(१) 'दुपासनाविवक्षास्त्येव' इति ख पाठः ।

शस्य। किं तु 'अग्र आसी'दिति श्रवणात् सर्वविकारेभ्यः पूर्वमस्योत्पत्तिः। किमस्य कारणमिति चेदसदेव। 'असद्वा इदमग्र आसीत्ततो वै सदजायत' इति श्रवणात्। ततस्तद्रूपं ब्रह्मापि जायत इति पूर्वपक्षः। सिद्धांतस्तु—न जायते ब्रह्मेति। कुतः। 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं' 'यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः' इति शिवस्य ब्रह्मण एवावधारणात्। तस्यासंभव एव। निषेधात्। तदन्यस्य त्वनुपपत्तेस्संभव इति। यथा ब्रह्म कारणत्वेन श्रूयते सर्वेषां तथा तस्यापि किंचित्कारणांतरं श्रूयते। 'असद्वा इदमग्र आसीत्ततो वै सदजायते'ति सतः कारणमसदिति चेत्। तदसत्। 'कथमसतस्सज्जायेते'ति निषेधात् सत एव सदुत्पत्तावात्माश्रयापत्तेः। ततः सतो ब्रह्मण एवासंभवोऽनुत्पत्तिः। तदन्यस्य सर्वस्य सर्वविज्ञानप्रतिज्ञानुपपत्तेः संभव उत्पत्तिरिति॥ इति असंभवाधिकरणम्॥ ३॥

श्रूयते तत्कथमुत्पत्तिमत्स्यात्? नेति ब्रूमः। 'अग्र आसी' दिति वियदादिभ्यः प्रागुत्पत्तिरुच्यते। 'रोहितो लोहितादासीत् धुन्धुस्तस्य सुतोऽभव' दित्यादावस्तेः उत्पत्तावपि प्रयोगदर्शनात्। कुतस्तस्योत्पत्तिरिति चेद्वाक्यान्तरप्राप्तादसतो भविष्यति। 'कथमसतस्सज्जायेते'ति वाक्यमाश्चर्यार्थत्वेन कथञ्चिद्योजनीयम्। तस्यापि कारणत्वेन कार्यतया कारणाकाङ्क्षायामसदन्तरं कारणं भविष्यति। कारणानवस्था तु अनादित्वान्न दोष इति। अत्र सिद्धान्तः—सतो ब्रह्मणः असंभवस्तु अनुत्पत्तिरेव। एकत्वावधारणात्। न च सहोत्पन्नवस्त्वंतरनिषेधपरं तत्। 'एकमेवाद्वितीय' मिति पदत्रयेण सर्वनिषेधात् 'यदा तम' इति मन्त्रेण प्रपञ्चसृष्टिप्राक्काले ब्रह्मव्यतिरिक्तस्य सत इवासतोऽपि साक्षादेव निषेधाच्च। 'कथमसत' इति वाक्यं चासतस्सकाशात् सत उत्पत्तिं साक्षान्निषेधति। न च तदाश्चर्यपरं योजनीयम्। 'स त्वेव सोम्येदमग्र आसी' दित्यग्रिमवाक्ये तुशब्देन पूर्वमसतः प्रतिषेधस्पष्टीकरणात्। सत एव सदुत्पत्तावात्माश्रयः स्पष्टः। सत्परंपराभ्युपगमे त्वप्रामाणिक्यनवस्था। कारणत्वस्य कार्यत्वाप्रयोजकत्वादाकाशादिदृष्टांतोपन्यासमात्रेण कार्यत्वकल्पनस्यातिप्रसंगावहत्वादिति। यद्यपि सौत्र 'मनुपपत्ते' रिति पदमसंभवहेतुपरत्वेन योजयितुं शक्यं तथापि तत्र हेतोरेकत्वावधारणादेः स्पष्टत्वात् ब्रह्मातिरिक्तानां परापरमायाप्रकृतीनां ब्रह्मवज्जगदुपादानत्वेन प्रसक्ताया अनुत्पत्तिशङ्काया निरसनीयत्वाच्च तन्निरासार्थत्वेन भाष्यकृता तत्पदं योजितम्। तदन्यस्य त्वनुपपत्तेस्संभव इति। अनुपपत्तिरप्यग्रे स्पष्टीकृता। 'सर्वविज्ञानप्रतिज्ञानुपपत्तेरिति॥

इत्यसंभवाधिकरणम्॥ ३॥

नयमणिमालायाम्

अथासंभवाधिकरणम्॥ ३॥

सू॥ असंभवस्तु सतोऽनुपपत्तेः॥ ९॥

एवं कारणभूतं सदपि व्योमादिवज्जननवत्स्यात्। भवति ततो वै सदजायतेति हि श्रवणमन्यत्र॥१३२॥

उत्पत्तिरेकमेवेत्यवधारणबाधिता तस्य। कथमसतस्सज्जायेतेति विरुद्धं तु तच्छ्रवणम्॥ १३३॥

इत्यसंभवाधिकरणम्॥ ३॥

---

(१) 'उत्पत्त्यादावपि' इति ख पाठः।

अथ तेजोऽधिकरणम् ॥ ४ ॥

सू ॥ तेजोऽतस्तथा ह्याह ॥ १० ॥

अत्र वाय्वादिकार्यं साक्षाद्ब्रह्मण उत्पद्यते स्वस्वपूर्वकारणाद्वेति संदेहे सति स्वस्वपूर्वकारणादिति पूर्वपक्षः । तथा हि 'आकाशाद्वायुरिति' श्रुतेर्वायुराकाशादेवोत्पद्यते न साक्षाद्ब्रह्मणः । तेजोऽपि तथा वायोरेव । तथा 'वायोरग्नि'-रित्याह श्रुतिः ॥

अथ तेजोऽधिकरणम् ॥ ४ ॥

एवं ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य प्रपञ्चस्य ब्रह्मकार्यत्वमविरोधेनोपपादितम् । अथ तत्कार्यत्वं साक्षादेव न तु परंपरयेत्येतदविरोधेनोपपादयितुमधिकरणम् ॥ सू ॥ तेजोऽतस्तथा ह्याह ॥ १० ॥ 'आत्मन आकाश' इत्यादिसृष्टिवाक्यगतानां पंचम्यंतानामाकाशादिशब्दानां महाभूततदन्तर्याम्यन्यतरपरत्वानवधारणात्संशयं दर्शयति —अत्रेति । आकाशाद्वायुरिति । श्रुतेरिति । आकाशशब्दस्य वियति तदंतर्यामिणि ब्रह्मणि च शक्तेरविशिष्टत्वेऽपि वियत्परत्वमेव युक्तम् । लौकिकवैदिककारणप्रसिद्ध्यतिशयानुग्रहात् 'आत्मन आकाश' इति तत्रैव प्रथमांतस्याकाशशब्दस्य वियत्परतायाः क्लृप्तत्वाच्चांतर्यामिणः कार्यत्वासंभवादिति भावः । तेजोऽपि तथा वायोरेवेति । उक्तन्यायादेव 'तत्तेजोऽसृजते' ति छांदोग्यवाक्यं परंपराकारणत्वविषयमिति न तद्विरोध इति भावः । ननु छांदोग्यश्रुतौ 'तत्तेज ऐक्षते' त्यत्र तेजश्शब्दस्यांतर्यामिपरत्वं वाच्यम् । ईक्षणलिंगात् । अतस्तैत्तिरीयकगतानामपि कारणपराणामाकाशादिशब्दानामंतर्यामिपरत्वं स्यादिति शङ्का-

---

सूत्रार्थचन्द्रिकायाम्

अथ असंभवाधिकरणम् ॥ ३ ॥

सू ॥ **असंभवस्तु सतोऽनुपपत्तेः** ॥ ९ ॥

भगवत्पादमते, पूर्वमसंभावितोत्पत्तिकयोर्वाय्वाकाशयोरुत्पत्तिरस्तीति श्रुतिबलादुक्तम् । तद्वद्ब्रह्मान्तराद्ब्रह्मोत्पत्तिः श्रुतिबलादस्त्विति दृष्टान्तसंगत्येदमारभ्यते—**असंभवस्त्विति**। अत्र 'न चास्य कश्चिज्जनिता न चाधिपः' इत्यादीनां ब्रह्मणो नित्यत्वप्रतिपादकश्रुतीनां 'त्वं जातो भवसि विश्वतोमुखः' इति श्रुत्या विरोधोऽस्ति न वेति **संदेहः** । विरोधोऽस्तीति **पूर्वपक्षः** । **सिद्धान्तस्तु, सतस्तु** सदात्मकस्य ब्रह्मण एव । **असंभवः**=उत्पत्त्यसंभवः । **कुतः** । **अनुपपत्तेः**=सत्सामान्यात्सत्सामान्यस्योत्पत्त्यनुपपत्तेः । विशेषस्यैव हि घटादेर्मृत्सामान्यजन्यत्वदर्शनात् । जन्मश्रुतिश्चौपाधिकविषया । अतो नित्यं ब्रह्मेत्यविरोधः ॥

श्रीकण्ठमते, यद्यपि पूर्वपक्षसिद्धान्तादिकं पूर्वस्मादविशिष्टम् । तथापि तदुपपादनप्रकारः परं भिद्यते—यथा—'सदेव सोम्येदमग्र आसीत्' इति सद्रूपाद्ब्रह्मण आकाशादीनामुत्पत्तिरिति निरूपितम् । सर्वकारणस्य सतोऽपि ब्रह्मणः कुतश्चिदुत्पत्तिरस्ति वा न वेति **संदेहः** । 'असद्वा इदमग्र आसीत् । ततो वै सदजायते' ति श्रवणात्सर्वविकारेभ्यः पूर्वमसतः कारणात्सद्रूपं ब्रह्मापि जायत इति **पूर्वपक्षः** । **सिद्धान्तस्तु,** 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं' 'यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः' इति शिवस्य ब्रह्मण एवावधारणात्तदा सर्वनिषेधादसतस्सजनिप्रतिषेधाच्च तस्यासंभव एव । तदन्यस्य तु अनुपपत्तेः संभवः इति । अत्र 'अनुपपत्ते' रित्येतत्तदन्यस्य संभवहेतुतया व्याख्यातमित्यपि पूर्वस्माद्विशेषः । ततो ब्रह्मण एवानुत्पत्तिस्तदन्यस्य सर्वविज्ञानप्रतिज्ञानुपपत्तेरुत्पत्तिरिति सूत्रार्थः फलितः ॥

रामानुजमते, अस्यापि सूत्रस्य पूर्वसूत्रवत्पूर्वाधिकरणशेषतयैव निवेशात्तत्रैव व्याख्याततया न पुनर्विवरणावकाशः । सूत्रार्थः परं श्रीकण्ठमतादविशिष्ट इति स्पष्टमेव ॥

आनन्दतीर्थमते, इदमप्यविशिष्टार्थमेव शांकरमतात् । तुशब्दोऽवधारणे । **सतः**=विष्णोः । **असंभवस्तु**=अनुत्पत्तिरेव । न 'ह्यसतः सदजायते' ति श्रुत्या असतस्सकाशादुत्पत्तिर्वाच्या । कुतः । **अनुपपत्तेः**=विष्णोरसदुत्पत्तरयोगादित्यर्थः ॥

इत्यसंभवाधिकरणम् ॥ ३ ॥

सू० ॥ आपः ॥ ११ ॥

'अग्नेराप' इति श्रुतेरापोऽप्यग्नेरेवेति ॥

सू० ॥ पृथिवी ॥ १२ ॥

'अद्भ्यः पृथिवी' ति श्रुतेरद्भ्य एव पृथिवी । अतो ब्रह्मण एव साक्षान्नोत्पद्यंते भूतानि ॥

सू० ॥ अधिकाररूपशब्दान्तरेभ्यः ॥ १३ ॥

छांदोग्येऽपि 'ता अन्नमसृजन्ते' त्यन्नशब्देन पृथिव्येवोच्यते । सर्वभूतसृष्ट्यधिकारात् 'यत्कृष्णं तदन्नस्ये' ति रूपविधानाच्च । ' अद्भ्यः पृथिवी' ति शब्दाच्च । अतः पृथिव्येवाद्भ्य उत्पद्यते । तदेवंन्यायेन ब्रह्म न सर्वेषां साक्षात्करणं किंतु परंपरयेति ॥

सिद्धान्त उच्यते-

सू० ॥ तदभिध्यानादेव तु तल्लिंगात्सः ॥ १४ ॥

ब्रह्मण एव तु साक्षात्सर्वभूतोत्पत्तिः । तथा हि-

'तस्माद्वा एतस्मादात्मन आकाशस्संभूत' इत्यारभ्य वाय्वादीनां पृथिव्यंतानां न पूर्वपूर्वकारणादुत्पत्तिरुच्यते । किं तु पूर्वपूर्वकारणादाकाशादिविशिष्टात् ब्रह्मण एवोत्तरोत्तरवाय्वादिकार्योत्पत्तिरुच्यते इति परमात्मा शिव एव

निराकरणार्थं सूत्रम्-सू ॥ आपः ॥ ११ ॥ 'अतस्तथा ह्याहे' ति पूर्वसूत्रादनुषङ्गः । आपोऽप्यग्नेरेवेति । छांदोग्येऽपि कारणपरतेजश्शब्दस्य पूर्वोक्त(१)युक्तिभिः भूतविशेषपरत्वमेव युक्तमीक्षणं तु प्रथमश्रुततेजश्शब्दानुसारेण 'तस्माद्यत्र क्व च शोचति स्वेदते वा पुरुषः तेजस एव तद्ध्यापो जायन्त ' इति वाक्यशेषदर्शनाच्च गौणं भविष्यतीति भावः । सू ॥ पृथिवी ॥ १२ ॥ अत्रापि पूर्ववदनुषंगः । यद्यपि पूर्वसूत्रोक्तन्यायेनैवाद्भ्य एव पृथिवीत्येतत्सिद्धं(२) तथापि छांदोग्ये 'ता अन्नमसृजन्ते' ति श्रवणात् 'तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं भवती' ति तद्वाक्यशेषाच्च तद्विरोधशंकां प्रसज्यैतदविरोधोपपादनस्यावसरदानायेदं सूत्रम् । तामेव प्रसक्तां शङ्कां निराकर्तुमुत्तरसूत्रम्-सू ॥ अधिकाररूपशब्दान्तरेभ्यः ॥ १३ ॥ यत्कृष्णं तदन्नस्येति रूपविधानाच्चेति । पृथिव्यामेव हि प्रायिकतया कृष्णं रूपं दृश्यते न व्रीहियवादिष्वदनीयेष्विति भावः । अतः पृथिव्येवाद्भ्य उत्पद्यत इति महाभूताधिकाररूपस्य प्रकरणस्य कृष्णरूपात्मकस्य लिंगस्य श्रुत्यंतरगतयथासंख्याम्नानरूपस्य स्थानप्रमाणस्य चेति प्रमाणत्रयस्यान्नश्रुतिवर्षणप्रयुक्तभूयिष्ठत्वलिंगरूपप्रमाणद्वयापेक्षया बलवत्त्वादिति भावः । सू ॥ तदभिध्यानादेव तु तल्लिङ्गात्सः ॥ १४ ॥ आकाशादिविशिष्टादिति । इदमाकाशाद्यभिमानिसदाशिवादिशरीरकत्वस्यापि वक्ष्यमाणस्योपलक्षणम् । शिव एवेति । अनेन सौत्र एवकारो भिन्नक्रम इति दर्शितम् । तेन प्रथमान्ताकाशादिपदोक्तोऽपि तत्तद्विशिष्टशिव एव । 'तदैक्षत बहु स्या' मिति तदभिध्यानात् । तस्य स्वरूपान्यथाभावरूपकार्यत्वासंभवेऽपि स्वविशेषणभूतधर्मान्यथाभावरूपकार्यत्वसंभवादिति सूच्यते । 'तदैक्षत बहु स्यां प्रजायेये' तिवदिति दृष्टांतो-

(१) 'युक्तिभ्यां' इति ख पाठः (२) 'त्येतदपि सिद्ध्यति' इति ख पाठः ।

साक्षात्सर्वभूतोत्पादकः 'तदैक्षत बहु स्यां प्रजायेये' तिवत्, 'तत्तेज ऐक्षत बहु स्यां प्रजायेयेति' 'ता आप ऐक्षन्त बह्वयः स्याम प्रजायेमहि' इति तदभिध्यानात्तल्लिंगात् ।

'सदाशिवश्शब्दमूर्तिः स्पर्शमूर्तिरथेश्वरः । रुद्रस्तेजोमयस्साक्षात् रसमूर्तिर्जनार्दनः । गंधमूर्तिश्चतुर्वक्त्रः इत्येताः पञ्च मूर्तयः' । इति वचनात् सदाशिवादिरूपात् शब्दाद्यात्मनो ब्रह्मणो वाय्वादिसंभवः । एते हि सदाशिवादयः पंचब्रह्मसंज्ञकाः पंचभूतात्मानः परब्रह्मणश्शरीरम् । पञ्चब्रह्मशरीरादेव परब्रह्मणः प्रपंचस्य सृष्ट्यादयः प्रवर्तन्ते । पंचभूततापन्नाश्चैते सदाशिवादयः परमात्मन उत्पद्यंते ।

ननु भूतानामेवात्रोत्पत्तिरुच्यते 'आकाशस्संभूत' इत्यादिना, सदाशिवादीनां न साक्षात्सृष्टिरुच्यत इति चेत्। उच्यत एव। श्रुत्यंतराध्याहारात्। तथाथर्वशिखायां 'ध्यायीतेशानं प्रध्यायितव्यं सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयंते सर्वाणि चेंद्रियाणि सह भूतैर्न कारणं कारणानां ध्याता कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरश्च शंभुराकाशमध्यग' इति ब्रह्मादीनामिन्द्रियाणां च भूतैस्सहोत्पत्तिः श्रूयते। कारणानामपि कारणत्वेन स शंभुः परमाकाशमध्ये ध्येयः श्रूयते । ततस्साक्षादेव ब्रह्मणस्तत्तत्कारणरूपात्तत्तत्कार्योत्पत्तिरिति निर्णयः ॥

इति तेजोऽधिकरणम् ॥ ४ ॥

पादानस्यायमभिप्रायः । इदं वाक्यं ब्रह्मणो यथा बहुभवनसंकल्पं ब्रवीति तथैव 'तत्तेज ऐक्षते' त्यादिवाक्यद्वयमपि ब्रवीति तेजस्सृष्टिमात्रेण तद्विषयबहुभवनानिवृत्तेरिति । अनेनैषा शंका व्यावर्त्यते । जडानामाकाशादीनामीक्षणासंभवेऽपि प्राथमिकतेजःश्रुत्यनुसारात् गौणमीक्षणमस्तु । तदभिमानिनां सदाशिवादीनां तत्संभवात् । आकाशादिपदानां तन्मात्रपर्यवसायित्वं वास्तु न शिवपर्यंतत्वम्। न च सदाशिवादीनामीक्षणमात्रसंभवेऽपि महाभूतरूपेण बहुभवनसंकल्पो न संभवतीति वाच्यम् । तेषां योगसिद्धानामिव भूतवशित्वेन सर्वशरीरकत्वोपपत्तेरिति । एवमभिध्यानस्य प्राक्प्रदर्शितबहुभवनसंकल्परूपत्वतत्सिद्धब्रह्मसाधारण्यसूचनार्थं 'तदभिध्याना' दिति 'तल्लिङ्गा' दिति च सौत्रतत्पदम् । एवं तत्पदद्वयं प्रयुञ्जानस्य सूत्रकारस्याशयस्थमेव सदाशिवादीनामाकाशाद्यभिमानित्वं 'सदाशिवश्शब्दमूर्त्ति' रित्यादिना दर्शितम् । एवं तेजःप्रभृतिसृष्टेर्बहुभवनसंकल्परूपत्वसिद्धौ तुल्यन्यायतया वाय्वादिसृष्टेरपि तत्पूर्वकत्वं सिद्ध्यतीति ब्रह्मलिंगस्य व्यापकत्वमनुसंधेयम् । 'ननु भूताना' मित्यादिशंकापरिहारौ स्पष्टौ । श्रुत्यंतराध्याहारादिति । श्रुत्यंतरश्रुतगुणोपसंहारादित्यर्थः । अथर्वशिखावचनानि प्रथमाध्याये व्याख्यातानि ॥

इति तेजोऽधिकरणम् ॥ ४ ॥

नयमणिमालायाम् अथ तेजोऽधिकरणम् ॥ ४ ॥

सू ॥ तेजोऽतस्तथा ह्याह ॥ १० ॥ आपः ॥ ११ ॥ पृथिवी ॥ १२ ॥ अधिकाररूपशब्दान्तरेभ्यः॥१३॥ तदभिध्यानादेव तु तल्लिङ्गात्सः ॥ १४ ॥

---

(१) 'यं' इति (२) 'तमेव' इति च ख पाठः । (३)' न तु ब्रह्म' इति ख पाठः । (४) 'एवं तत्पदं' इति ख पाठः ।

वाय्वादिकार्यमाकाशादिभ्यो जायते तथा श्रवणात् । व्यवहितकार्यत्वपरं सर्वस्य ब्रह्मकार्यताश्रवणम् ॥१३४॥
तदभिध्यानाल्लिंगात्क्रमेण वाय्वादिकार्यमपि । आकाशादिशरीरात्सदाशिवाद्यात्मनश्शिवादेव ॥ १३५ ॥

इति तेजोऽधिकरणम् ॥ ४ ॥

सूत्रार्थचन्द्रिकायाम् अथ तेजोऽधिकरणम् ॥ ४ ॥

सू ॥ तेजोऽतस्तथा ह्याह ॥ १० ॥ आपः ॥ ११ ॥ पृथिवी ॥ १२ ॥ अधिकाररूपशब्दान्तरेभ्यः ॥ १३ ॥ तदभिध्यानादेव तु तल्लिङ्गात्सः ॥ १४ ॥

भगवत्पादमते, पूर्वत्र सामान्यात्सामान्योत्पत्तिर्माभूत् । इह सामान्याद्ब्रह्मणो विशेषस्य तेजस उत्पत्तिरस्त्विति प्रत्युदाहरणसंगत्येदमाह—**तेजोऽत इत्यादि** । 'वायोरग्निः' इति तेजसो वायुजन्यत्वप्रतिपादकतैत्तिरीयश्रुतेः 'तत्तेजोऽसृजते'ति तेजसो ब्रह्मजन्यत्वप्रतिपादकच्छान्दोग्यश्रुत्या विरोधोऽस्ति न वेति **संदेहः** । विरोधोऽस्तीति **पूर्वपक्षः । सिद्धान्तस्तु,** वायोरपि ब्रह्मकार्यत्वेन तेजः प्रत्युपादानत्वासंभवाद्ब्रह्ममात्रजन्यत्वं तेजस इत्यविरोध इत्येकदेशिमतम् । स्वमते तु, **तेजः**=अग्निः । **अतः**=अस्माद्वायोर्जायते । **हि**=यतः । **तथा**=वायुजन्यत्वम् । 'वायोरग्नि' रिति श्रुति**राह** । वायोर्ब्रह्मजन्यत्वेन वायुभावापन्नब्रह्मजन्यत्वस्य छान्दोग्यश्रुत्यर्थस्यैव 'वायोरग्नि' रिति श्रुत्यर्थत्वेनैकार्थत्वादविरोध इति ॥

इति भगवत्पादमते तेजोऽधिकरणम् ॥ ४ ॥

अथ अबधिकरणम् ॥ ५ ॥

सू ॥ आपः ॥ ११ ॥ 'अतस्तथा ह्याहे' त्यनुवर्तते । 'अग्नेरापः' इति श्रुतेः 'तदपोऽसृजते' त्यपां ब्रह्मजन्यत्वश्रुत्या विरोधोऽस्ति न वेति **संदेहः** । विरोधोऽस्तीति **पूर्वपक्षः** । अपामग्निदाह्यत्वान्न तज्जन्यत्वमित्यविरोध इत्येकदेशिमतम् । **परमसिद्धान्तस्तु, आपः अत**स्तेजसो जायन्ते । **हि**=यस्मात् । **तथा**=तेजोजन्यत्वं 'अग्नेराप' इति श्रुति**राह** । अतः पूर्ववत्तेजोभावापन्नब्रह्मजन्यत्वेनानयोरैकार्थ्यान्न विरोध इति ॥ **इत्यबधिकरणम् ॥ ५ ॥**

अथ पृथिव्यधिकरणम् ॥ ६ ॥

सू ॥ पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥ १२ ॥ अत्र 'अद्भ्यः पृथिवी' इति पृथिव्या अब्जन्यत्वश्रुतेः 'ता अन्नमसृजन्त' इत्यन्नस्याब्जन्यत्वश्रुत्या विरोधोऽस्ति न वेति **संदेहः** । अन्नशब्दस्योदनादौ प्रसिद्धत्वेन पृथिवीवाचकत्वाभावाद्विरोध इति **पूर्वपक्षः । सिद्धान्तस्तु, पृथिव्ये**वात्रान्नशब्देनोच्यते । न ओदनादि । कुतः । **अधिकाररूपशब्दान्तरेभ्यः**=‘तत्तेजोऽसृजते' ति महाभूतोत्पत्त्यधिकारात् 'यत्कृष्णं तदन्नस्य' इति पृथिवीत्वज्ञापककृष्णरूपस्य श्रवणात् 'अद्भ्यः पृथिवी' इति पृथिव्या एव तज्जन्यत्वप्रतिपादकशब्दान्तरस्य सत्त्वाच्च । अतोऽनयोरैकार्थ्येनैकवाक्यत्वादविरोध इति सिद्धम् । **इति पृथिव्यधिकरणम् ॥ ६ ॥ अथ तदभिध्यानाधिकरणम ॥ ७ ॥**

इत्थमुत्पत्तिक्रमेण महाभूतश्रुतीनामविरोधः प्रत्यपादि । अधुना तानि भूतान्याश्रित्यान्यद्विचार्यते–**सू ॥ तदभिध्यानादेव तु तल्लिङ्गात्सः ॥ १३ ॥** अत्र ब्रह्मणस्सर्वसृष्टिकर्तृत्वप्रतिपादकश्रुतेः भूतानां भौतिकस्रष्टृत्वप्रतिपादकश्रुत्या विरोधोऽस्ति न वेति **संदेहः** । 'आकाशाद्वायु' रित्यादिना भूतानां स्वस्वकार्योत्पत्तौ स्वातन्त्र्यश्रवणात्तत्प्रतिपादकश्रुत्या विरोधोऽस्तीति **पूर्वपक्षः । सिद्धान्तस्तु, स एव** परमेश्वरः **तत्त**त्कार्यगोचरेक्षणात्मका**भिध्याना**देवेक्षिता भूताधिष्ठाता तत्तत्कार्यं सृजति । कस्मात् । **तल्लिंगात्**=तस्य परमात्मनस्सर्वनियन्तृत्वरूपलिङ्गस्य 'यः पृथिव्यां तिष्ठन्, इत्यादिषु श्रुतत्वात् । अतो भूतानां परमेश्वराधिष्ठितानामेव स्रष्टृत्वप्रतिपादकत्वेनानयोरेकवाक्यत्वादविरोध इति ॥

इति भगवत्पादमते तदभिध्यानाधिकरणम् ॥ ७ ॥

श्रीकण्ठमते, 'पृथिवी' इति योगविभागो दृश्यते । 'तेजोऽत' इत्यादिसूत्रपञ्चकात्मकमिदमेकमधिकरणम् । 'तेजोऽत' इत्यादिकं सूत्रचतुष्टयं पूर्वपक्षतया व्याख्याय 'तदभिध्याना' दिति सूत्रं सिद्धान्ततया व्याख्यातम् । अत्राधिकरणे वाय्वादिकार्यं साक्षाद्ब्रह्मण उत्पद्यते वा उत स्वस्वपूर्वकारणाद्वा इति **संदेहे** स्वस्वपूर्वकारणादेवेति **पूर्वपक्ष**प्रतिपादकतया सूत्राणि त्रीणि व्याख्याय अन्नशब्दस्य पृथिवीपरत्वं 'अधिकाररूपे'ति सूत्रेण च व्यवस्थाप्य 'तदभिध्यानादेवे'ति सूत्रेण तत्तच्छरीरः परमात्मैव तेषां कारणमिति सिद्धान्तितम् । अत्र मते यद्यपि संदेहपूर्वपक्षादिकं पूर्वस्मादविशिष्टम् । तथापि एतानि सूत्राणि पृथक्पृथग्भिन्नाधिकरणतया व्याख्यातानि शांकरमते, अत्र तु एकीकृत्यैकाधिकरण्यमुपपादितमिति विशेषः ॥

अत्र 'तदभिध्यनादेवे'ति सूत्रस्य 'तत्तेज ऐक्षत'ता आप ऐक्षन्ते' त्यादिबहुभवनसंकल्परूपात्परमात्मलिङ्गात्परमात्मन एव तत्तच्छरीरकात्सर्वोत्पत्तिरित्यर्थः । सदाशिवादिपंचभूतात्मकपंचब्रह्मशरीरकात्परमशिवादेव तत्तत्कारणरूपात्तत्तत्कार्योत्पत्तिरित्यर्थाधिक्यमपि निरूपितमिति रामानुजभाष्याद्विशेषः ॥

अथ पारंपर्याधिकरणम् ॥ ५ ॥

सू० ॥ पारंपर्येण क्रमोऽत उपपद्यते च ॥ १५ ॥

इह पूर्वाधिकरणे निरूपितः सृष्टिक्रम उपपद्यते न वेति संदेहः ॥

नोपपद्यत इति पूर्वः पक्षः । तथा हि–मुण्डकोपनिषदि 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥'

इति प्राणादीनां वियदादिभ्यः पूर्वमुत्पत्तिः श्रूयते । अथर्वशिखायां च 'ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भूतैः' इति सहोत्प-

---

अथ पारंपर्याधिकरणम् ॥ ५ ॥

पारम्पर्येण क्रमोऽत उपपद्यते च ॥ १५ ॥ संगतिपूर्वकं संशयं दर्शयति–**इहेति** । आकाशशरीरकाद्ब्रह्मणो वाय्वाद्युत्पत्तिसमर्थनादाकाशादिक्रमेण सृष्टिरित्यपि पूर्वाधिकरणेन सिद्धम् । तदुपपद्यते न वेत्युक्तक्रमक्रमांतराक्रमश्रुतिविरोधसमाधानसंभवासंभवाभ्यां संशये सति न संभवति तत्समाधानमिति पूर्वः पक्षः । तथाहि–अविचलस्तावदाकाशादिक्रमः पूर्वाधिकरणसिद्धः । मुण्डकोपनिषन्मंत्रे प्राणान्तःकरणेंद्रियभूतानां क्रमो विवक्षित इति ज्ञायते । 'खं वायुर्ज्योति' रित्याद्युत्तरार्धे तत्क्रमप्रत्यभिज्ञारूपाल्लिंगादिति । सोऽप्यविचल एव । अक्रमस्तु अथर्वशिखायां तु सहश्रुत्यैव स्पष्टीकृतः । अतः

रामानुजमते तु अत्रास्ति कश्चिद्विशेषश्श्रीकण्ठमतात् । यथा–श्रीकण्ठमते अधिकरणद्वयतया विभक्तमुपरितनं सूत्रत्रयमप्यत्र 'तदभिध्यानादेवे'ति सिद्धान्तसूत्रोपष्टंभकतया तेजोऽधिकरणशेषत्वेनान्तर्भावितमिति तानि त्रीणि सूत्राण्यत्रैव व्याख्यायन्ते–यथा–**सू ॥ विपर्ययेण तु क्रमोऽत उपपद्यते च** ॥ १५ ॥ 'आकाशाद्वायुः' 'वायोरग्नि' रिति पारंपर्यक्रमा**द्विपर्ययेण** 'एतस्माज्जायते प्राण' इति सर्वेषां ब्रह्मानन्तर्यरूपो यः **क्रमः** स च **अतः**=तत्तच्छरीरकाद्ब्रह्मणस्सृष्टे**रुपपद्यते** ॥

सू ॥ अन्तरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात् ॥ १६ ॥ **अन्तरा**=भूतप्राणयोरन्तराले **इन्द्रियग्राममनसी** क्रमेणोत्पद्येते । कुतः । **तल्लिंगात्**='खं वायुर्ज्योति' रिति श्रुतिक्रमप्रत्यभिज्ञानरूपात्तल्लिंगात् । **इति चेत्**=अत इदमपि पारंपर्यक्रमपरमिति चेत् । **न** । **अविशेषात्**='एतस्माज्जायते' इत्यस्य प्राणादिपृथिव्यन्तेषु सर्वेषु प्रत्येकमन्वयाविशेषात् । अतस्तेजःप्रभृतीनामपि साक्षात्परमात्मैव कारणम् ॥

'तत्तेज एक्षते' त्यादितेजःप्रभृतिशब्दाः लोके तत्तद्वस्तुवाचिनः ब्रह्मणि भाक्ता इत्यत्राह–**सू ॥ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोऽभाक्तस्तद्भावभावित्वात् ॥ १७ ॥ चराचरवस्तुसंबन्धी तत्तद्वाची शब्दो** ब्रह्मणि **अभाक्तः** मुख्य एव । 'अनेन जीवेने' ति सर्वस्य वस्तुनो नामरूपभाक्त्वस्यात्मतया **ब्रह्मानुप्रवेशभावभावित्वात्** । **इत्यर्थः** ॥

इति रामानुजमते तेजोऽधिकरणम् ॥

आनन्दतीर्थमते, अत्रापि शांकरमतवदेवाधिकरणविभागः । सूत्रार्थवर्णने परमस्ति किंचिदिव वैलक्षण्यम् । यथा–**तेजोऽतस्तथा ह्याह ॥ १० ॥ तेजः**=तेजोभूतम् । **अतः**=ब्रह्मण एवोत्पद्यते न वायोः । कुतः । **हि**=यस्मात् । **'तत्तेज'** इति श्रुतिः । **तथा**=उक्तप्रकारेण **आह**=वक्ति । तस्मादित्यर्थः ॥ **इति तेजोऽधिकरणम् ॥ ४ ॥**

सू ॥ आपः ॥ ११ ॥ अत्रापि 'अतस्तथा ह्याहे' त्यनुवर्तते । सूत्रार्थः पूर्वसूत्रवत् । अत्र **श्रुतिः**=ब्रह्मैवेदमिति श्रुतिरित्यर्थः ॥

इत्यबधिकरणम् ॥ ५ ॥

सू ॥ पृथिव्यधिकाररूपशब्दान्तरादिभ्यः ॥ १२ ॥ अत्र मते 'शब्दान्तरादिभ्य' इति पाठः । इदमधिकरणमप्यविशिष्टं शांकरमतात् । **पृथिवी**=पृथिव्येव 'ता अन्नमसृजन्ते' तिश्रुतिस्थान्नशब्देनोच्यते न प्रसिद्धान्नम् । कुतः । **अधिकार**शब्दितभूतप्रकरणात् **रूप**शब्दोक्तकृष्णरूपस्य च श्रवणात् 'पृथिवी वा अन्न' मिति **श्रुतिविशेषा**च्चेत्यर्थः । अपौरुषेयत्वेनादोषस्य वाक्यस्य नाप्रामाण्यमित्यादिरादिशब्दार्थः ॥ **इति पृथिव्यधिकरणम् ॥ ६ ॥**

सू ॥ तदभिध्यानादेव तु तल्लिङ्गात्सः ॥ १३ ॥ अत्र जगत्स्रष्टुर्विष्णोस्संहर्तृत्वमस्ति वा न वेति **संदेहे** 'प्राणानां ग्रन्थिरसि रुद्रो माविशान्तकः ।' इति श्रुत्या रुद्रस्यैवान्तकत्वश्रवणात्पितुर्लोके संहारकत्वायोगाच्च न विष्णुस्संहर्ता किं तु रुद्र एवेति **पूर्वपक्षः** । **सिद्धान्तस्तु** विष्णुरेव संहर्ता न रुद्रः इति । तुशब्दोऽवधारणे । अभिध्यानशब्देनेच्छोच्यते । तच्छब्देन विष्णुर्गृह्यते । तथा च **स** विष्णुरेव संहारकर्ता न रुद्रः । कुतः । **तदभिध्यानात्**='तदभिध्याना' दिति श्रुत्युक्तादभिध्यानरूपशब्दज्ञापितसंजिहीर्षाविशेषितादनादिबन्धसंहारेच्छारूपा**त्तल्लिंगादेव** । एवकारस्तु भाष्यरीत्या किमु श्रुतिभ्य इति कैमुत्यसूचकः । निर्दोषे विष्णौ लौकिकपितृन्यायो नावतरतीति भावः ॥ **इति तदभिध्यानाधिकरणम् ॥ ७ ॥**

स्तिर्ब्रह्मादीनां भूतेन्द्रियाणां चाम्नायते। अत आकाशादेः पूर्वोक्तसृष्टिक्रमो नोपपद्यत इत्युच्यते ॥

सिद्धान्तस्तु–उपपन्नः पूर्वोक्तसृष्टिक्रमः । 'अन्नमयं हि सोम्य मन आपोमयः प्राणः तेजोमयी वाक्' इति प्राणादीनां भौतिकत्वश्रवणात् भूतेष्वन्तर्भावान्न पृथक्क्रमापेक्षा । ब्रह्मादीनां सहोत्पत्तिस्तु भूतैस्तद्रूपत्वात् तेष्वन्तर्भावात्। ततः पूर्वोक्तक्रमे न विरोधः ॥

॥ सू० ॥ अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॥१६॥

प्राणभूतानामिन्द्रियग्राममनसी क्रमेणान्तरा उत्पद्येते इति हीदं वाक्यं प्रतिपादयति। 'खं वायुर्ज्योतिः' इत्यादौ श्रुत्यन्तरसिद्धक्रमप्रत्यभिज्ञानरूपाल्लिङ्गात्। तत इदमपि पारंपर्यक्रमपरमिति चेत्–न, 'एतस्माज्जायते' इत्यस्य प्राणादिपृथिव्यन्तेषु सर्वेषु प्रत्येकमन्वयाविशेषात् । अतः सर्वेषामीश्वर एव कारणम् । तथा । च पौराणिकी फणितिः—

'शक्त्यादि च पृथिव्यन्तं शिवतत्त्वसमुद्भवम् ।
तेनैकेन तु तद्व्याप्तं मृदा कुम्भादिकं यथा ॥' इति ।

क्रमसद्भावोऽपि सर्वस्य शिवतत्त्वादुत्पत्तिमभिधत्ते। अतः सर्वकारणं ब्रह्मेति समीचीनम् ॥ इति पारंपर्याधिकरणम् ॥ ५ ॥

कथं विरोधसमाधानमित्येवं प्राप्ते सिद्धांतः–'आत्मन आकाश' इत्यादिसृज्यपारंपर्येण यः क्रमस्स उपपद्यते। अतः पूर्वसूत्रोदितात्तदभिध्यानात् । पारमेश्वरबहुभवनसंकल्परूपाभिध्यानानुवर्तनावगमितं हि पूर्वपूर्वभूतशरीरकस्यैव परमेश्वरस्योत्तरोत्तरभूतस्रष्टृत्वमित्येतन्न विचालयितुं शक्यम् । सति च प्रबलेन तेन विरोधे सहश्रुतिर्भूताद्युत्पत्तेस्तदभिमानिब्रह्माद्युत्पत्तिसाहित्यमात्रपरतया योजनीया । मुण्डकोपनिषन्मंत्रपाठक्रमश्चोपेक्षणीयः। किं च । पाठक्रमेणापेक्षितक्रमः कल्पनीयः । न चात्र क्रमापेक्षास्ति । भौतिकानां प्राणमनइंद्रियाणां भूतानन्तर्यरूपस्य क्रमान्तरस्यार्थान्निर्ज्ञातत्वादर्थपाठयोरर्थस्य प्रबलत्वादिति । अनेन सूत्रं भाष्यं च व्याख्यातम् । विवक्षितभूतक्रमप्रत्यभिज्ञानलिंगात् तत्सहपठितप्राणादिक्रमो विवक्षितोऽवसीयत इति शंकानिराकरणार्थं सूत्रम्–**सू. ॥ अन्तरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात् ॥ १६ ॥** क्रमेण मनइंद्रियक्रमेण। अन्तरा प्राणभूतमध्ये । ननु छांदोग्यतैत्तिरीययोः पूर्वपूर्वविशिष्टस्य ब्रह्मणः उत्तरोत्तरभूतकारणत्वं पाठक्रमावगतमाकाशाद्युत्पत्तिक्रममन्तरेण नोपपद्यत इति चेत् स तत्र विवक्षितोऽस्तु नाम। इह तु नास्ति तस्य विवक्षायां प्रमाणम् । पाठक्रमात्प्रतीयमानस्येव प्रत्यभिज्ञानलिंगात्प्रतीयमानस्यापि तस्याविवक्षैव युक्ता । अर्थतः क्रमांतरस्य निर्ज्ञातत्वादित्याशंक्याह–इदमपीति । छंदोगादिवाक्यवदिदमपि क्रमपरमेव । मनःप्रभृतीनां परिगणनस्य प्रयोजनांतराभावादिति भावः । अन्वयाविशेषादिति। तथा च प्राणस्येव मनःप्रभृतीनामपि कीर्तनं ब्रह्मकार्यत्वप्रतिपादनार्थमित्यसिद्धः प्रयोजनांतराभाव इति भावः। 'अतस्सर्वेषा' मित्यादिरेतत्सूत्रार्थोपसंहारार्थः। अधिकरणार्थोपसंहारस्त्वर्थसिद्धः। इति पारम्पर्याधिकरणम् ॥ ५ ॥

नयमणिमालायाम् अथ पारम्पर्याधिकरणम् ॥ ५ ॥

सू ॥ पारंपर्येण क्रमोऽत उपपद्यते च ॥ १५ ॥ अन्तरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्ना-विशेषात् ॥ १६ ॥

प्राणस्यादावथान्तःकरणखगणयोरन्ततो भूतपंक्तेः संप्रज्ञातक्रमाया यजुषि समुदयो मुण्डके प्रत्यपादि ।
आथर्वण्यां शिखायां युगपदभिदधे जन्म भूतेंद्रियाणामित्थं वैमत्यसत्वे कथमनुमनुषे सृष्टिमाकाशमुख्याम् ॥ १३६ ॥
प्राणाद्याः प्रागयन्ते न कथमपि जनिं भौतिका भूतवर्गात् तस्मादाकाशमुख्यः क्रम इति घटते न क्रमः प्राणमुख्यः ।
सर्वेषां ब्रह्मजत्वं विदधति च मनौ न क्रमार्थत्वशंका ब्रह्मादीनां शिखायां सहजनिरुदिता क्ष्मादिभिर्नेंद्रियाणाम् ॥१३७॥

इति पारम्पर्याधिकरणम् ॥ ५ ॥

सूत्रार्थचंद्रिकायाम् अथ पारंपर्याधिकरणम् ॥ ५ ॥

सू ॥ पारंपर्येण तु क्रमोऽत उपपद्यते च ॥ १५ ॥ अन्तराविज्ञानमनसी क्रमेण तल्लिंगादिति चेन्ना-विशेषात् ॥ १६ ॥

भगवत्पादमते, पूर्वाधिकरणैर्भूतानामुत्पत्तिक्रमे चिन्तिते लयक्रमस्य बुद्धिस्थत्वात्सोऽत्र प्रसंगाद्विचार्यत इत्याह-**विपर्ययेण क्रमोऽत उपपद्यते च** ॥१६॥ इह भूतानां श्रुतोत्पत्तिक्रमेणैव लयक्रमो वा, उत सोपानपरंपरारूढस्य व्युत्क्रमेणावरोहणवद्व्युत्क्रमेणैव लयक्रमो वेति **संदेहः** । कल्प्यापेक्षया क्लृप्तस्य लघुत्वात् श्रुतोत्पत्तिक्रमेणैवेति **पूर्वपक्षः । सिद्धान्तस्तु, अतः**=सृष्टिक्रमात् । **विपर्ययेण तु**=विपरीतक्रमेणैव । **क्रमः**=लयक्रमः । **उपपद्यते च**=युज्यते । स्वकारणे कार्याणां लयदर्शनादिति भावः । इतरथा सति कार्ये कारणनाशः स्यात् । तच्चानिष्टमित्यर्थः ॥

इति भगवत्पादमते विपर्ययाधिकरणम् ॥ ८ ॥

अथान्तराविज्ञानाधिकरणम् ॥ ९ ॥

सू ॥ अन्तरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात् ॥ १६ ॥ इह भूतोत्पत्तिलयक्रमविचारसमप्रयोजनत्वात्करणोत्पत्तिक्रमं विचारयति-पूर्वोक्तक्रमः करणोत्पत्तिक्रमेण विरुध्यते न वेति **संदेहः** ।' एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी ' इति मुण्डकवाक्योक्तेन भूतानामात्मनश्चान्तराले इन्द्रियबुद्धिमनांसि तेभ्यश्च भूतानि जायन्ते इत्यनेन क्रमेण पूर्वोक्तक्रमो विरुध्यते । कुतः । तत्सृष्टिगमकात्लिंगादिति चेत् । इति **पूर्वपक्षः । सिद्धान्तस्तु, नाविशेषात्** । इंद्रियबुद्धिमनसां भौतिकत्वेन भूतोत्पत्तिक्रमादिन्द्रियाद्युत्पत्तिक्रमस्याविशेषात् येन क्रमेण भूतोत्पत्तिस्तेनैव क्रमेण भौतिकोत्पत्तिरित्यतो न विरुद्ध्यत इति ।' एतस्माज्जायते' इत्यादिश्रुतिश्च सर्वेषामात्मनस्सकाशादुत्पत्तिमात्रं ब्रूते न क्रममिति भावः ।' अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक् ' इत्यादिकं वाक्यं करणानां भौतिकत्वे लिंगमिति बोध्यम् ॥

॥ इति भगवत्पादमते अन्तराविज्ञानाधिकरणम् ॥ ९ ॥

श्रीकण्ठमते, इदं सूत्रद्वयमपि पारंपर्याधिकरणमिति व्यपदिश्यते । इह पूर्वाधिकरणे निरूपित आकाशादिसृष्टिक्रम उपपद्यते न वेति **संदेहः** । उक्तक्रमस्य क्रमान्तरश्रुत्यक्रमश्रुतिभ्यां विरोधान्नोपपद्यत इति **पूर्वपक्षः । सिद्धान्तस्तु** 'अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक्' इति प्राणादीनां भौतिकत्वश्रवणेन तेष्वन्तर्भावात् क्रमान्तरप्रतिपादिन्या मुण्डकोपनिषदुक्ताया'एतस्माज्जायते प्राण'इत्यादिश्रुतेरुपेक्षणीयत्वात् ब्रह्मादीनां च भूताभिमानित्वेन तेष्वन्तर्भावात्सहश्रुतेब्रह्माद्युत्पत्तिसाहित्यमात्रपरतया योजनीयत्वाच्च । **अतः**=पूर्वसूत्रोदितात्तदभिध्यानाच्च ताभ्यां विरोधाभावात्पूर्वपूर्वभूतशरीरकस्यैव परमेश्वरस्योत्तरोत्तरभूतस्रष्टृत्वमित्युक्तक्रम उपपद्यत इति ॥

ननु, मुण्डकवाक्ये विवक्षितभूतक्रमप्रत्यभिज्ञानात्तत्सहपठितप्राणादिक्रमो विवक्षितोऽस्त्वित्याशंक्य परिहरति-**अन्तरा विज्ञानेत्यादिना । क्रमेण**=मनइंद्रियक्रमेण । **अन्तरा**=प्राणभूतमध्ये । **विज्ञानमनसी**=इन्द्रियमनसी उत्पद्येते । कुतः । **तल्लिंगात्**='खं वायुर्ज्योति'रित्यादौ श्रुत्यन्तरसिद्धक्रमप्रत्यभिज्ञानरूपाल्लिंगात् । **इति चेत्**=इदं मुण्डकवाक्यमपि क्रमपरमिति चेत् । **न । अविशेषात्**='एतस्माज्जायते' इत्यस्य प्राणादिपृथिव्यन्तेषु सर्वेषु प्रत्येकमन्वयाविशेषात् । अतः सर्वकारणं ब्रह्मेति सिद्धम् । अस्मिन्मते'पारंपर्येण तु क्रम'इति सूत्रपाठे विशेषः ॥

रामानुजमते, अनयोस्सूत्रयोरुपरितनसूत्रस्य च 'तदभिध्यानादेवे'ति पूर्वाधिकरणसिद्धान्तसूत्रशेषत्वेन पूर्वाधिकरणान्तर्भावितत्तया पूर्वत्र तद्विवरणं कृतमित्यतो नात्र पुनर्विवरणावकाश इति वेद्यम् । सूत्रपाठस्तु शांकरमतवदेवात्र मते ॥

आनन्दतीर्थमते, अधिकरणरचनासंदेहपूर्वपक्षसिद्धान्तानां शांकरमतसाधारण्येऽपि सूत्रार्थनिरूपणे परमस्ति किंचिद्व वैलक्षण्यमिति तन्मात्रं निरूप्यते-**सू ॥ विपर्ययेण तु क्रमोऽत उपपद्यते च ॥ १५ ॥** तुशब्दोऽवधारणे । अत इत्यावर्तते । **अतः**=उत्पत्तिक्रमात् **विपर्ययेण**=वैपरीत्येन । **क्रमः**=लयक्रमः न तूत्पत्तिक्रमेण । कुतः । **अतस्तु**=व्युत्क्रमाद्विलयश्चैवे'तिमाल्लवेयश्रुतिविशेषादेव । किंच । **उपपद्यते च**=युज्यते चायं व्युत्क्रमः । कुतः । पूर्वोत्पन्नानामुत्तरोत्पन्नेभ्यो भगवत्सन्निधानकृताधिकसामर्थ्येन तेषामधिककालावस्थानस्य युक्तत्वादित्यर्थः ॥

इति विपर्ययाधिकरणम् ॥ ८ ॥

अथ चराचरव्यपाश्रयाधिकरणम् ॥ ६ ॥

॥सू०॥चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशोऽभाक्तस्तद्भावभावित्वात्॥१७॥

पूर्वत्राकाशादिशब्दवाच्यत्वं ब्रह्मणः प्रतिपादितम् । तदिह विचार्यते—चेतनाचेतनचराचरवस्तुसंबन्धी तद्वाचिशब्दो ब्रह्मणि मुख्यो न वा ? इति संदेहे न मुख्य इति वदामः–अन्यवाचकशब्दस्य मुख्यतयान्यत्र वृत्त्यभावात् । तथा हि–'आदित्यो यूपः' 'यजमानः प्रस्तरः' इत्यादिषु यूपादेरादित्यादिशब्दवाच्यत्वं सारूप्यादिगुणसंबन्धादेव दृश्यते, न मुख्यत्वेन । अत्रापि 'तत्तेज ऐक्षत' इत्यादिषु तेजःप्रभृतीनामचेतनानां चेतनधर्मेक्षितृत्वायोगात् तच्छब्दैस्तदाश्रितं चेतनं ब्रह्म लक्ष्यते, 'मञ्चाः क्रोशन्ती'त्यादिवत् । तस्मादाकाशादिशब्दवाच्यत्वं ब्रह्मणि तदाश्रये गौणमिति ॥

एवं प्राप्ते ब्रूमः–चराचरवस्तुसंबन्धी तद्व्यपदेशशब्दो ब्रह्मणि न भाक्तः, किंतु मुख्य एव । 'तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति । अण्डजं जीवजमुद्भिज्जमिति । सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि'इति सर्वस्य वस्तुनो नामरूपविभागाय तत्तदात्मतया ब्रह्मणोऽनुप्रवेशभावभावितत्वात् । यूपादीनामादित्यादिशब्दवाच्य-

---

अथ चराचरव्यपाश्रयाधिकरणम् ॥ ६ ॥

सू० ॥ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोऽभाक्तस्तद्भावभावित्वात् ॥ १७ ॥

संगतिपूर्वकं संशयं दर्शयति–पूर्वत्रेति । 'तेजोऽत' इत्यधिकरणे सृष्टिवाक्यगताकाशादिशब्दप्रतिपाद्यत्वं ब्रह्मण उक्तम् । तन्मुख्यममुख्यं वेति व्युत्पत्तिसंभवासंभवाभ्यां संशयः । आकाशादिशब्दानां व्युत्पत्तिग्रहस्य भूतविशेषादिपर्यवसितत्वात्ततोऽन्यस्य ब्रह्मणस्तत्प्रतिपाद्यत्वममुख्यमिति पूर्वः पक्षः । सिद्धांतस्तु चराचरसंबन्धी तद्वाचकत्वेन लोकावधृतो यस्तद्व्यपदेशः ब्रह्मणि प्रवर्तमानश्शब्दस्स ब्रह्मणि अभाक्तः अमुख्यो न भवति । किं तु मुख्य एव । कुतः । तद्भावभावित्वात् तस्य ब्रह्मणो यो भावः चराचर-

---

अत्राधिकरणे उत्तरसूत्रमप्यन्तर्भाव्यैकाधिकरण्येनाधिकरणरचनास्मिन्मते । अत्र विज्ञानतत्त्वमनस्तत्त्वयोरपि पूर्वोक्तः सृष्टिक्रमाद्विपरीतक्रमेण लयक्रमो वा सृष्टिक्रमानुसारेण लयक्रमो वेति **संदेहः** । **विज्ञानमनसी**=विज्ञानतत्त्वमनस्तत्त्वे । **अन्तरा**=विना । **क्रमेण**=पूर्वोक्तक्रमेणान्येषां लय उपपद्यते । कुतः । **तल्लिंगात्**='मनसश्च विज्ञानम्''यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान'इति श्रुत्युक्तात्क्रमादुत्पन्नयोः क्रमाल्लयाख्यलिंगा**दिति चेत्** इति **पूर्वपक्षः** । **सिद्धान्तस्तु, न** तथा । कुतः । **अविशेषात्**=विज्ञानमनस्तत्त्वयोर्यथोत्पत्ति लय इत्यत्र विशेषप्रमाणाभावात् । 'विज्ञानमनसोः क्रमेणे'ति वाच्ये 'अन्तरे'त्युक्तिस्तद्द्वयादन्येषां व्युत्क्रमेण लय इत्यर्थानुमतिं सूचयितुम् । उक्तं लिंगमेव तत्र मानमित्याह–**सू ॥ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्** ॥ १६ ॥ **तद्व्यपदेशस्तु**='मनसश्च विज्ञान'मिति मनोविज्ञानशब्दरूपः श्रौतव्यवहारस्तु । **चराचरव्यपाश्रयः स्यात्**=इन्द्रियतद्वृत्तितत्त्वविषयस्संभावितः । तथापि सः **भाक्तः**=इन्द्रियमनस्तत्त्वरूपमनश्शब्दार्थे तद्वृत्तिविज्ञानतत्त्वरूपविज्ञानविषय एव न तु तत्त्वविषय इत्यर्थः । भागवाचिनो भक्तशब्दात्तस्येदमित्यणि भाक्तशब्दो निष्पन्नो भागविषय इत्यर्थक इति यावत् । कुतः । **तद्भावभावित्वात्**=तदिति पदस्यात्र तंत्रेण निर्देशः । तस्मिन् चराचरशब्दितचेतनाचेतनविषये तद्भावेन मनोभावेन आलोचनेनेति यावत् । **भावित्वात्**=वृत्तिरूपज्ञानस्योत्पद्यमानत्वादित्यर्थः । तथा च' मनसो विज्ञान'मित्युक्तिर्वस्तुनि मनोभावेन वृत्तेर्जायमानत्वान्मनोरूपेंद्रियतज्जन्यवृत्तिविषया न तत्त्वविषयेति न तल्लिंगमिति भावः ॥ **इत्यानन्दतीर्थमतेऽन्तराविज्ञानाधिकरणम्** ॥ ९ ॥

त्वमनुपपत्त्या न मुख्यम् । मन्त्रादिषु पुरुषाणामवस्थामात्रत्वात् तेषामपि तच्छब्दवाच्यत्वं न मुख्यम् । इहात्मतया प्रपञ्चानुप्रवेशाद्ब्रह्मणस्तच्छब्दवाच्यत्वं मुख्यमेव, यथाऽऽत्मनो ब्राह्मणादिशरीरानुप्रविष्टस्य ब्राह्मणादिशब्दवाच्यत्वं मुख्यम् । अन्यथा 'अष्टवर्षं ब्राह्मणमुपनयीत' इत्यादिषूपनयनसंस्कारादेः शरीरमात्रपर्यवसानादात्मनः संस्कार्यत्वाभावप्रसङ्गात् । ततो 'यस्यैते चत्वारिंशत्संस्कारा अष्टौ चात्मगुणाः स ब्रह्मणः सायुज्यम्' इत्यादिरात्मनः संस्कारवतः फलश्रुतिरपार्था भवेत् । 'ब्राह्मणो यजेत' इत्यादिविधिवैयर्थ्यं च भवेत् । तस्मात् सकलचराचरवस्तुशरीरप्रविष्टस्य ब्रह्मणस्तच्छब्दवाच्यत्वं मुख्यमेव ॥

इति चराचरव्यपाश्रयाधिकरणम् ॥ ६ ॥

वस्तुष्वात्मतया सद्भावस्तेनैव हि हेतुना भवति । न ह्यादित्यशब्दो यूप इव तदात्मतामनपेक्ष्य ब्रह्मणि चराचरवस्तुवाचिशब्दः प्रवर्तते । 'अनेन जीवेने' त्यादिश्रुत्या ब्रह्मणश्चराचरवस्त्वात्मतया तदनुप्रवेशहेतुकतयैव चराचरवस्तुसंबधिनामरूपव्याकरणस्य ब्रह्मपर्यंततायाः प्रतिपादनात् । तद्वाचिशब्दस्य तदात्मतामपेक्ष्यान्यत्र प्रवृत्तौ तु मुख्यत्वमेव भवति । शरीरवाचिशब्दानां शरीरिपर्यंतत्वस्य व्युत्पत्तिसिद्धत्वात् । अत एव 'ब्राह्मणमुपनयीत' 'ब्राह्मणो यजेत' इत्यादिश्रुतिषु ब्राह्मणादिशब्दानामात्मपर्यंतत्वमिति । निगदव्याख्यानमस्य भाष्यम् ॥ इति चराचरव्यपाश्रयाधिकरणम् ॥ ६ ॥

नयमणिमालायाम्

अथ चराचरव्यपाश्रयाधिकरणम् ॥ ६ ॥

सू ॥ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोऽभाक्तस्तद्भावभावित्वात् ॥ १७ ॥

तेजःप्रभृतिपदैस्तद्व्यपदेशो भाक्त इत्युचितम् । यजमानः प्रस्तर इत्यादिनयाद्वाच्यभिन्नत्वात् ॥ १३८ ॥

भाक्तो न नामरूपव्याकरणं हि स्वपर्ययनम् । श्रुत्योदितं ततस्तद्वाच्यं तत्सर्वशब्दानाम् ॥ १३९ ॥

इति चराचरव्यपाश्रयाधिकरणम् ॥ ६ ॥

सूत्रार्थचन्द्रिकायाम् ।

अथ चराचरव्यपाश्रयाधिकरणम् ॥ ६ ॥

सू ॥ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोऽभाक्तस्तद्भावभावित्वात् ॥ १७ ॥

भगवत्पादमते, अत्र 'न जीवो म्रियते' इति जीवनित्यत्वशास्त्रस्य जीवोत्पत्तिनाशनिमित्तकजातेष्ट्यादिशास्त्रेण विरोधोऽस्ति न वेति **संदेहः** । देवदत्तो जातो मृतश्चेति लौकिकव्यपदेशानुगृहीतजातकर्मादिशास्त्रेण विरोधोऽस्तीति **पूर्वपक्षः** । **सिद्धान्तस्तु, तद्व्यपदेशः**=योऽयं लौकिकस्तयोर्जन्ममरणयोर्व्यपदेशः सः । **चराचरव्यपाश्रयः**=स्थावरजङ्गमदेहविषयो मुख्यः स्यात् जीवे तु भाक्तः । कुतः । जन्ममरणव्यपदेशस्य **तद्भावभावित्वात्**=देहोत्पत्तिविनाशान्वयव्यतिरेकानुविधायित्वादित्यर्थः । देहप्रादुर्भावाद्यपेक्षयैव जातकर्मादिविधानमिति न तेन शास्त्रेण जीवनित्यत्वशास्त्रस्य विरोध इति भावः ॥

श्रीकण्ठमते, पूर्वत्राकाशादिशब्दवाच्यत्वं ब्रह्मणः प्रतिपादितम् । तदिह विचार्यते—चेतनाचेतनचराचरवस्तुसंबन्धी तद्वाचिशब्दो ब्रह्मणि मुख्यो न वेति **संदेहः** । अन्यवाचकशब्दस्य मुख्यतयान्यत्र वृत्त्यभावाद्गौण इति **पूर्वपक्षः** । **सिद्धान्तस्तु,** चराचरवस्तुसंबन्धी तद्व्यपदेशशब्दो ब्रह्मणि न भाक्तः किं तु मुख्य एव । 'अनेन जीवेने' त्यादिना सर्वस्य वस्तुनो नामरूपविभागाय तत्तदात्मतया ब्रह्मणोऽनुप्रवेशभावभावितत्वात् । तस्मात्सकलचराचरवस्तुशरीरप्रविष्टस्य ब्रह्मणस्तच्छब्दवाच्यत्वं मुख्यमेव ॥ इति ॥

रामानुजमते, अस्यापि सूत्रस्य पूर्वं तेजोऽधिकरणान्तर्भूततया तत्रैव व्याख्यातत्वेन नात्र तत्प्रपंचितमिति बोध्यम् ॥

आनन्दतीर्थमते, इदं सूत्रं पूर्वस्मिन्नन्तराविज्ञानाधिकरणेऽन्तर्भूतं तत्रैव व्याख्यातं चेत्यतो नात्र पुनः प्रपञ्चितमित्यवधेयम् ॥

इति चराचरव्यपाश्रयाधिकरणम् ॥ ६ ॥

अथ आत्माधिकरणम् ॥ ७ ॥

॥ सू० ॥ नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १८ ॥

पूर्वत्राकाशादीनां ब्रह्मणः साक्षादुत्पत्तिरभिहिता । जीवोऽपि तन्न्यायेन ब्रह्मणः समुत्पद्यते न वेति संदेहः ॥

समुत्पद्यत इति पूर्वः पक्षः । 'यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः' 'एकमेवाद्वितीयम्' इत्यादिश्रुतेः प्राक्सृष्टेर्ब्रह्मैकत्वावधारणात्, सदसतोर्निषेधाच्च । अतः सृष्टिकाले ब्रह्मण उत्पद्यत एव जीवः । विस्फुलिङ्ग-दृष्टान्तोऽपि जीवोत्पत्त्यनुगुणः श्रूयते 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवैतस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एवात्मानो व्युच्चरन्ति' इति । तस्माद्यथाग्नेर्विस्फुलिङ्गा जायन्ते तथा ब्रह्मण आत्मानो जायन्ते ॥

इति प्राप्ते ब्रूमः—आत्मा न जायते । 'न जायते म्रियते वा विपश्चित्' इति श्रुतेः, 'नित्यो नित्यानां चेतनश्चेतनानाम्' 'ज्ञाज्ञौ द्वावजावीशानीशौ' इत्यादि-श्रुतिभ्यः नित्यत्वावगतेश्च । सृष्टेः प्राग्ब्रह्मणोऽवधारणं तदाकृतिभूतस्य तस्य चाचिद्वस्तुनश्च नामरूपव्यवहाराभावात्, न जीवादिस्वरूपासत्तया । विस्फुलिङ्ग-श्रुतिश्च तेषां नामरूपसमुन्मेषाभिप्राया, न जन्मपरा । अन्यथा कृतनाशादिदो-षप्रसङ्गात् । तस्माद्ब्रह्मणो न जायत एव जीवः ॥

अथ आत्माधिकरणम् ॥ ७ ॥

सू ॥ नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः ॥१८॥ आकाशादीनां स्वरूपान्यथाभावरूपोत्पत्तौ प्रतिपादितायां तद्वज्जीवस्यापि तथाभूतोत्पत्तिरस्ति न वेति श्रुतिविप्रतिपत्त्या संशये सति पूर्वपक्षः—सृष्टेः प्रागेकत्वावधारणं सदसदात्मकसकलवस्तुनिषेधश्चेति लिंगाभ्यां 'सर्व एत आत्मानो व्युच्चरंती'ति श्रुतेश्च तस्यापि तथाभूतोत्पत्तिरस्ति । तदनुत्पत्त्यादिश्रुतिस्तु आकाशामृतत्वादिश्रुतिवदन्यथा नेयेति । अत्र सिद्धान्तः—जीवो नोत्पद्यते । 'न जायते म्रियते वे' त्यादिश्रुतेः ताभ्यः 'नित्यो नित्याना' मित्यादिश्रुतिभ्योऽवगतान्नित्यत्व-लिंगाच्च । उत्पत्तिश्रुतिस्तु तत्तच्छरीरोपाधिकतत्तदवच्छिन्नभोक्तृत्वानुगुणज्ञानविका-सोपाधिका । अनेकव्यापकत्वावधारणादिकं च नामरूपसमुन्मेषाभावाभिप्रायं योज्यम् । स्वरूपान्यथाभावरूपोत्पत्त्यंगीकारे तदनित्यत्वावश्यंभावेन 'ब्रह्मविदाप्नोति पर' मित्या-दिप्रधानफलवाक्यविरोधापत्तेरिति । भाष्ये 'अचिद्वस्तुन' इति मा(१)याकार्यत्वापन्नवस्त्वभि-प्रायं मायाद्यचिदाकारपरिणामिचिच्छक्तिरूपवस्त्वभिप्रायं वा ॥ इत्यात्माधिकरणम् ॥७॥

नयमणिमालायाम्

अथ आत्माधिकरणम् ॥ ७ ॥

सू ॥ नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १८ ॥

प्रागेकत्वश्रवणाद्ब्रह्मण उत्पद्यते जीवः । श्रवणादपि च यथाग्नेः क्षुद्रा इति जन्मनस्तेषाम् ॥१४०॥

नैवं तन्नित्यत्वाम्नानात्कृतको न दोषाच्च । श्रवणे तु नामरूपव्याकरणाभावभावाभ्याम् ॥ १४१ ॥

इति आत्माधिकरणम् ॥ ७ ॥

(१) 'मायाकालादिनित्यवस्त्वभिप्रायम् । इत्यात्माधिकरणम्' इति-ख-पाठः ।

अथ ज्ञाधिकरणम् ॥ ८ ॥

॥ सू० ॥ ज्ञोऽत एव ॥ १९ ॥

पूर्वत्र नित्यतया जीवः सिद्धः। पुनरत्रास्य स्वाभाविकं ज्ञानमस्ति न वेति सन्दिह्यते ॥

एवं सति पूर्वपक्षः–जीवस्य स्वाभाविकं ज्ञानधर्मित्वं नास्तीति। 'ज्ञाज्ञौ द्वौ' इति जीवस्याज्ञत्वमेव हि श्रूयते। तस्माद्ज्ञ एवासौ चैतन्यमात्ररूपः किंतु

अथ ज्ञाधिकरणम् ॥ ८ ॥

सू० ॥ ज्ञोऽत एव ॥ १९ ॥ जीवस्यानुत्पत्तिः स्थापिता[1]। तत्प्रसंगादन्यानपि जीवधर्मान्निरूपयितुमापादपरिसमाप्तेरधिकरणानि। इह तावदागंतुकज्ञानधर्मो जीवः उत स्वाभाविकज्ञानधर्म इति विचार्यते। तत्र श्रुतिविप्रतिपत्तेस्संशये सति पूर्वः पक्षः–परिणामिनित्यधर्मज्ञानान्यथाभावमाश्रित्य हि पूर्वाधिकरणे जीवोत्पत्तिश्रुतिविरोधसमाधानं विविक्षितम। तन्नोपपद्यते। धर्मज्ञानस्यागन्तुकत्वात् 'ज्ञाज्ञौ द्वा'वित्यादिश्रुत्या जीवस्याज्ञत्वमौत्सर्गिकधर्मं वदंत्या सुषुप्तौ ज्ञानाभावानुभवेन 'न प्रेत्य संज्ञास्ती' ति तदनुसारिश्रुत्यंतरेण चानुगृहीतया तस्यागंतुकत्वावधारणात् तेन 'यो विज्ञाने तिष्ठन्नि' त्यादिश्रुतेः जीवस्वरूपे संदेहविपर्यासयोरदर्शनाच्च। जीवस्य स्वप्रकाशचैतन्यस्वरूपत्वेऽपि असौ स्वमात्रप्रकाशरूप इत्यहमिदं जानामीति जीवाश्रयत्वेनानुभूयमानं ज्ञानमनित्यमेव।

सूत्रार्थचन्द्रिकायाम्।

अथ आत्माधिकरणम् ॥ ७ ॥

सू ॥ नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १८ ॥

भगवत्पादमते, देहोत्पत्तिनाशयोस्सतोर्जीवस्य जन्मनाशाभावेऽपि कल्पाद्यन्तयोर्जीवस्य जन्मनाशौ किं न स्याता-मित्याशंक्याह—**नात्माश्रुतेरिति** ॥ अत्र अविकृतस्यैव ब्रह्मणो जीवभावेन प्रवेशवाक्यस्य 'सर्व एत आत्मनो व्युच्चरन्ति' इति परस्मादात्मनो जीवोत्पत्तिवाक्येन विरोधोऽस्ति न वेति संदेहः। विरोधोऽस्तीति **पूर्वःपक्षः**। **सिद्धान्तस्तु, आत्मा**=जीवः। **न**=नोत्पद्यते। कुतः। **अश्रुतेः**=उत्पत्तिप्रकरणेषु जीवोत्पत्तेरश्रुतेः। **ताभ्यः**='स वा एष महानज आत्मा' 'अजो नित्यः' इत्यादिश्रुतिभ्यः। **नित्यत्वाच्च**=जीवस्य नित्यत्वावगमाच्चेत्यर्थः ॥ **औपाधिकजन्मालंबनं** जीवजनिवाक्यमिति न तेन प्रवेशवाक्यस्य विरोध इति भावः ॥

श्रीकण्ठमते, पूर्वत्र ब्रह्मण आकाशादीनामुत्पत्तिरभिहिता। तन्न्यायेनात्र जीवो ब्रह्मणस्समुत्पद्यते न वेति **संदेहः**। **पूर्वपक्षसिद्धान्तौ** यद्यपि शांकरमतादविशिष्टौ। तथापि सूत्रार्थवर्णनं भिद्यते। तथा च 'यदा तमः' 'एकमेवाद्वितीयम्' इत्यादिश्रुतेस्सृष्टेः प्राग्ब्रह्मैकत्वावधारणात्सदसतोर्निषेधात् 'यथाग्ने' रित्यादिजीवोत्पत्त्यनुगुणविस्फुलिंगादिदृष्टान्तोपपादनाच्च ब्रह्मण आत्मानो जायन्त इति **पूर्वपक्षे प्राप्ते सिद्धान्तः—आत्मा न** जायते। कुतः। **श्रुतेः**='न जायते म्रियते वा विपश्चित्' इति श्रुतेः, **ताभ्यः**='नित्यो नित्यानां' 'ज्ञाज्ञौ द्वौ' इत्यादिश्रुतिभ्यः। **नित्यत्वाच्च**=नित्यत्वावगतेश्च। **सृष्टेः** प्रागेकत्वावधारणं तदाकृतिभूतस्य तस्याचिद्वस्तुनश्च नामरूपव्यवहाराभावाभिप्रायं न स्वरूपासत्तापरम्। विस्फुलिंगश्रुतिश्च नामरूपसमुन्मेषाभिप्राया न जन्मपरा। तस्माद्ब्रह्मणो न जायत एव जीव इति ॥

रामानुजमते,संदेहपूर्वपक्षादिकं श्रीकण्ठमतादविशिष्टमेव। पूर्वपक्षे परम् एकविज्ञानप्रतिज्ञादेः 'तोयेन जीवान्विससर्ज भूम्याम्''प्रजापतिः प्रजा असृजत' इत्यादिसृष्टिवचनाच्च' इति तदुपष्टंभकयुक्तिरधिकतयोपन्यस्तेति विशेषः।अन्यदविशिष्टम्॥

आनन्दतीर्थमते, अत्र भूतदेवतावच्चेतनत्वादिसाम्यात्परमात्मा देहनाशाद्यलयवान्वा न वेति **संदेहः**। 'स इदं सर्वं विलाप्यान्तस्तमसि विलीन' इति श्रुतेर्लयवानेवेति **पूर्वपक्षः**। **सिद्धान्तस्तु,** परमात्मा न विलीयत एव। कुतः। **अश्रुतेः**=तल्लयस्याश्रवणात्। विलीनश्रुतिस्त्वपिहितपरेति भावः। किंच। **ताभ्यः**='स नित्यो निर्गुण' इत्यादिश्रुतिभ्यः। **नित्यत्वाच्च**=विष्णोर्नित्यत्वावगमाच्च न तस्य नाश इति ॥ **इति सूत्रार्थचन्द्रिकायामात्माधिकरणम् ॥ ७ ॥**

---

(१) 'निरूपिता' इति ख. पाठः।

मायाशक्त्यवच्छेदादवासशरीरकरणादिरयं घटोऽयं पटोऽयं मनुष्योऽहं देवोऽहमिति कल्पिताहंकारबद्धः संसरतीति संसारदशायां ज्ञानात् जीवस्य स्वतो ज्ञातृत्वं नास्त्येव, अन्यथास्य कुतो मुक्तिरिति ॥

एवं प्राप्ते ब्रूमः—ज्ञातैवायमात्मा। 'अथ यो वेदेदं जिघ्राणीति स आत्मा....मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके' 'मनोऽस्य दैवं चक्षुः' इत्यादिश्रुतेर्धर्मभूतं ज्ञानमेवास्य मनः। अतः स्वत एवायं ज्ञाता। यदुक्तं मायाशक्तिसंबन्धात् संसारदशायां ज्ञातृत्वमस्येति, तत्सत्यम्। मायाशक्तिकबलितस्वाभाविकज्ञानशक्तिविलासोऽयं प्राकृतमनःसंबन्धात् भोक्ता सुखदुःखयोर्ज्ञाता शरीराहंकारमात्रविश्रान्तः संसरति हि जीवः। यदा पुनरस्य ब्रह्मज्ञानोपासनाभ्यासात् मलत्रयसंबन्धोऽपैति, तदासौ ब्रह्मसदृशोऽभिव्यक्तनैजनिरतिशयज्ञानधर्मो मुक्त इत्युच्यते ॥

किंच—'प्राणारामं मनआनन्दम्' इति ब्रह्मणो निरतिशयात्मानन्दविषयं मनः स्वाभाविकं करणमवगम्यते। तत्सदृशगुणत्वादपगतसंसारस्य जीवस्य स्वरूपानन्दानुभवसाधनं मनोरूपमन्तःकरणमनपेक्षितबाह्यकरणमस्तीति गम्यते।

तेन चानित्यज्ञानेन ज्ञानवत्त्वमस्य मायादिसंबन्धात् संसरतः कार्यकरणवत एव। 'अथ यो वेदेदं जिघ्राणी' त्यादिश्रुतिराघ्राणादिवेदनाश्रयत्वस्य न विशेषणतया जीवलक्षणत्वपरा किं तु उपलक्षणतया। आघ्राणाद्यन्वयव्यतिरेकानुविधायिनस्तस्य वेदनस्य यावदात्मभावित्वाभावात्। 'मनसैतान्कामान्' इति श्रुतिस्तु मुक्तौ ज्ञानकरणानुवृत्तिपरा न ज्ञाननित्यत्वे प्रमाणमिति। सिद्धांतस्तु, आत्मा ज्ञः ज्ञातृस्वभावः। अत एव श्रुतेरेव। तथाहि—'अथ यो वेदेदं जिघ्राणीति स आत्मा' 'गन्धाय घ्राण' मित्यादि श्रूयते। प्रजापतिविद्यायां 'मघवन्मर्त्यं वा इदं शरीरमात्तं मृत्युना तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठान' मित्यादिना शरीरातिरिक्ततया तदधिष्ठातृतया च प्रतिज्ञातस्यात्मनः [1]घ्राणजन्यगंधादिवेदनं लक्षणत्वेन प्रतिपादयदिदं वाक्यं विशेषणतयैव तत्तथात्वेन प्रतिपादयति नोपलक्षणतया। उपलक्ष्यतावच्छेदकस्य रूपान्तरस्यानिर्ज्ञातत्वात् वेदने घ्राणादिजन्यगन्धादिवृत्तिपरिणामरूपत्वस्य परमात्मातिव्याप्तिपरिहारार्थस्योपलक्षणत्वेऽपि तदुपलक्षितस्य वेदनस्य नित्यतया विशेषणत्वसंभवाच्च। तस्मादिदं वाक्यमात्मनो ज्ञातृस्वभावत्वे प्रमाणम्। तथा 'मनसैतान्कामान्पश्यन्रमत' इत्यादि श्रूयते। इदमपि तत्र प्रमाणम्। ब्राह्मलौकिकभोगवस्तुदर्शनरूपज्ञानपरिणामापेक्षिततयाव[2]श्यांगीकर्त्तव्यस्याविकारात्मव्यतिरिक्तस्य तत्परिणामिद्रव्यस्यैव करणत्वविवक्षया मनसेति निर्देशोपपत्तौ मुक्तावनुवर्तमानस्यान्यस्य करणस्य कल्पनायां गौरवात् 'ज्ञाज्ञा' वित्यादिश्रुतिः संसारदशायां जीवस्य सार्वज्ञ्यानभिव्यक्तिपरतयोपपद्यते। सुषुप्तिदशायां 'न किंचिदवेदिष' मिति ज्ञानाभावानुभवस्तु विषयविशेषावच्छिन्नज्ञानपरिणामाभावविषयः। 'न प्रेत्य संज्ञास्ती' ति वाक्यमपि तद्विषयम्। यतस्तदनंतरमत्रैव 'मा भगवानमूमुहन्न प्रेत्य संज्ञास्ती'ति मैत्रेयीप्रश्ने 'न वा अरे मोहं ब्रवीमि यद्वैतन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टु-

---

(१) "जिघ्राणीतिजन्य" इति ख. पाठः। (२) 'वश्यांगीकर्तव्यस्य तत्परिणामिद्रव्यस्यैव' इति ख. पाठः।

'ज्ञाज्ञौ' इति जीवस्याज्ञत्वं किंचिज्ज्ञत्वमेव । असंसारिणः परमेश्वरस्य तु सर्वज्ञत्वमुच्यते । अतः संसारे किंचिज्ज्ञत्वं मुक्तौ सर्वज्ञत्वमिति ज्ञातैवात्मा ॥

इति ज्ञाधिकरणम् ॥ ८ ॥

द्दष्टेर्विपरिलोपो विद्यते अविनाशित्वा' दिति याज्ञवल्क्यस्योत्तरेण तद्वाक्यं सत्ये धर्मज्ञाने कारणाधीनतत्परिणामाभावविषयतया व्याख्यातम् । यत्तु मायादिबद्धस्य ज्ञातृत्वमिति सत्यं मायादिबद्धस्य ज्ञातृत्वं तत्तु किञ्चिद्ज्ञत्वरूपं ज्ञातृत्वं, मुक्तस्य तु मलमायाकर्मबन्धापायात् ब्रह्मसादृश्यं प्राप्तस्याभिव्यक्तनिरतिशयज्ञानस्य सर्वज्ञत्वरूपं(१) ज्ञातृत्वमिति विशेषः । इहेतरद्भाष्यमतिरोहितार्थम् ॥ इति ज्ञाधिकरणम् ॥ ८ ॥

नयमणिमालायाम्

अथ ज्ञाधिकरणम् ॥ ८ ॥

सू ॥ ज्ञोऽत एव ॥ १९ ॥

अज्ञः स्वभावतः स्यात् जीवो ज्ञाज्ञाविति श्रवणात् । संसारदशायां तु ज्ञातृत्वस्फूर्तिरध्यासात् ॥ १४२ ॥

मनसैतानिति मुक्तावप्यस्य ज्ञातृताश्रवणात् । ज्ञातृत्वं स्वाभाविकमज्ञत्वोक्तिस्त्वसार्वज्ञ्यात् ॥ १४३ ॥

इति ज्ञाधिकरणम् ॥ ८ ॥

सूत्रार्थचन्द्रिकायाम् ।

अथ ज्ञाधिकरणम् ॥ ८ ॥

सू ॥ ज्ञोऽत एव ॥ १९ ॥

भगवत्पादमते, अत्र 'आत्मैवास्य ज्योतिः' इत्यादिस्वयंज्योतिष्ट्वश्रुतेः 'पश्यंश्चक्षु' रित्याद्यागन्तुकज्ञानवत्त्वश्रुत्या विरोधोऽस्ति न वेति **संदेहः** । अस्तीति **पूर्वः पक्षः** । **सिद्धान्तस्तु,** जीवो **ज्ञः**=स्वयंज्योतिःस्वरूपः । कुतः । **अत एव**=अनुत्पत्तिमत्त्वादेवेत्यर्थः । 'पश्यंश्चक्षु' रित्यादिश्रुतिरागन्तुकवृत्त्यभिप्रायेति न तया स्वयंज्योतिष्ट्वश्रुतेर्विरोध इति भावः ॥

श्रीकण्ठमते, पूर्वं नित्यतया साधितस्य जीवस्यात्राधिकरणे स्वाभाविकं ज्ञानधर्मित्वमस्ति न वेति **संदेहः** । ज्ञाज्ञौ द्वा' वित्यादिषु जीवस्याज्ञत्वमौत्सर्गिकं श्रूयते । सुषुप्तिदशायां 'न किंचिदवेदिष' मिति ज्ञानाभावोऽनुभूयते । जीवस्य स्वप्रकाशचैतन्यस्वरूपत्वेऽपि असौ स्वमात्रप्रकाशरूप इत्यहमिदं जानामीति जीवाश्रयत्वेनानुभूयमानं ज्ञानमनित्यमिति गम्यते । मायादिसंबन्धात्संसरतोऽस्य तेन चानित्यज्ञानेन ज्ञानवत्त्वादस्यागन्तुकज्ञानधर्मित्वमेव न स्वाभाविकज्ञानधर्मित्वमिति **पूर्वपक्षः** । **सिद्धान्तस्तु,** आत्मा **ज्ञः**=स्वाभाविकज्ञानधर्मी । कुतः । **अत एव**=श्रुतेरेव । तथाहि–'अथ यो वेदेदं जिघ्राणीति स आत्मा' मनसैतान्कामान्पश्यन्रमते' 'मनोऽस्य दैवं चक्षुः' 'इत्यादि श्रूयते । अतः धर्मभूतं ज्ञानमेवास्य मनः । अतः स्वत एवायं ज्ञाता । 'ज्ञाज्ञौ द्वा' विति श्रुतिस्संसारदशायां सार्वज्ञ्यानभिव्यक्तिपरा । सुषुप्तिदशायां ज्ञानाभावानुभवस्तु विषयविशेषावच्छिन्नज्ञानपरिणामाभावविषयः । मायादिबद्धस्य ज्ञातृत्वं किंचिज्ज्ञत्वरूपं मुक्तस्य तु मलमायाद्यपगमादभिव्यक्तनिरतिशयज्ञानस्य सर्वज्ञत्वरूपमिति च विशेषः । इति ॥

रामानुजमते, अस्य सूत्रस्योत्तराधिकरणसूत्रैस्सहैकीकृत्यात्माधिकरणत्वेन व्यपदिष्टत्वादुत्तराधिकरण एव व्याख्येयता समुचितेत्यतः नेह प्रपञ्च्यते ॥

आनन्दतीर्थमते, एवमधिभूताधिदैवब्रह्मविषयश्रुत्यविरोधमभिधायाधुनापादपरिसमाप्ति जीवविषयश्रुत्यविरोधमाह—**ज्ञोऽत एव ॥ १८ ॥** इदमधिकरणमनन्यमतसाधारणेन **युक्तेश्चे**त्यधिकसूत्रपाठेन युक्ततया सूत्रद्वयात्मकमिति विशेषः । अत्र जीवः परमेश्वरादुत्पद्यते न वेति **संदेहः** । 'नित्यो नित्याना' मिति श्रुत्या जीवस्य नित्यत्वावगमान्नोत्पद्यत इति **पूर्वपक्षः** । **सिद्धान्तस्तु,** जानातीति **ज्ञः** जीवः उत्पद्यते । अत एवेत्यावर्तते । **अत एव**=प्रकृतात्मन एव । कुतः । **अत एव**='अविनष्टा एवोत्पद्यन्त' इति श्रुतेरेवेत्यर्थः ॥

सू ॥ युक्तेश्च ॥ १९ ॥ अविनशिनोऽनादेरपि जीवस्य पराधीनविशेषलाभरूपोत्पत्तिर्युज्यते । 'वृद्धो जातो युवा जात' इत्याद्यबाधितव्यवहारादिति भावः ॥ **इति सूत्रार्थचन्द्रिकायां ज्ञाधिकरणम् ॥ ८ ॥**

---

(१) सर्वज्ञत्वमेव न त्वज्ञत्वमिति इति ख. पाठः ।

अथोत्क्रान्त्यधिकरणम् ॥ ९ ॥

॥ सू ॥ उत्क्रान्तिगत्यागतीनाम् ॥ २० ॥

पूर्वत्र ज्ञातृत्वेन सिद्धस्यात्मन उत्क्रान्त्यादिदर्शनात् अणुत्वमवगम्यते । तदु-ज्यते न वेति संदेहः ॥

नास्याणुत्वमुपपद्यते । 'स वा एष महानज आत्मा' इति जीवस्य विभुत्वा-वगमात् 'अहं विश्वं भुवनमभ्यभवम्' इति तस्य व्याप्त्या सकलभुवनाभिभा-वित्वावगमाच्च सर्वथायमात्मा विभुः ॥

इति प्राप्ते निरूप्यते—अणुरेवायमात्मा, उत्क्रान्तिगत्यागतीनां श्रुतेः । 'तेन प्रद्योतेनैष आत्मा निष्क्रामति' इति ह्युत्क्रान्तिः श्रूयते । 'ये वै के चास्माल्लो-

---

अथ उत्क्रान्त्यधिकरणम् ॥ ९ ॥

सू ॥ उत्क्रान्तिगत्यागतीनाम् ॥ २० ॥ अणुरयमात्मा विभुर्वेति अणुविभुश्रुत्योः किमनुसारेण का श्रुतिर्नेतव्येति तयोर्बलाबलानवधारणात्संशयः । तदर्थोऽयं सन्देहः पूर्वाधिकरणप्रसाधितो जीवस्वरूपातिरिक्तधर्मज्ञानसद्भाव उपपद्यते न वेति । उपपद्यते चेत् तद्व्याप्त्या सर्वांगीणसुखानुभवस्य तद्व्याप्तिविषयतया विभुत्वश्रुतेश्चोपपन्नतयोत्क्रां-तिगत्यागतिलिंगानुगृहीताणुत्वश्रुतिबलादणुरात्मेति सिद्धान्तकोटिस्सिद्ध्येत् । नोपपद्यते चेत् सर्वांगीणसुखानुभवस्यात्मव्याप्तिमन्तरेणानुपपत्तेस्तदनुगृहीतया विभुत्वश्रुत्या विभु-रेवायमात्मा । तदणुत्वश्रुति 'स्त्वेष म आत्मान्तर्हृदयेऽणीया'निति पारमेश्वराणुत्वश्रु-तिवदौपाधिकाणुत्वपरा । उत्क्रांत्यादिश्रुतयोऽपि औपाधिकार्थविषया इति पूर्वपक्ष-कोटिः सिद्ध्येदिति संशययोः फलफलिभावः । तत्र पूर्वपक्षः 'स वा एष महानज आत्मे'ति श्रुतेर्विभुर्जीवः । न चेयं श्रुतिः परमेश्वरविषया । ' योऽयं विज्ञानमयः प्राणे' ष्विति जीवप्रस्तावात् 'अहं विश्वं भुवनमभ्यभवा'मिति मुक्तजीवस्य व्याप्त्या सकलभुव-नाभिभावित्वश्रवणाच्च । 'बुद्धेरात्मा महान्पर' इति मुक्तामुक्तसाधारण्येन जीवस्य महत्त्वश्रुतेश्च । अणुत्वे च तस्य सर्वांगीणसुखानुभवो न स्यात् । अतो देहपरिमाणत्व-स्यापि जैनाधिकरणे दूषितत्वात्परिशेषादपि विभुत्वसिद्धिः । न च जीवप्रभारूपधर्मज्ञान-व्याप्त्या सर्वांगीणसुखानुभवोपपत्तिः । जीवस्वरूपातिरिक्तस्य धर्मज्ञानस्यासिद्धेः 'यो वि-ज्ञाने तिष्ठ' न्नित्यादिश्रुतेः जीवस्य स्वप्रकाशज्ञानरूपत्वस्यावश्याभ्युपगन्तव्यतया तस्यैव तत्तद्वस्त्ववच्छेदेन तत्तद्विषयज्ञानत्वोपपत्तावतिरिक्तधर्मज्ञानकल्पने प्रमाणाभावात् । 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत' इत्यादिश्रुतिषु द्रष्टृदृष्ट्यादिशब्दानां सामानाधिकरण्येन जीवस्यैव ज्ञानरूपत्वप्रतिपादनपरतोपपत्तेरित्येवं प्राप्ते सिद्धान्तमाह सूत्रकारः—सू ॥ उत्क्रान्तिगत्यागतीनाम् ॥ २० ॥ 'नात्मा श्रुते'रित्यतः श्रुतेरित्यनुवर्तते । 'नाणुरत-

---

(१) 'जीवः स्वप्रकाशज्ञानरूप इत्यभ्युपगन्तव्यतया' इति ख. पाठः । (२) 'गौरवाद्' इति ख. पाठः ।

कात्प्रयन्ति चन्द्रमसमेव ते गच्छन्ति' इति गतिः । 'तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे' इत्यागतिः। विभुत्वे जीवस्यैता उत्क्रान्तिगत्यागतयो नोपपद्येरन् ॥

यद्यपि शरीरवियोगरूपोत्क्रान्तिर्विभुत्वेऽप्यात्मनः स्यात् तथापि गत्यागती नैवमित्याह–

॥ सू ॥ स्वात्मना चोत्तरयोः॥ २१ ॥

उत्तरयोर्गत्यागत्योः स्वात्मनैव संपाद्यत्वादणुरयमात्मा । यदुक्तं 'महानज आत्मा' इति तदीश्वरप्रकरणान्नैतद्विषयमिति वक्ष्यति । व्याख्या विश्वभुवनाभिभावित्वं यदुक्तं, तत्तु मलतिरोधानापगमप्रकटितशक्तिमरीचिव्याप्तमुक्तजीवविषयम् । तस्मादणुरेवात्मा ॥

आशङ्क्य परिहरति–

॥ सू ॥ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २२ ॥

'स वा एष महानज आत्मा' इति श्रुतेर्नाणुर्जीव इति चेत्–न, 'यस्यानुवित्तः प्रतिबुद्ध आत्मा' इति परमेश्वराधिकारात् ॥

॥ सू ॥ स्वशब्दोन्मानाभ्यां च ॥ २३ ॥

'एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश ॥' इति श्रुतावणुशब्दात्, 'आराग्रमात्रो ह्यवरोऽपि दृष्टः' इत्युन्मानाच्च अणुरात्मा। 'अणुसदृशं वस्तूदाहृत्य तन्मानत्वप्रदर्शनमुन्मानम् ॥

अणुत्वेऽस्य सकलदेहव्यापिवेदनानुभवः कुत इत्यत आह–

॥ सू ॥ अविरोधश्चन्दनवत् ॥ २४ ॥

च्छ्रुते' रित्युत्तरसूत्रात्साध्यलाभः । उत्तरसूत्रशंकामाह–यद्यपीति । शरीरनाशरूपोत्क्रान्तिः स्थितस्यापि जीवस्य उपपद्यत इति भावः। सू ॥ स्वात्मना चोत्तरयोः ॥ २१ ॥ चशब्दमवधारणार्थं कृत्वा व्याचष्टे–उत्तरयोरिति । यद्यप्युत्क्रमणशब्दार्थस्यापि गतिविशेषरूपत्वादुत्क्रमणमपि स्वात्मनैव संपाद्यम् । मुख्यत्वे संभवत्यौपचारिकत्वकल्पनायोगस्य न्यायस्य तत्राप्यविशिष्टत्वात् । तथापि शरीरवियोगः उत्क्रांतिरिति परपरिभाषामभ्युपगम्यैतदुक्तम् । वक्ष्यतीति । उत्तरसूत्र इति शेषः । शक्तिमरीचिव्याप्तेति । मुक्तस्य धर्मज्ञानप्रभया सकलजगद्व्यापकत्वं ' प्रदीपवदादेश ' इति (ब्र. ४- ४- १५) सूत्रे वक्ष्यते । तद्विषयमित्यर्थः । 'बुद्धेरात्मा महान्पर' इति महच्छब्दः प्रकृतेंद्रियादिशेषित्वरूपप्राधान्यानुवादको न विभुत्वप्रतिपादकः । अन्यथोक्तवक्ष्यमाणानेकश्रुतिविरोधप्रसङ्गादिति भावः । सू ॥ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २२ ॥ यस्येति । प्रतिबुद्ध आत्मा प्राज्ञः परमेश्वरस्स यस्यानुवित्तः । अनुपूर्वो 'विदिर् लाभ' इति धातोर्निष्ठाप्रत्ययः । श्रवणमननाद्यनंतरं प्राप्त इत्यर्थः । तथा च सत्यपि जीवप्रस्तावे तत्र परमेश्वरप्रतिपादनमप्यस्तीति तद्विषयत्वं महत्त्वश्रुतेर्युक्तमिति भावः । महत्त्वश्रुत्यन्यथानयनबीजमणुत्वश्रुतिबाहुल्यं विभावयितुमुत्तरसूत्रम्—सू ॥ स्वशब्दोन्मानाभ्यां च ॥ २३ ॥ आराग्रं चर्मभेदिसूच्यग्रम् । अवरो जीवः । सू ॥ अविरोधश्चन्दन-

---

(१) 'सकलजगद्व्याप्तत्वं' इति ख. पाठः ।   (२) 'व्यस्यम्' इति ख. पाठः ।

यथा चन्दनबिन्दुरेकदेशस्थोऽपि सकलदेहव्यापि सुखं जनयति, तद्वदविरोधः॥

पुनराशङ्क्य परिहरति–

॥ सू ॥ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥ २५ ॥

देशविशेषस्थितिश्चन्दनस्यास्तीति चेत्–न, आत्मनोऽपि तदभ्युपगमात्, 'हृदि ह्येष आत्मा' 'योऽपि विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः' इति श्रुतेः। इति मतान्तरम् ॥

स्वमतमाह–

॥ सू ॥ गुणाद्वाऽऽलोकवत् ॥ २६ ॥

आत्मा स्वगुणेन ज्ञानेन सकलदेहं व्याप्यानुभवति। यथा मणिः स्वकीयेन तेजसा सन्निहितं व्याप्य प्रकाशयति। तस्मादविरोधः॥

ज्ञानात्मनोर्व्यतिरेको नास्तीत्यत्राह–

॥ सू ॥ व्यतिरेको गन्धवत्तथा हि दर्शयति ॥ २७ ॥

गन्धवती पृथिवीतिवत् जानामीति गुणत्वेनोपलब्धेर्ज्ञानात्मनोः व्यतिरेकोऽस्ति। दर्शयति च श्रुतिर्व्यतिरेकं 'जानात्येवायं पुरुषः' इति ॥

॥ सू ॥ पृथगुपदेशात् ॥ २८ ॥

आत्मनः पृथगुपदिश्यते ज्ञानम्। 'न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' इति॥

एवं नित्यज्ञानगुणक आत्मा सिद्धः। एवं ज्ञानगुणकत्वेऽप्यात्मनः कथं ज्ञान-

---

वत् ॥ २४ ॥ तद्वदविरोध इति। एकदेशस्थस्यापि व्यापिकार्यजनकत्वं दृष्टम्। न च दृष्टे काचिदनुपपत्तिरस्तीति भावः। ननु शरीरैकदेशस्थस्यापि हरिचन्दनबिन्दोस्सर्वांगीणसुखानुभवहेतुत्वं दृष्टम्। सर्वशरीरव्यापिनस्त्वगिन्द्रियस्यापि तद्दृष्टम्। उभयविधदृष्टान्तदर्शने हरिचन्दनदृष्टान्तस्यैवानुरोधे किं नियामकमित्याशंकानिराकरणार्थत्वेनोत्तरसूत्रमवतारयति–पुनराशंक्येति। सू ॥ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥ २५ ॥ आत्मनोऽपीति। यथा हरिचन्दनबिन्दोरेकदेशस्थत्वं प्रत्यक्षसिद्धमित्यभ्युपगम्यते एवं जीवस्यापि तच्छ्रुतिसिद्धमित्यभ्युपगम्यत इति भावः। 'मतान्तर' मित्यनेन एतदस्वारस्यं द्योत्यते युक्तं चन्दनबिन्दोस्सावयवस्य सूक्ष्मावयवप्रसरणेन सकलदेहव्याप्त्या सर्वांगीणसुखानुभवजनकत्वं न त्वणोर्जीवस्यावयवास्सन्ति यैरयं सकलं शरीरं कायव्यूहे बहूनि शरीराणि च व्याप्नुयादिति। सू ॥ गुणाद्वाऽऽलोकवत् ॥ २६ ॥ भवेदेवं प्रदीपस्य प्रभया प्रासादोदरव्याप्तिवत् जीवस्य धर्मज्ञानेन शरीरव्याप्तिः, यदि जीवातिरिक्तं धर्मज्ञानं स्यात्, तदेव नास्तीति शंकानिराकरणार्थत्वेन उत्तरसूत्रमवतारयति–ज्ञानात्मनोरिति। सू ॥ व्यतिरेको गंधवत्तथा हि दर्शयति ॥ २७ ॥ गंधवत्त्वेन पृथिव्या इव ज्ञानवत्त्वेन पुरुषस्य व्यपदेशो नौपचारिकत्वाय व्यतिरेकमपेक्षते इति भावः। सू ॥ पृथगुपदेशात् ॥ २८ ॥ भिन्नशब्दाभ्यां कर्तृक्रियारूपभेदसमर्पकाभ्यामुपदेशः पृथगुपदेशः। तथा च षष्ठ्योर्व्यधिकरणतया मुख्यक्रियाकर्तृभावभेदे संभवति सामानाधिकरण्यमाश्रित्यौपचारिकत्वकल्पनं न युक्तमिति भावः।

मात्रत्वव्यपदेश इत्यत आह—

॥ सू ॥ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥२९॥

ज्ञानगुणसारत्वादात्मनो ज्ञानव्यपदेशः, न ज्ञानमात्रत्वात्। यथा प्राज्ञस्य विपश्चितोऽपि 'सत्यं ज्ञान'मिति। ततो ज्ञानमात्रत्वव्यपदेशो दोषो न भवत्यात्मन इति ॥

पुनरुपपत्तिमाह—

॥ सू ॥ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ ३० ॥

आत्मस्वरूपानुबन्धित्वात् ज्ञानस्य, तेन व्यपदेशे न दोषः। स्वरूपानुबन्धिधर्मत्वेन गोत्वादिना खण्डादेर्गौरित्यादिव्यपदेशो दृश्यते। अतः स्वरूपानुबंधित्वाज्ज्ञानधर्मस्य तद्व्यपदेशः ॥

सुषुप्त्यादिष्वसतो ज्ञानस्य यावदात्मभावित्वं कथमित्यत आह—

॥ सू ॥ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ ३१ ॥

सुषुप्त्यादिषु सतो ज्ञानस्यानभिव्यक्तस्यापि जागरितादावभिव्यक्तिसंभवात् स्वरूपानुबन्ध्येव ज्ञानम्, यथा पुंस्त्वासाधारणसप्तमधातोर्बाल्येऽपि सतो युवत्वेऽभिव्यक्तिः। ततो ज्ञानस्यात्मस्वरूपानुबन्धित्वे न दोषः ॥

आत्मनो ज्ञातृत्वाणुत्वप्रतिपादनप्रयोजनमाह—

॥ सू ॥ नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वान्यथा ॥ ३२ ॥

यद्यपि जीवस्य ज्ञानत्वव्यपदेशः स्वप्रकाशज्ञप्तिरूपत्वादुपपद्यते तथापि प्रकारान्तरेणापि तदुपपादनार्थमुत्तरसूत्रद्वयम्—सू ॥ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ २९ ॥ यतो ज्ञानगुणोऽस्य कर्तृत्वादिसर्वनिर्वाहकतया सारभूतः अतस्तेन गुणेन तस्य व्यपदेशः। दृष्टो हि ब्रह्मणोऽपि सारभूतेन गुणेन व्यपदेश इत्यर्थः। यद्यपि 'सत्यं ज्ञान' मित्यत्रान्तोदात्तेन चित्स्वरेण मत्वर्थीयाच्प्रत्ययान्ततया ज्ञानशब्दो ज्ञानवत्परः इत्युपपादयितुं शक्यते। तथापि तस्य ज्ञानमात्रपरत्वेऽपि न प्रकृते काचिदनुपपत्तिः इत्यभिप्रायेण तदुदाहृतम्। सू ॥ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥३०॥ लाक्षणिकत्वेन पूर्वनिर्वाहः अयं तु मुख्यत्वेनेति विशेषः। पूर्वसूत्रोक्तहेत्वाक्षेपकत्वेनोत्तरसूत्रमवतारयति—सुषुप्त्यादिष्विति। सू ॥ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ ३१ ॥ बाल्युवादिसाधारणो हि वीर्यरूपः पुंस्त्वधातुः। शरीरधारकान्धातून्विना शरीरस्थित्यसंभवात्[1]। तथापि यथा तस्य बाल्ये नाभिव्यक्तिः 'न हि द्रष्टुर्दृष्टे' रिति जीवस्वरूपानुबंधित्वेन प्रतिपन्नस्य धर्मज्ञानस्य सुषुप्तौ बाह्यांतरसकलेंद्रियव्यापारोपरमेण विषयावभासाभावात्[2] तथाभिव्यक्तिर्नास्तीति भावः। उत्तरसूत्रेण जीवस्य ज्ञानरूपतयागन्तुकज्ञानतया वा सर्वगतत्वाभ्युपगमे दूषणमुच्यते। तदुक्तिः स्वमते तद्दूषणाप्रसंगरूपं प्रयोजनमानयतीति पर्यवस्यदर्थमालोच्य स्वमतप्रयोजनपरतयोत्तरसूत्रमवतारयति—आत्मन इति। सू ॥ नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वान्यथा ॥ ३२ ॥ आत्मा

---

(१) 'शक्त्यसंभवात्' इति क पाठः। (२) 'विषयावच्छेदाभावात्' इति क पाठः।

अन्यथा ज्ञप्तिमात्रसर्वगतात्मपक्षे तावन्नित्यवत् सर्वदोपलब्धिः स्यात्, संकोचाभावात्। विद्यमानाया अनुपलब्धेरपि स एव हेतुरिति सापि सर्वदा स्यात्। आगन्तुकज्ञानसर्वगतात्मपक्षेऽपि स एव दोषः, सर्वात्मनां सर्वगतत्वेन ज्ञानहेतूनां मनस्संयोगादीनां सर्वसाधारणत्वात्। अदृष्टहेतूनामपि तथात्वात् तेनापि न नियमः। अथोपलब्ध्यनुपलब्ध्योर्विरोधादुपलब्धेरेव हेतवः स्युः, अनुपलब्धेरेव वा। तथा सति अन्यतरनियमः स्यात्। अतः पूर्वोक्तमेव समीचीनम् ॥ इत्युत्क्रान्त्यधिकरणम् ॥ ९ ॥

शरीरस्यान्तरुपलभ्यते ततो बहिर्नोपलभ्यत इति तावदहमिहैवास्मि सदने जानान इति सार्वलौकिकानुभवसाक्षिकं नान्यथा कर्तुं शक्यम्। तदिदं पक्षद्वयेऽपि नोपपद्यते। तथा हि ज्ञानरूपः सर्वगत आत्मेति पक्षे स उपलभ्यानुपलभ्यस्वभावः उपलभ्यैकस्वभावोऽनुपलभ्यैकस्वभावो वा। आद्ये सर्वत्र तस्योपलब्ध्यनुपलब्धी स्याताम्। द्वितीये सर्वत्रोपलब्धिः स्यात्। तृतीये सर्वत्रानुपलब्धिर्भवेत्। देहस्यान्तरुपलभ्यस्वभावस्ततो बहिरनुपलभ्यस्वभाव इति तु व्यवस्था न संभवति। न ह्येकस्य क्वचिदंशे स्वप्रकाशत्वमन्यत्रास्वप्रकाशत्वं चेत्युपपद्यते। आगन्तुकज्ञानसर्वगतात्मपक्षेऽप्येवमेव विकल्पत्रयेऽपि दोषः। न च शरीरस्यान्तर्ज्ञानहेतूनां मनस्संयोगादीनां सत्त्वात्तत्रैवाहमित्युपलब्धिर्न बहिरिति व्यवस्थोपपद्यत इति वाच्यम्। स्वशरीराद्बहिरपि सर्वगते स्वात्मनि मनोऽन्तरसंयोगसत्त्वात्। न च स्वादृष्टाकृष्टमनस्संयोग एव स्वज्ञानहेतुरिति व्यवस्था कल्पयितुं शक्या। सर्वात्मसंनिधावुत्पद्यमानानामदृष्टानां सर्वसाधारण्यानिवारणादिति सूत्रस्यार्थं दर्शयति–अन्यथेति। पूर्वोक्तमिति। संकोचविकासवन्नित्यज्ञानवानणुर्जीव इति प्रागुक्तमित्यर्थः ॥ इति उत्क्रान्त्यधिकरणम् ॥ ९ ॥

नयमणिमालायाम्

अथ उत्क्रान्त्यधिकरणम् ॥ ९ ॥

सू ॥ उत्क्रांतिगत्यागतीनाम् ॥ २० ॥ स्वात्मना चोत्तरयोः ॥२१॥ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २२ ॥ स्वशब्दोन्मानाभ्यां च ॥ २३ ॥ अविरोधश्चंदनवत् ॥ २४ ॥ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥ २५ ॥ गुणाद्वालोकवत् ॥ २६ ॥ व्यतिरेको गन्धवत्तथाच दर्शयति ॥ २७ ॥ पृथगुपदेशात् ॥ २८ ॥ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ २९ ॥ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ ३० ॥ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ ३१ ॥ नित्योपलब्ध्यनुपलब्धिप्रसंगोऽन्यतरनियमो वान्यथा ॥ ३२ ॥

स विभुर्महानज इति श्रवणात्सर्वाङ्गवेदनावगतेः। न च सा ज्ञानगुणात्स्यात् जीवस्य ज्ञानमात्रत्वात् ॥ १४४ ॥
गत्युत्क्रांतिश्रवणादणुर्महानिति तु परविषयम्। व्याप्यस्य ज्ञानगुणः तत्सारत्वात्तथास्य निर्देशः ॥ १४५ ॥

इति उत्क्रान्त्यधिकरणम् ॥ ९ ॥

सूत्रार्थचन्द्रिकायाम्

अथोत्क्रान्त्यधिकरणम् ॥ ९ ॥

सू ॥ उत्क्रान्तिगत्यागतीनाम् ॥ २० ॥ स्वात्मना चोत्तरयोः ॥ २१ ॥ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २२ ॥ स्वशब्दोन्मानाभ्यां च ॥ २३ ॥ अविरोधश्चन्दनवत् ॥ २४ ॥ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥ २५ ॥ गुणाद्वालोकवत् ॥ २६ ॥ व्यतिरेको गन्धवत्तथा हि दर्शयति ॥ २७ ॥ पृथगुपदेशात् ॥ २८ ॥ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ २९ ॥ यावदात्मभावित्वाच्च

न दोषस्तद्दर्शनात् ॥ ३० ॥ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ ३१ ॥ नित्योपलब्ध्यनुपलब्धिप्रसंगोऽन्यतरनियमो वान्यथा ॥ ३२ ॥

भगवत्पादमते, पूर्वं जीवस्य नित्यत्वं स्वप्रकाशत्वं चाभिहितम् । अधुना जीवस्यापरिच्छिन्नत्वमणुत्वनिरासेन साधयति–**उत्क्रान्तिगतीत्यादिना** । अत्र 'सर्वव्यापि' इति सर्वगतत्वश्रुतेः 'एषोऽणुरात्मा' इत्यणुत्वश्रुत्या विरोधोऽस्ति न वेति **संदेहः** । 'अस्माच्छरीरादुत्क्रामति' 'चन्द्रमसमेव सर्वे गच्छन्ति' 'तस्माल्लोकात्पुनरेति' **इत्युत्क्रान्तिगत्यागतीनां** श्रवणादणुर्जीव इति प्राप्नोति । किंच । **सू ॥ स्वात्मना चोत्तरयोः ॥ २१ ॥** यद्यप्युत्क्रान्तिर्देहस्वाम्यनिवृत्तिरूपा विभुत्वे संभवति । तथापि **उत्तरयोः**=गत्यागत्योः । **स्वात्मना**=जीवात्मना संबद्धत्वात्ते आत्मनोऽणुत्व एव संभवतः ॥

तर्हि सर्वगतत्वश्रुतिर्विरुद्ध्येतेत्याशंक्य समाधत्ते—**सू ॥ नाणुरतच्छ्रुतेरिति** । नायं जीवोऽणुः । कुतः । **अतच्छ्रुतेः**='सर्वव्यापि' इत्यादिना सर्वगतत्वश्रुतेः । **इति चेत्** । **न** । **इतराधिकारात्**=इतरस्य ब्रह्मणः सर्वेषु वेदान्तेषु प्रधानतया ज्ञेयत्वेन प्रकृतत्वात् तस्यैव सर्वगतत्वश्रुतिर्न जीवस्येत्यर्थः ॥

जीवस्याप्यणुत्वश्रुतिरस्तीत्याह—**सू ॥ स्वशब्दोन्मानाभ्यां च ॥ २३ ॥** 'एषोऽणुरात्मे'त्यणुत्ववचनेन 'वालाग्रशतभागस्ये' त्युन्मानशब्दितात्यन्ताल्पपरिमाणश्रवणेन च जीवोऽणुरित्यर्थः ॥

नन्वात्मनोऽणुत्वे गंगाजलनिमग्नस्य देहव्यापिशैत्योपलब्धिविरोध इत्याह—**सू ॥ अविरोधश्चन्दनवत् ॥ २४ ॥** यथा चन्दनबिंदुश्शरीरैकदेशस्थश्शरीरव्यापि सुखं जनयति तथा जीवोऽपि देहव्यापिनं शैत्याद्युपलंभं करिष्यतीत्यविरोध इत्यर्थः। दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमाशंक्य परिहरति—**अवस्थिति वैशेष्यादिति ॥ अवस्थितिवैशेष्यादिति चेत्**=प्रत्यक्षेण चन्दनबिन्दोरेकदेशेऽवस्थितिर्ज्ञायते जीवस्य तु नैवमित्यतुल्यत्वादत्र चन्दनदृष्टान्तो नोपपद्यत **इति चेत्** । **न** । कुतः । **अभ्युपगमात्**=जीवाणुत्वस्याङ्गीकारात् । तत्कस्मात् । **हृदि हि**=यस्मात् 'हृद्यन्तर्ज्योति' रित्यादौ अल्पपरिमाणे हृदि जीवः पठ्यते, तस्माज्जीवस्याणुत्वमभ्युपगम्यत इति न दृष्टान्तवैषम्यमित्यर्थः ॥

ननु सावयवस्य चन्दनबिन्दोस्सर्वशरीरव्यापकत्वेऽपि निरवयवस्याणोर्जीवस्य तथा शरीरव्यापकत्वं न स्यादित्यपरितुष्ट्या पक्षान्तरमाह—**सू ॥ गुणाद्वा लोकवत् ॥ २५ ॥** आत्मनोऽणुत्वेऽपि तन्निष्ठज्ञानगुणस्य व्यापकत्वाङ्गीकारात् व्यापकगुणाद्वापि कार्यं भविष्यति । **लोकवत्**=यथा लोके गृहनिष्ठप्रदीपस्याल्पत्वेऽपि प्रभात्मकगुणवशाद्गृहव्यापि प्रकाशादिकार्यं संभवति तद्वदित्यर्थः ॥

ननु गुणिव्यतिरेकेण गुणस्य वृत्तेरन्यत्रादर्शनात् तत्कथमित्याशंक्याह—**सू ॥ व्यतिरेको गन्धवत् ॥ २६ ॥** यथा गुणस्यापि सतो गन्धस्य गुणिव्यतिरेकेण वृत्तिः तद्वत् गुणिव्यतिरेको ज्ञानस्येत्यर्थः ॥

ज्ञानेनैवात्मनो देहव्याप्तिरित्यत्र श्रुतिमाह—**सू ॥ तथा च दर्शयति ॥ २७ ॥** हृदायतनत्वमणुपरिमाणत्वं चात्मनोऽभिधाय 'आ लोमभ्य आनखाग्रेभ्य' इति श्रुतिः ज्ञानेन समस्तशरीरव्यापित्वं दर्शयतीत्यर्थः ॥

तत्रैव हेत्वन्तरमाह—**सू ॥ पृथगुपदेशात् ॥ २८ ॥** 'प्रज्ञया शरीरं समारुह्य' इत्यात्मज्ञानयोः कर्तृकरणभावेन पृथगुपदेशात् गुणद्वारास्य शरीरव्यापित्वं गम्यते । तथा च व्यापकं ज्ञानं जीवस्त्वणुः इत्यणुत्वश्रुत्या सर्वगतत्वश्रुतेर्विरोधोऽस्तीति **पूर्वपक्षः** ॥

सिद्धान्तस्तु—सू ॥ **तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ २९ ॥** तुशब्दः पूर्वपक्षं व्यावर्तयति । नैवाणुर्जीवः । सर्वगतस्यैव ब्रह्मणो जीवभावेन प्रवेशश्रवणात्तादात्म्योपदेशाच्च । **तद्व्यपदेशः**=जीवस्याणुत्वादिव्यपदेशः । **तद्गुणसारत्वात्**=तस्या बुद्धेर्गुणा अणुत्वोत्क्रान्तिगत्यागतिसुखदुःखादयः । ते गुणाः सारं प्रधानं यस्य जीवस्य स तथा । तस्य भावस्तत्त्वं तस्मात् भवति । न स्वाभाविकः । **प्राज्ञवत्**=यथा प्राज्ञस्य परमात्मनस्सगुणोपासनेषु दहराद्युपाधिवशादणुत्वादिकं व्यपदिश्यते तद्वदित्यर्थः ॥

नन्वात्मन्यणुत्वादिसंसारस्य बुद्ध्युपाधिकत्वे कदाचिद्बुद्ध्या वियोगे संसारो न स्यादित्यत आह—**सू ॥ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ ३० ॥** बुद्धिसंयोगस्य **यावदात्मभावित्वाच्च**=यावदात्मनस्सम्यग्दर्शनेन संसारो न निवर्तते तावत्कालभावित्वात् । **न दोषः**=नोक्तदोष इत्यर्थः । तत्कस्मात् । **तद्दर्शनात्**=देहवियोगेऽपि तस्य बुद्धिसंयोगस्य 'स समानस्सन्नुभौ लोकावनुसंचरती'त्यादि श्रुतौ दर्शनादित्यर्थः ॥

ननु सुषुप्तौ ब्रह्मसंपत्तिकार्यनाशयोरभ्युपगमाच्च बुद्धिसंयोगस्य यावदात्मभावित्वमित्यत आह—**सू ॥ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ ३१ ॥** **पुंस्त्वादिवत्**=यथा बाल्ये पुंस्त्वादेस्सत एव यौवनेऽभिव्यक्तिस्तद्वत् । **तस्य**=बुद्धिसंयोगादेः । **सतः**=सुषुप्तौ सूक्ष्मात्मना सत एव । **अभिव्यक्तियोगत्**=आविर्भावसंभवात् यावदात्मभावित्वं न विरुध्यत इत्यर्थः ॥

ननु बुद्ध्यपरपर्यायान्तःकरणे किं प्रमाणं यत्प्रयुक्तः संसारः स्यादित्यत आह—**सू ॥ नित्योपलब्ध्यनुपलब्धि-**

प्रसंगोऽन्यतरनियमो वान्यथा ॥ ३२ ॥ इदमन्तःकरणमवश्यमभ्युपगन्तव्यम् । **अन्यथा**=अनभ्युपगमे । सर्वेषामिन्द्रियाणां स्वस्वविषयसंनिधानदशायां **नित्योपलब्धिप्रसंगः**= युगपत्सर्वविषयोपलब्धिप्रसंगः । मनोव्यतिरिक्तज्ञानसामग्र्यास्सत्त्वात् । यदि सत्यामपि सामग्र्यां ज्ञानाभावः तदा **नित्यानुपलब्धिप्रसंगः**=कस्याप्युपलब्धिर्न स्यात् । अथवा एकस्योपलब्धिमितरेषामनुपलब्धिमिच्छता ज्ञानसामग्रीमध्ये **अन्यतरनियमः=अन्यतरस्य**–आत्मनः इन्द्रियस्य वा **नियमः**=शक्तिप्रतिबन्धोऽङ्गीकर्तव्यः । निर्धर्मक आत्मनि शक्तेरभावात् शक्तेरान्तरत्वेनेन्द्रियधर्मत्वायोगाच्च स न संभवतीत्यतः इच्छैव नियामिका । तस्याश्च मनोधर्मत्वेन तदन्यथानुपपत्त्या 'कामः संकल्प' इत्यादिश्रुत्या च सिद्धमन्तःकरणम् । तत्प्रयुक्तश्चात्मन्यणुत्वादिसंसार इति । तस्मादौपाधिकाणुत्वश्रुत्या न वास्तवसर्वगतत्वश्रुतेर्विरोध इति सिद्धम् ॥

इतिभगवत्पादमते उत्क्रान्तिगत्यधिकरणम् ॥ १३ ॥

श्रीकण्ठमते, पूर्वत्र ज्ञातृत्वेन सिद्धस्यात्मन उत्क्रान्त्यादिदर्शनादवगम्यमानमणुत्वं युज्यते न वेति **संदेहः** । 'स वा एष महानज आत्मा' 'अहं विश्वं भुवनमभ्यभवाम्' इत्यादिश्रुतिभिस्तस्य विभुत्वसकलभुवनाभिभावित्वयोरवगमाद्विभोर्जीवस्य नाणुत्वमुपपद्यत इति **पूर्वपक्षः** । उत्क्रान्तिगत्यागतिश्रुत्यादिप्रामाण्यादात्मनो नित्यज्ञानगुणकस्याणुत्वमुपपद्यत एवेति **सिद्धान्तः** । अत्र 'उत्क्रान्तिगती' त्यादीन्येतदधिकरणसूत्राणि सर्वाण्यपि सिद्धान्तोपष्टंभकतयैव व्याख्यातानि । अतः भगवत्पादमते 'जीवाणुत्वपरतया पूर्वपक्षप्रतिपादकानि । 'उत्क्रान्तिगती' त्यादीनि नव सूत्राणि प्रायोऽत्राविशिष्टार्थानि । 'अवस्थितिवैशेष्या'दिति सूत्रं मतान्तरनिरूपकं 'गुणाद्वालोकव' दिति स्वमतप्रतिपादकमिति विशेषोऽत्र मते । अस्मिन्मते पूर्वपक्षसिद्धान्तयोर्विनिमयेनास्ति वैलक्षण्यं पूर्वस्मात् । सूत्राणि च तदानुगुण्येन व्याख्यातानि । **'व्यतिरेको गन्धवत्तथाहि दर्शयति । पृथगुपदेशात् ।'** इतीदं सूत्रद्वयं **'गुणाद्वालोकवत् ।'** इति स्वमतार्थोपष्टंभकतया ज्ञानात्मनोर्व्यतिरेकप्रतिपादकमित्यविशेषः । भगवात्पादमते सिद्धान्तपरत्वेन व्याख्यातानि **'तद्गुणसारत्वा'** दित्यादीनि चत्वारि सूत्राण्यपि अत्र विलक्षणार्थपरतया भिन्नार्थान्येव । यथा—एवं नित्यज्ञानगुणकस्यात्मनः कथं ज्ञानमात्रत्वव्यपदेश इत्यत आह—**तद्गुणसारत्वादि-त्यादि । तद्व्यपदेशः**=आत्मनो ज्ञानव्यपदेशः । **तद्गुणसारत्वात्तु**=ज्ञानगुणसारत्वादेव भवति न ज्ञानमात्रत्वादित्यर्थः । **प्राज्ञवत्**=यथा प्राज्ञस्य विपश्चितोऽपि 'सत्यं ज्ञान' मिति व्यपदेशस्तद्वदिति । पुनरुपपत्तिमाह—**सू ॥ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ ३० ॥ यावदात्मभावित्वाच्च**=ज्ञानस्यात्मस्वरूपानुबन्धित्वात् ज्ञानमात्रत्वव्यपदेशे न दोषः । कुतः । **तद्दर्शनात्**=स्वरूपानुबन्धिधर्मत्वेन गोत्वादिना खण्डादेर्गौरित्यादिव्यपदेशस्य लोके दर्शनात् । अतः स्वरूपानुबन्धित्वाज्ज्ञानधर्मस्य तद्व्यपदेशे न दोष इति भावः ॥

सुषुप्त्यादिष्वसतो ज्ञानस्य यावदात्मभावित्वं कथमित्यत आह—**सू ॥ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ ३१ ॥** सुषुप्त्यादिष्वनभिव्यक्तत्वेन सतोऽपि ज्ञानस्य बाल्येऽपि सतः पुंस्त्वासाधारणसप्तमधातोर्यौवनेऽभिव्यक्तिवत् जागरादावभिव्यक्तिसंभवात् ज्ञानस्य स्वरूपानुबन्धित्वमक्षतमिति भावः ॥

आत्मनो ज्ञातृत्वाणुत्वप्रतिपादनप्रयोजनमवगमयितुं पक्षान्तरे दोषमाह—**सू ॥ नित्योपलब्ध्यनुपलब्धिप्रसंगोऽन्यतरनियमो वान्यथा ॥ ३२ ॥ अन्यथा**–ज्ञानात्मवादे सर्वगतात्मवादे च । **नित्योपलब्ध्यनुपलब्धिप्रसंगः**= उपलब्ध्यनुपलब्धी नित्यवत्प्रसज्येयाताम् । तयोरन्यतरनियमो वा भवति । तस्मादात्मनो ज्ञातृत्वाणुत्ववादः पूर्वोक्त एव समीचीन इति सिद्धम् ॥ अत्र **व्यतिरेको गन्धवत्तथाहि दर्शयति'** इत्येकसूत्रतया पाठः ॥

रामानुजमते, 'ज्ञोऽत एव' इत्यादीनि चतुर्दश सूत्राण्यपि ज्ञाधिकरणत्वेन व्यपदिश्यंते । अत्र किं जीवश्चैतन्यमात्रवपुः उत पाषाणकल्प एवागन्तुकचैतन्यगुणः अथवा ज्ञातृत्वैकस्वरूप इति त्रेधा **संशयः** । चैतन्यमात्रवपुरथवा पाषाणकल्प आगन्तुकचैतन्यगुणः स्यादिति **पूर्वपक्षः** ॥ बद्धमुक्तोभयावस्थो ज्ञातैवायमात्मा अणुरेवेति **सिद्धान्तः** ॥ सूत्रार्थवर्णनादिकं सर्वमन्यदविशिष्टमेव श्रीकण्ठमतादिति विरम्यते पुनस्तत्प्रपञ्चनतः । इति ॥

इति रामानुजमते आत्माधिकरणम् ॥

आनन्दतीर्थमते, 'उत्क्रान्ती' त्यादिसूत्रसप्तकमात्रमिदमधिकरणं **'व्यतिरेको गन्धव'** दिति सूत्रमधिकरणान्तरं **'पृथगुपदेशा'** दित्यादिसूत्रद्वयमन्यदधिकरणं **'यावदात्मभावित्वाच्चे'**ति सूत्रमन्यत् **'पुंस्त्वादिव'** दित्यादिसूत्रद्वयमधिकरणान्तरमिति चाधिकरणपंचकात्मतया पंचधा विभक्तानीमानि त्रयोदश सूत्राणीति विशेषः । इतः परमापादपरिसमाप्तेः पूर्वाधिकरणप्रस्तुतजीवविषय एवाणुत्वमहत्त्वादिश्रुतिविरोधः समाधास्यते । अस्मिन्नधिकरणे 'व्याप्ता ह्यात्मानः' अणुर्ह्येष आत्मा'इति जीवपरिमाणश्रुत्यविरोध उच्यते । अत्र जीवोऽणुर्वा विभुर्वेति **संशयः** । 'व्याप्ता ह्यात्मान' इति युक्त्यनुगृहीतत्वेन प्रबलया श्रुत्या 'अणुर्ह्येष आत्मा' इति जीवाणुत्वश्रुतेर्विरोधवत्त्वेनाप्रामाण्याद्विभुर्जीव इति **पूर्वपक्षः** ॥ 'सोऽस्माच्छरीरादुत्क्रम्यामुं लोकमभिगच्छंत्यमुष्मादिमं लोकमागच्छन्ती'त्युत्क्रान्तिगत्यागतिश्रवणात् 'व्याप्ता ह्यात्मान' इति श्रुतेरीश्वरविषयत्वाच्च अणव एव ते जीवा इति **सिद्धान्तः** ॥ **सूत्रार्थस्तु, सू ॥ उत्क्रान्तिगत्यागतीनाम् ॥ २० ॥ 'सोऽस्मादित्यादिवाक्योक्तदेहोत्क्रमणलोकान्तरगमनैतल्लोकागमनहेतूनां सकाशादणुरेव जीवो न विभुरित्यर्थः ॥**

सू ॥ **स्वात्मना चोत्तरयोः** ॥ २१ ॥ चशब्द एवार्थः । जीवः, **स्वात्मना**=स्वतन्त्रपरमात्मनैव तत्प्रेरणयैवोत्क्रान्त्यादिमान् । न स्वतः । कुतः । **उत्तरयोः** सकाशात् 'स एतेनैव स्वात्मना' एष ह्येनं जीवम्' इत्युत्तरवाक्यद्वयबलादित्यर्थः । सू ॥ **नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्** ॥ २२ ॥ ननु न जीवोऽणुः । कुतः । **अतच्छ्रुतेः**–'व्याप्ता ह्यात्मान' इत्यणुत्वविरुद्धव्याप्तत्वश्रुतेः श्रवणादिति चेन्न । कुतः । **इतराधिकारात्**=परमात्मप्रकरणात् । तथाच व्याप्तत्वश्रुतेः परमात्मविषयत्वान्नाणुत्वबाधकत्वमित्यर्थः ॥

सू ॥ **स्वशब्दोन्मानाभ्यां च** ॥ २३ ॥ चः समुच्चये । न केवलं प्रकरणबलाद्व्याप्तत्वश्रुतिर्विष्णुपरा । किं तर्हि 'एष ह्यात्माध्युद्गतो मानशक्ते' रिति वाक्यस्थस्वशब्दगृहीतब्रह्मवाचकात्मशब्दादुन्मानशब्दितापरिमितत्वालिंगाच्च व्याप्तत्वश्रुतिर्विष्णुपरैव न जीवपरेत्यर्थः । अन्यानि 'अविरोध' इत्यादीनि त्रीणि सूत्राणि शांकरमतादविशिष्टार्थानीति न तानि व्याख्यातानि ॥ **अविरोध**सूत्रोक्तांशतोव्याप्तिर्देवानां **'गुणाद्वे'** ति सूत्रोक्ता गुणतो व्याप्तिर्मनुष्याणामिति व्यवस्था द्रष्टव्या ॥ **इत्युत्क्रान्त्यधिकरणम्** ॥ १२ ॥

सू ॥ **व्यतिरेको गन्धवत्तथा च दर्शयति** ॥ २६ ॥ अत्र ज्ञातुर्जीवस्यैकरूपत्वानेकरूपत्वश्रुत्यविरोध उच्यते । चशब्दो 'ऽचिन्त्यये' ति स्मृतिसमुच्चायकः। 'स नित्यो निरवयव' इत्यादिगौपवनश्रुतौ जीवस्यैकरूपत्वमुच्यते 'स पञ्चधा सप्तधे'त्यादिपाराशर्यायणश्रुतौ बहुरूपत्वमभिधीयते । एवं विरोधे सत्येकरूपत्वश्रुतेस्सयुक्तिकत्वेन प्रबलत्वात्सयुक्तिकश्रुतिविरोधादनेकरूपत्वश्रुतिरप्रमाणमिति **पूर्वपक्षः** । जीवानामणुत्वेऽपि अंशव्यतिरेकेण बहुरूपत्वमुपपद्यते । अंशिनं विहायाप्यंशस्यान्यत्र गमनस्य गन्धादौ दृष्टत्वात् एकरूपत्वश्रुतेः स्वरूपैक्यपरतयोपपत्तेश्चेति **सिद्धान्तः** ॥ **सूत्रार्थस्तु, गन्धवत्**=गन्धस्येव । यथा पुष्पगंधस्य स्वांशैर्व्यतिरेको विभागस्तथाणोरपि जीवस्य स्वांशैरीशशक्त्या व्यतिरेको युज्यते । कुतः । 'अथैक एव सन्' इत्यादिश्रुतिः 'अचिन्त्ययेशशक्त्येह' इत्यादिस्मृतिश्च यतस्तथा दर्शयति अत एवेत्यर्थः ॥

इति व्यतिरेकाधिकरणम् ॥ १३ ॥

सू ॥ **पृथगुपदेशात्** ॥ २८ ॥ **तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्** ॥ २९ ॥ अत्र जीवेशभेदाभेदश्रुत्यविरोध उच्यते । 'तत्त्वमस्यहं ब्रह्मास्मी' ति षड्विधतात्पर्यलिंगोपेतजीवब्रह्माभेदश्रुतिविरोधात्तद्भेदश्रुतिरप्रमाणमिति न तस्याः परमार्थतो ब्रह्मणि समन्वयो युक्त इति **पूर्वपक्षः** । 'भिन्नोऽचिन्त्यः परमो जीवसङ्घात्' इति सयुक्तिककौशिकश्रुत्या तद्भेदोपदेशात् जीवस्य 'तत्त्वमसी' त्यादिव्यपदेशस्य ब्रह्मसदृशज्ञानानन्दादिगुणसारत्वेनोपपद्यमानत्वाच्च भिन्न एव ब्रह्मणो जीव इति **सिद्धान्तः** । **सूत्रार्थस्तु, पृथक्**=जीवः परमात्मनो भिन्नः । कुतः । **उपदेशात्**='भिन्नोऽचिन्त्य' इतिश्रुतेरित्यर्थः ॥ **प्राज्ञवत्**–ब्रह्मणीव । यथा प्राज्ञे ब्रह्मणि 'सर्वं खल्विदं ब्रह्मे'ति जगदभेदोक्तिः, तथा जीवे **तद्व्यपदेशः**='तत्त्वमसी' ति ब्रह्मैक्योक्तिर्युज्यते । कुतः । **तद्गुणसारत्वात्**=जीवस्य ब्रह्मगुणसदृशचिदानन्दादिगुणस्वरूपत्वान्निमित्तादित्यर्थः ॥

इति पृथगधिकरणम् ॥ १४ ॥

सू ॥ **यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्** ॥ ३० ॥ पूर्वत्र जीवस्याप्युत्पत्तिरुक्ता । अतस्तस्यानादित्वादिप्रतिपादिका श्रुतिरप्रमाणम् । उत्पत्तिश्रुतेरुपाधिविषयत्वेऽपि उपाधेरुत्पत्तिमत्त्वे तत्र ब्रह्मप्रतिबिंबरूपस्य जीवस्याप्यभूत्वाभवनरूपोत्पत्त्यवश्यंभावेनानादित्वाद्ययोगादिति **पूर्वपक्षः** । **सिद्धान्तस्तु,** यावत्परमात्मा तिष्ठत्यनाद्यनन्तत्वेन तावत्कालभावित्वेन जीवोऽपि नित्यः । सर्वगतस्य परमात्मनो बिंबस्य सदा सन्निधानसत्त्वात् । न चोपाध्युत्पत्त्या तदनादित्वानुपपत्तिः । बाह्योपाधेरुत्पत्तिमत्त्वेऽपि स्वरूपोपाधेस्तदभावात् । इति । **सूत्रार्थ**स्तु, चस्समुच्चये । दर्शनाच्चेत्यन्वेति । **यावदात्मभावित्वात्**=जीवस्य यावत्परमात्मसत्त्वरूपनित्यत्वादिति यावत् । **न दोषः**–'सोऽनादिने' ति पुण्यपापसंबन्धबोधकश्रुत्यप्रामाण्यदोषो नास्ति । कुतः। **तद्दर्शनाच्च**–'नित्यः परो नित्यो जीव' इति श्रुतेः 'आत्मा नित्यः सुखदुःखे त्वनित्ये' इति स्मृतेश्चेति ॥

इति यावदधिकरणम् ॥ १५ ॥

सू ॥ **पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात्** ॥ ३१ ॥ अत्र जीवस्य सुखादिरूपत्वतदभावश्रुत्योरविरोध उच्यते । तुशब्द एवार्थकः । अत्र 'विज्ञानात्मा सह देवैश्च सर्वै' रिति जीवस्य ज्ञानानन्दादिरूपत्वं वदन्ती श्रुतिरप्रमाणम् । जीवस्य सर्वदा प्रकाशमानत्वेन तदभिन्नानां ज्ञानानन्दादीनां सदोपलब्धिप्रसंगात् प्रकाशमानजीवस्वरूपाभिन्नेषु तेष्वावरणकल्पनायोगात् 'दुःखाद्विमुक्त आनन्दी भवति सोऽज्ञानाद्विमुक्तो ज्ञानी भवती'ति मुक्तिसमयागन्तुकसुखादिश्रवणाच्च । तत-श्चैवं 'सम्यग्ज्ञानानन्दादिरूपत्वं देवानामेव । असुरास्तु विपरीतज्ञानदुःखात्मकाः। मनुष्याः पुनर्मिश्रज्ञानसुखदुःखोभयात्मकाः' इत्यपि श्रुतिरप्रमाणम् । असुरमनुष्याणामपि सुखदुःखकादाचित्कत्वानुभवात् । अन्यथा असुराणां सर्वदा दुःखोपलब्धेः मनुष्याणां सर्वदा सुखदुःखोपलब्धिसाम्यस्य च प्रसंगादिति **पूर्वपक्षः**। यथाश्रुति देवासुरमनुष्याणां सुखदुःखोभयात्मकत्वेऽपि, सत एव पुंस्त्वादेर्बाल्य इवेदानीमावृतत्वेन मुक्त्यादिसमये यौवन इवाभिव्यक्त्या च तथात्वेदानीमननुभवो मुक्त्यादिसमयागन्तुकसुखादिश्रवणं चोपपद्यत इति **सिद्धान्तः**। **सूत्रार्थस्तु, पुंस्त्वादिवत्**= पुंस्त्वादेरिव । पुरुषयोषिदादीनामपत्यो-

अथ कर्त्रधिकरणम्. ॥ १० ॥

॥ सू ॥ कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥

पूर्वत्र ज्ञातृत्वमणुत्वं च निरूपितमात्मनः । कर्तृत्वमस्ति न वेति संदेहः । कूटस्थस्यात्मनः कर्तृत्वं न संभवति । बुद्धेर्वा कर्तृत्वमुचितं, प्रकृतेर्वा । तदध्यासात् स्वस्मिन्नारोप्य कर्तेव प्रतिभाति । तस्मादात्मनः कर्तृत्वमनुपपन्नमिति पूर्वः पक्षः ॥

सिद्धान्तस्तु–आत्मा कर्तैव, शास्त्रार्थवत्त्वात् । अन्यथा कुर्यान्न कुर्यादिति शास्त्रस्य वैयर्थ्यं स्यात् ॥

अथ कर्त्रधिकरणम् ॥ १० ॥

सू ॥ कर्ता शास्त्रार्थवत्वात् ॥ ३३ ॥ आगंतुकज्ञानसर्वगतात्मपक्षे सर्वात्मसंनिधावुत्पद्यमानानामदृष्टादीनां सर्वसाधारण्यादुपलब्ध्यनियम उक्तः पूर्वाधिकरणे । तथैव प्रकृतेः कर्तृत्वे तस्यास्सर्वसाधारणत्वात् कर्तृत्वस्याप्यनियमः स्यादित्युच्यत इति दृष्टांतसंगतिप्रदर्शनाय वृत्तमनुकीर्तयति–पूर्वमिति । श्रुतिविप्रतिपत्त्या संशयं दर्शयति–कर्तृत्वमिति । कूटस्थस्येति । आत्मनः कौटस्थ्य 'मसंगो ह्ययं पुरुष' इति श्रुत्या सामान्यतः प्रतिपन्नम् । विशिष्य च 'हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् । उभौ तौ न विजानीतो नायं हन्ति न हन्यते' । इति मन्त्रेण हननक्रियायामकर्तृत्वं प्रतिपन्नम् । तदपि न्यायसाम्यात् क्रियामात्र एवाकर्तृत्वपरं पर्यवस्यति । तत्र हन्तुमित्यौणादिकस्तुमुन्प्रत्ययः । हन्तारमात्मानं मन्यत इत्यर्थः । 'य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् । उभौ तौ न विजानीतो नायं हन्ति न हन्यते' । इति गीतावचनात् । नन्वात्मनः कौटस्थ्ये कथमहं कर्तेति प्रतिभासः इत्याशंक्य सांख्यमर्यादया प्रकृतिकार्यबुद्धिधर्मस्य प्रकृतिधर्मस्य वा कर्तृत्वस्याध्यासरूपतया तदुपपादयति–बुद्धेर्वेति । शास्त्रमपि भोक्तुरात्मनस्तथाभूतमेव कर्तृत्वमपेक्ष्य प्रवर्तते । उपादानविहारोपदेशादिकमपि तदवलंबनमिति भावः । अन्यथेति । बुद्धेः प्रकृतेर्वा कर्तृत्वे कुर्यान्न कुर्यादिति नियुञ्जानयोर्विधिनिषेधशास्त्रयोर्वैयर्थ्यं स्यात् । कर्ता हि नियुज्यते भोक्तैव च कर्ता भवति । 'शास्त्रफलं प्रयोक्तरी'ति न्यायात् । न चाचेतनाया बुद्धेः प्रकृतेर्वा भोक्तृत्वमस्ति । अपि च । शास्त्रेण कर्ता बोधजननद्वारा नियुज्यते । न चाचेतनयोर्बोधनीयत्वमस्ति । अतो भोक्तृत्वात् बोधनी-

---

रूपत्तिशक्तिस्वरूपत्वेऽपि यथा कालविशेषे तदभिव्यक्तिस्तथा **सतः**=जीवस्वरूपत्वेन मुक्तेः पूर्वमपि विद्यमानस्यैव । **अस्य**=ज्ञानानन्दादेः । **अभिव्यक्तियोगात्**=मुक्तावभिव्यक्त्या निमित्तभूतया योगात् 'आनन्दी भवती'ति श्रुत्युपपत्तेर्न जीवस्यानन्दादिरूपत्वे तच्छ्रुतिविरोध इति जीव आनन्दादिरूप एवेत्यर्थः ॥

सू ॥ **नित्योपलब्ध्यनुपलब्धिप्रसंगोऽन्यतरनियमो वान्यथा** ॥ ३२ ॥ वाशब्दो व्यवस्थितविकल्पार्थः । उपलब्धिरनुभवः । **अन्यथा**=जीवस्यानन्दादिरूपत्वमङ्गीकृत्यावरणानङ्गीकारे । **नित्योपलब्ध्यनुपलब्धिप्रसंगः**–यथायोग्यमन्वयः । मुक्तियोग्यानां नित्यमानन्दानुभवः स्यात् । तमोयोग्यानां न कदाप्यानन्दानुभवः स्यात् किं तु स्वरूपदुःखानुभव एव स्यात् । एवं मध्यममनुष्याणाम**न्यतरनियमः**– अन्यतरयोस्सुखदुःखानुभवयोर्नियमः साम्यमेव स्यात् । प्रतिबन्धकीभूतावरणानभ्युपगमादित्यर्थः । तस्माज्जीवस्यावरणमवश्यमङ्गीकार्यमिति भावः ॥

इत्यानन्दतीर्थमते पुंस्त्वाधिकरणम् ॥ १६ ॥

॥ सू ॥ उपादानाद्विहारोपदेशाच्च ॥ ३४ ॥

'एवमेवैष एतान् प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते' इत्युपादानविहारोपदेशाभ्यां चायं कर्तैव ॥

यदुक्तं बुद्धिप्रकृत्योरेव कर्तृत्वमिति तत्र बुद्धेः कर्तृत्वपक्षं दूषयति–

॥ सू ॥ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥ ३५ ॥

'विज्ञानं यज्ञं तनुते' इत्यादिना यज्ञादौ कर्तृत्वव्यपदेशाच्चात्मैव कर्ता। विज्ञानशब्देन बुद्धेः व्यपदेशः, नात्मन इति चेत् न, तथा सति 'विज्ञानेन' इति निर्देशविपर्ययः स्यात्। अन्यत्र हि बुद्धिविवक्षायां विज्ञानशब्दस्य करणविभक्तिनिर्देशो दृश्यते 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाय' इति। अतो बुद्धेः करणत्वात् कर्तृत्वं नास्तीति ॥

प्रकृतेः कर्तृत्वपक्षं दूषयति–

॥ सू ॥ उपलब्धिवदनियमः ॥ ३६ ॥

प्रकृतेः कर्तृत्वे तस्याः सर्वसाधारणत्वेन पूर्वोक्तोपलब्ध्यनियमवत् फलानियमः स्यात् ॥

यत्वाच्चात्मैव शास्त्रैर्नियुज्यत इति स एव कर्तेति युक्तम्। ननु कौटस्थ्यश्रुत्यनुरोधादकर्तासावन्यगतं कर्तृत्वमध्यस्यतीत्याध्यासिककर्तृत्वापेक्षा विधिनिषेधशास्त्रप्रवृत्तिर्वर्णनीयेति चेन्न। कूटस्थे अहं कर्तेत्यारोपरूपस्याध्यासस्यापि निष्पत्त्यसंभवात्। तस्मादध्यासोऽप्यात्मप्रभास्थानीयधर्मज्ञानपरिणामरूपतया तद्धर्मतां नेतव्य इति तथैव कृतिरपि तद्धर्मतां नीयतां किमर्थं बाधानुपलंभेऽप्यहं कर्तेति प्रतिभासस्य भ्रांतिरूपत्वं शास्त्रस्य भ्रांतिकृतकर्तृत्वावलम्बनत्वं च कल्प्यते। असंगत्वश्रुतिरात्मनः स्वयमेव ज्ञानकृत्यादिपरिणामित्वाभावविषया भविष्यति। 'हन्ता चेन्मन्यते हन्तु' मिति मन्त्रस्तु 'न जायते म्रियते वा विपश्चि' दिति पूर्वमन्त्रे 'न हन्यते हन्यमाने पि देहे' इति शरीरातिरिक्तस्यात्मनो हननायोग्यत्वेन प्रकृतत्वात् भ्रमरूपस्तद्धन्तृत्वाभिमान इत्येतद्विषयतयोपपद्यत इति भावः। सू ॥ उपादानाद्विहारोपदेशाच्च ॥ ३४ ॥ 'एवमेवैष' इत्यस्य दृष्टान्तः 'स यथा महाराजो जानपदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्तत' इति पूर्ववाक्यनिर्दिष्टः। अत्र गृहीत्वेत्युक्तमिन्द्रियाणां ग्रहणमुपादानम्। 'यथाकामं परिवर्तत' इत्युक्तः स्वाप्नसञ्चारो विहारः। दूषयतीति। आत्मनः कर्तृत्वे किञ्चित्प्रमाणमुपन्यस्य तस्य बुद्धिविषयत्वशङ्कोद्भावनेन तस्याः कर्तृत्वं दूषयतीत्यर्थः। सू ॥ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥ ३५ ॥ अन्यत्र हीति। यत्र बुद्धिकार्यमुच्यते तत्र बुद्धेः करणतयैव निर्देशो दृश्यत इत्यर्थः। तत्स्वप्नदशायामेतेषां प्राणानां चक्षुरादीनां विज्ञानं ग्रहणशक्तिं विज्ञानेन बुद्ध्या गृहीत्वेति श्रुत्यर्थः। सू ॥ उपलब्धिवदनियमः ॥ ३६ ॥ अदृष्टमनस्संयोगादीनां सर्वसाधरणत्वात् तत्कृतोपलब्ध्यनियमप्रसङ्गः पूर्वाधिकरणापादितः इह सर्वसाधारणायाः प्रकृतेः कर्तृतायामापाद्यमाने फलानियमे दृष्टान्तः। सू ॥

॥ सू ॥ शक्तिविपर्ययात् ॥ ३७ ॥

प्रकृतेः कर्तृत्वे कर्तुरेव भोक्तृत्वमिति सैव भोक्त्री स्यात् । ततश्चात्मनो भोक्तृत्वशक्तेर्विपर्ययो हानिः स्यात् ॥

॥ सू ॥ समाध्यभावाच्च ॥ ३८ ॥

किंच । प्रकृतेरेव कर्तृत्वे प्रकृतेरन्योऽस्मीति समाध्यभावप्रसङ्गाच्च कर्ताऽऽत्मा ॥

॥ सू ॥ यथा च तक्षोभयथा ॥ ३९ ॥

आत्मनः कर्तृत्वे इच्छायां करोति अन्यदा न करोत्यात्मेति व्यवस्था, यथा तक्षा स्वकार्ये तथेति । बुद्धेरेवेच्छासंभवान्नाव्यवस्थेति चेत्—न । चेतनधर्मत्वादिच्छायाः । तस्मादात्मनः कर्तृत्वं, न बुद्धेर्नापि प्रकृतेरिति निर्णयः ॥

इति कर्त्रधिकरणम् ॥ १० ॥

शक्तिविपर्ययात् ॥ ३७ ॥ ततश्चेति । बुद्धेरेव भोक्तृत्वे तदतिरिक्तात्मसिद्धिश्च न स्यादिति भावः । सू ॥ समाध्यभावाच्च ॥ ३८ ॥ प्रकृतेः कर्तृत्वे समाधावपि सैव कर्त्री वाच्या । सा च स्वात्मानं प्रकृतेरन्यत्वेन ध्यातुं न शक्नोतीति समाधिरेव लुप्येतेत्यर्थः ॥ आत्मनः कर्तृत्व इव बुद्धेः प्रकृतेर्वा कर्तृत्वे कर्तृत्वस्य कालनियमो न स्यादित्यापादनार्थं सूत्रम्—सू ॥ यथा च तक्षोभयथा ॥ ३९ ॥ स्वकार्ये इति विषयसप्तमी । इच्छायां करोति अन्यदा न करोतीति पूर्ववाक्यादनुषंगः । तथा च यथा वास्यादिकरणसंपन्नोऽपि तक्षणेच्छायां तत्करोति अन्यदा न करोतीति व्यवस्था । एवं वागादिकरणसंपन्नोऽप्यात्मा भोगेच्छायां करोति अन्यदा न करोतीति व्यवस्था युज्यते । बुद्धिप्रकृत्योस्तदभावात्सा न सिद्ध्येत् । बुद्धेः प्रकृतेर्वा भोगतदिच्छयोरंगीकारे च तदतिरिक्तात्मान सिद्ध्येदिति भावः । इति कर्त्रधिकरणम् ॥ १० ॥

नयमणिमालायाम् अथ कर्त्रधिकरणम् ॥ १० ॥

सू ॥ कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥ उपादानाद्विहारोपदेशाच्च ॥ ३४ ॥ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥३५॥ उपलब्धिवदनियमः ॥३६॥ शक्तिविपर्ययात् ॥३७॥ समाध्यभावाच्च ॥३८॥ यथा च तक्षोभयथा ॥ ३९ ॥

नायं हन्तीत्यादेः श्रवणादेतस्य कर्तृता नास्ति । बुद्धेरेव तु सा स्यात् विज्ञानं यज्ञमित्यादेः ॥ १४६ ॥

शास्त्रार्थवत्त्वमुख्यैर्हेतुभिरेतस्य कर्तृतास्त्येव । अयमेव च विज्ञानं श्रवणं तु तदस्य हन्त्ययोग्यत्वात् ॥ १४७ ॥

इति कर्त्रधिकरणम् ॥ १० ॥

सूत्रार्थचन्द्रिकायाम् अथ कर्त्रधिकरणम् ॥ १० ॥

सू ॥ कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥ उपादानाद्विहारोपदेशाच्च ॥ ३४ ॥ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥ ३५ ॥ उपलब्धिवदनियमः ॥ ३६ ॥ शक्तिविपर्ययात् ॥ ३७ ॥ समाध्यभावाच्च ॥ ३८ ॥ यथा च तक्षोभयथा ॥ ३९ ॥

भगवत्पादमते, पूर्वं जीवस्याणुत्वं पराणुच स्वयंज्योतिष्ट्वादिवत्सर्वगतत्वं प्रतिष्ठापितम् । अधुना बुद्धेः कर्तृत्वनिषेधपूर्वकं तस्य कर्तृत्वं साधयति—सू ॥ कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥ अत्र किं बुद्धिः कर्त्री उत जीव इति संदेहः । परिणामित्वाद्बुद्धिरिति पूर्वपक्षः । सिद्धान्तस्तु, आत्मैव कर्ता न बुद्धिः । कर्तुरपेक्षितोपायबोधकविधिशास्त्रस्य अर्थवत्त्वात् । यदि बुद्धिः कर्त्री फलभोक्ता चात्मेत्युच्येत तर्हि तादृशविधिशास्त्रमनर्थकं स्यात् । अतो न केवलबुद्धेः कर्तृत्वमपि त्वात्मन इति ॥

किंच ॥ सू ॥ विहारोपदेशात् ॥ ३४ ॥ 'स्वे शरीरे यथाकामं परिवर्तते' इति जीवप्रकरणे स्वप्नावस्थायां विहारस्य=संचरणस्योपदेशात् । अकर्तुस्संचरणायोगादात्मनः कर्तृत्वमित्यर्थः ॥

किंच ॥ **सू** ॥ **उपादानात्** ॥ ३५ ॥ 'प्राणानां विज्ञानेन विज्ञानमादाय' इत्यात्मनो ग्रहणशक्त्युपादानश्रवणात् अकर्तुरुपादानायोगादात्मनः कर्तृत्वमित्यर्थः ॥

अपिच ॥ **सू** ॥ **व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः** ॥ ३६ ॥ **क्रियायाम्**='विज्ञानं यज्ञं तनुते' इत्यादौ लौकिकवैदिकक्रियायाम् । **व्यपदेशाच्च**=विज्ञानशब्दवाच्यस्यात्मनः कर्तृत्वव्यपदेशात् । **न चेत्**=यदि विज्ञानशब्दो बुद्धिपरः जीवपरो नचेत् तर्हि **निर्देशविपर्ययः**=बुद्धेः करणत्वेन विज्ञानमिति कर्तृत्वनिर्देशस्य विज्ञानेनेति करणत्वविपर्ययः स्यादित्यर्थः ॥

ननु स्वतंत्रस्यात्मनः कर्तृत्वे अनिष्टं न कुर्यादिष्टमेव कुर्यादित्यत आह–**सू** ॥ **उपलब्धिवदनियमः** ॥ ३७ ॥ यद्वदुपलब्धौ स्वतन्त्रोऽप्यात्मा इष्टमनिष्टं चोपलभते तद्वदिष्टमनिष्टं च साधयतीत्यनियम इत्यर्थः ॥

इतश्चात्मन एव कर्तृत्वं न बुद्धेरित्याह–**सू** ॥ **शक्तिविपर्ययात्** ॥ ३८ ॥ बुद्धेः कर्तृत्वे करणशक्तिर्हीयेतेति भावः ॥

ज्ञानसाधनविध्यन्यथानुपपत्त्यापि आत्मनः कर्तृत्वं स्वीकार्यमित्याह–**सू** ॥ **समाध्यभावाच्च** ॥ ३९ ॥ आत्मनोऽकर्तृत्वे 'आत्मा वा अरे द्रष्टव्य' इत्यादौ विहितस्य ब्रह्मसाक्षात्कारसाधनस्य समाधेरभावप्रसंगादात्मनः कर्तृत्वसिद्धिः ॥ अस्मिन्मते आनन्दतीर्थमते च 'विहारोपदेशात्' 'उपादानात्' इति विपर्ययेण चकारमन्तरा पृथग्योगविभागः ॥

इति भगवत्पादमते कर्त्रधिकरणम् ॥ १४ ॥

अथ तक्षाधिकरणम् ॥ १५ ॥

तच्च कर्तृत्वमध्यस्तमात्मनीत्याह–**सू** ॥ **यथा च तक्षोभयथा** ॥ ४० ॥ अत्र 'असंगो ह्ययं पुरुषः' इत्यसंगत्वश्रुतेः कर्तुरिष्टसाधनबोधकविधिवाक्येन विरोधोऽस्ति नवेति **संदेहः** । पूर्वोक्तशास्त्रार्थवत्त्वादिहेतुभिः कर्तृत्वस्य स्वाभाविकतया तत्प्रतिपादकविधिशास्त्रेण विरोधोऽस्तीति **पूर्वपक्षः** । **सिद्धान्तस्तु,** न स्वाभाविकमात्मनः कर्तृत्वम् अपि त्वौपाधिकम् । यथा लोके उभयथा तक्षा वास्यादीनि करणान्यपेक्ष्य कर्ता सन् दुःखी भवति अनपेक्ष्य तु स्वरूपेणाकर्ता सुखी भवति तथात्मापि बुद्ध्यादिकरणान्यपेक्ष्य कर्ता संसरति अनपेक्ष्य तु स्वभावतोऽकर्ता परमानन्दघन एव भवति । विधिशास्त्रं तु कर्तृत्वं विनानुपपन्नं तत्साधयति न तु तस्य स्वाभाविकत्वमपीति न तेनासंगत्वश्रुतेर्विरोध इति सिद्धम् ॥

इति भगवत्पादमते तक्षाधिकरणम् ॥ १५ ॥

श्रीकण्ठमते, ज्ञातृत्ववदात्मनः कर्तृत्वमस्ति न वेति **संदेहः** । कूटस्थस्यात्मनः कर्तृत्वासंभवात् बुद्धेर्वा प्रकृतेर्वा समुचितं तत्कर्तृत्वम् । आत्मा तदध्यासात्स्वस्मिन्नारोप्य कर्तेव प्रतिभातीत्यतस्तस्य कर्तृत्वमनुपपन्नमिति **पूर्वपक्षः** । **सिद्धान्तस्तु,** विधिनिषेधशास्त्रयोर्वैयर्थ्यप्रसङ्गात्, 'एवमेवैष एतान्प्राणान्गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते' इत्युपादानविहारोपदेशाभ्यां, 'विज्ञानं यज्ञं तनुते' इत्यादिना यज्ञादौ कर्तृत्वव्यपदेशात्, बुद्धिविवक्षायां 'विज्ञानेन' इति करणविभक्तिनिर्देशस्य विपर्ययप्रसंगाच्च प्रकृतेः कर्तृत्वे उपलब्ध्यनियमवत्फलानियमप्रसंगात्, भोक्तृत्वशक्तिविपर्ययप्रसक्तेः प्रकृतेरन्योऽस्मीति समाध्यभावप्रसङ्गाच्च, आत्मा कर्तैव । तस्मादात्मन एव कर्तृत्वं न बुद्धेर्नापि प्रकृतेरिति निर्णयः ॥ इति ॥ यद्यपि संदेहपूर्वपक्षादिकमविशिष्टमेव शांकरमतादिति वक्तुमुचितं तथापि केषांचित्सूत्राणामर्थवर्णनप्रकारः परं किंचिदिव भिद्यते । तच्च स्वयं सुबोधमिति नात्र प्रपञ्च्यते ॥ **रामानुजमते,** अत्रापि 'यथा च तक्षोभयथा' इत्यन्तं श्रीकण्ठमतवदेकमधिकरणम् । प्रधानस्यैव कर्तृत्वादात्मनो न कर्तृत्वमिति **पूर्वपक्षः** । **सिद्धान्तसूत्रार्थवर्णना**दिकमन्यत्सर्वमविशिष्टमेव श्रीकण्ठमतादिति विरम्यते विवरणतः । अन्तिमसूत्रस्य यथा तक्षा इच्छायां करोति अन्यदा न करोतीति व्यवस्था एवमात्मनः कर्तृत्व एव सा व्यवस्था युज्येत । बुद्ध्यादीनामचेतनत्वाच्चेतनधर्मत्वाच्चेच्छाया इत्यर्थः ॥ इति ॥

आनन्दतीर्थमते, 'परात्तु तच्छ्रुतेः' इत्याद्युत्तराधिकरणसूत्रयोरप्यत्रैवाधिकरणेऽन्तर्भावः । सूत्रयोगविभागादिकं शांकरमतवदेव । संदेहपूर्वपक्षादिकमप्यविशिष्टं पूर्वस्मात्प्रायशः । अत्राधिकरणे जीवकर्तृत्वाकर्तृत्वविषयश्रुतिविरोधः परिह्रियते । सूत्रार्थवर्णने परमस्ति किंचिदिव वैलक्षण्यमिति तन्मात्रं निरूप्यते–**सू** ॥ **कर्ता शास्त्रार्थवत्त्वात्** ॥ ३३ ॥ जीवोऽपि **कर्ता** । कुतः । तथासत्येव **शास्त्रार्थवत्त्वात्**=विधिनिषेधरूपशास्त्रस्य प्रयोजनवत्त्वात् अन्यथा वैयर्थ्यप्रसंगादित्यर्थः ॥

सू ॥ **विहारोपदेशात्** ॥ ३४ ॥ मुक्तावपि 'जक्षन्क्रीड' न्निति विहारकर्तृत्वोक्तेः जीवः परमार्थत एव कर्ता न काल्पनिककर्तेत्यर्थः ॥

सू ॥ **उपादानात्** ॥ ३५ ॥ जीवस्य मोक्षार्थे साधनाद्यनुष्ठानदर्शनात्ततः फलदर्शनाच्च न जीवः संसारेऽपि काल्पनिककर्तेत्यर्थः ॥

सू ॥ **व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः** ॥ ३६ ॥ **क्रियायाम्**='आत्मानमेव लोकमुपासीत' इत्युक्तोपासनक्रियायाम् । **व्यपदेशाच्च**=जीवस्य कर्तृत्वोक्तेश्च । **न चेत्**=जीवः कर्ता न चेत् । **निर्देशविपर्ययः**=निर्देशस्य=जीवस्य कर्तृत्वेनेश्वरस्य कर्मत्वेन वचनस्य । **विपर्ययः**='आत्मैवोपासीते'त्येवंरूपवैपरीत्यं स्यादित्यर्थः ॥

अथ परायत्ताधिकरणम् ॥ ११ ॥

॥ सू ॥ परात्तु तच्छ्रुतेः ॥ ४० ॥

ज्ञातृत्वं कर्तृत्वं च प्रतिपादितमात्मनः । तत् कर्तृत्वं स्वायत्तमीश्वरायत्तं वेति संदेहः ॥

स्वायत्तमिति प्राप्तम् । अन्यथा कर्मस्विष्टानिष्टरूपेषु व्यापारयन् जीवमीश्वरो वैषम्यादिदोषभाजनं स्यात् । किंच–जीवस्य प्रवृत्तेरीश्वरायत्तत्वे तस्य कर्तृत्वाभावाद्विधिप्रतिषेधवैयर्थ्यं च स्यात् । तस्माज्जीवस्य स्वायत्ता प्रवृत्तिः ॥

इति प्राप्ते ब्रूमः–परमेश्वरायत्तमेव जीवस्य कर्तृत्वं, न स्वायत्तम् । 'य आत्मानमन्तरो यमयति' इति श्रुतेः ॥

यदुक्तमीश्वरस्य जीवं प्रवर्तयतो वैषम्यादिकम्, अस्य च विधिप्रतिषेधवैयर्थ्यमिति, तत्राह–

॥ सू ॥ कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥ ४१ ॥

जीवः स्वेच्छया प्रवृत्तिनिवृत्तिहेतुं करोति स्वकर्मपाकवशेन, जीवकृतप्रयत्नं

अथ परायत्ताधिकरणम् ॥ ११ ॥

सू ॥ परात्तु तच्छ्रुतेः ॥ ४० ॥ कर्तृत्वे चिंतिते तद्विशेषश्चिन्त्यत इति संगतिमभिप्रेत्य वृत्तानुकीर्त्तनम् । कर्तृत्वोपपादकतया तु ज्ञातृत्वमनूदितम् । तत्कर्तृत्वमिति । विधिनिषेधशास्त्राणामन्तर्यामित्वश्रवणानाञ्च विप्रतिपत्तिः सन्देहबीजम् । वैयर्थ्यं च स्यादिति । विधिनिषेधशास्त्रावैयर्थ्याय हि प्रागात्मनः कर्तृत्वं समर्थितम् । तस्य कर्तृत्वस्य परायत्तत्वे तद्वैयर्थ्यं तदवस्थमेव स्यादिति तत्समर्थनमपि शिथिलीभवेदिति भावः । सू ॥ कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥४१॥ ननु यदि जीवः स्वेच्छया कञ्चिद्यत्नं करोति तर्हि तत्रैव तस्य स्वातन्त्र्यमभ्युपगतं स्यादित्याशंक्याह–स्वकर्मेति । स्वकर्मपाकवशेन या स्वेच्छा तयेति योजना । तथा च परमेश्वरकारितपूर्वकर्ममूलस्वेच्छाधीने यत्ने परमेश्वराधीनत्वं न हीयत इति भावः । पूर्वकर्मापि परमेश्वरकारिततत्पूर्वकर्ममूलस्वे-

---

सू ॥ उपलब्धिवदनियमः ॥ ३७ ॥ उपलब्धिवत्=उपलब्धाविव । यथा जीतस्य ज्ञाने स्वेच्छानुसारेण ज्ञानालाभः तथा क्रियायामपि अनियमो युक्त इत्यर्थः ॥

सू ॥ शक्तिविपर्ययात् ॥ ३८ ॥ ईशजीवयोः । शक्तिविपर्ययात् पूर्णापूर्णरूपशक्तिभेदमपेक्ष्य कर्तृत्वमपि स्वतन्त्रपरतन्त्रभेदभिन्नमित्यर्थः ॥

सू ॥ समाध्यभावाच्च ॥ ३९ ॥ समाधिरलंबुद्धिस्तदभावान्न जीवस्य स्वतन्त्रकर्तृत्वं किं तु परतन्त्रकर्तृत्वमेवेत्यर्थः ॥

सू ॥ यथा च तक्षोभयथा ॥ ४० ॥ दार्ष्टान्तिकसमुच्चये चशब्दः । यथा तक्षा=वर्धकिः । उभयथा=प्रासादादिकारयितृप्रेरितत्वेन तत्कर्तृत्वेन च व्यपदिश्यते तथा ईश्वरनियतोऽपि जीवः कर्तेति वक्तुं शक्यत इत्यर्थः ॥

सू ॥ परात्तु तच्छ्रुतेः ॥ ४१ ॥ जीवस्य कर्तृत्वशक्तिः परात्तु=परमात्मानमनुसृत्यैव तदधीनैवास्ति । कुतः । तच्छ्रुतेः=‘कर्तृत्वं कारणत्वं चे’ति जीवकर्तृत्वस्येशाधीनत्वश्रवणादित्यर्थः ॥

सू ॥ कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥ ४२ ॥ तुरवधारणे । यतः परमात्मा विहितप्रतिषिद्धावैयर्थ्यादिभ्यः=तादर्थ्ये चतुर्थी । विधिनिषेधशास्त्रावैयर्थ्याय स्वस्य वैषम्यनैर्घृण्यपरिहाराय च । कृतप्रयत्नापेक्षस्तु=जीवकर्मप्रयत्नयोग्यतामपेक्षमाण एव । जीवं प्रेरयति । अतो जीवशक्तेरीशाधीनत्वेऽपि तस्यापेक्षितकृतिमत्त्वमस्त्येवेत्यर्थः ॥ इति सूत्रार्थचन्द्रिकायां कर्त्रधिकरणम् ॥ १० ॥

प्रवृत्तिनिवृत्तिहेतुमपेक्ष्य तदनुमतिदानेन परः प्रवर्तयतीति विधिनिषेधावैयर्थ्यं निग्रहानुग्रहादिभ्योऽवगम्यते। यथा गुरुतरदार्वादिहरणं बालः प्रबलसहायः कुर्वन्नपि स्वप्रयत्ने विधिनिषेधयोग्यो भवति, एवं जीवः परमेश्वरसहायः प्रवर्तमानोऽपि स्वयं विधिनिषेधयोग्यो भवति। अतो जीवकृतप्रयत्नापेक्षत्वात् कर्मसु जीवस्य प्रवर्तक ईश्वरो न वैषम्यभाक्। तस्यापि स्वाधीनप्रवृत्तिसद्भावात् विधिनिषेधादिवैयर्थ्यं च न संभवतीति सिद्धम् ॥ इति परा यत्ताधिकरणम् ॥ ११ ॥

च्छाधीनम् इत्यनादिः कर्मप्रवाह इत्यतो नानवस्था दोषः । तदनुमतिदानेनेति । ननु, प्रयत्नकारणेच्छाजनककर्मकारयितृत्वेन प्रयत्ने मूलकारणभूत ईश्वरो नानुमन्तेति व्यपदेशार्हः। प्रवृत्तप्रवर्त्तकोऽनुमन्तेति प्रसिद्धेः। किन्तु प्रयोजयितेति व्यपदेशार्ह इति चेदुच्यते। यस्येच्छां विज्ञाय यस्तदिष्टं निर्वर्तयितुं प्रवर्तते स तस्य प्रयोजयितेति व्यपदिश्यते। यथा राजा भृत्यस्य। न[1] चेश्वरः पुरुषेच्छां विज्ञाय तदिष्टो याग इति तं निर्वर्तयितुं प्रवर्तते किं तु विधितः स्वेष्टसाधनमिति विज्ञाय पुरुषः प्रवर्तते। अतोऽत्र न प्रयोजयितृव्यपदेशः कृतः। स्वरसोदितया स्वेच्छया प्रवर्तमानं प्रति प्रवर्तकत्वात्त्वनुमन्तृव्यपदेशः कृतः। विधिनिषेधेति । एवं स्वरसोदितस्वेच्छाधीनामेव जीवप्रवृत्तिं प्रति परमेश्वरस्यापि कालादृष्टादिवत्कारणत्वाभ्युपगमे विधिनिषेधयोर्न वैयर्थ्यम् । स्वेच्छाधीनप्रवृत्तिमतो नियोगार्हत्वात् । नापि कोपप्रसादादिकृतलौकिकप्रवृत्तिनिवृत्त्यनुभवविरोध इति भावः। ननु, चेतनप्रवृत्तावचेतनस्य कालादृष्टादेः कारणत्वमस्तु नाम। तत्र चेतनांतरापेक्षायां राजाधीनभृत्यप्रवृत्तिन्यायेन पारतन्त्र्यं स्यादिति विधिनिषेधायोग्यत्वादिप्रसंगस्तदवस्थ इत्याशंक्याह—यथेति। एवं च वैषम्यदोषोऽपि न प्रसज्यत इति दर्शयन्नधिकरणार्थमुपसंहरति—अत इति। इति परायत्ताधिकरणम् ॥ ११ ॥

नयमणिमालायाम्

अथ परायत्ताधिकरणम् ॥ ११ ॥

सू ॥ परात्तु तच्छ्रुतेः ॥ ४० ॥ कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥ ४१ ॥

सा तु स्वाधीना स्यादस्य न परमेश्वराधीना। अस्य हि परतन्त्रत्वे विधिवैयर्थ्यादिदोषः स्यात् ॥ १४८ ॥

पुरुषोद्योगमपेक्ष्य क्रियतेऽन्तर्यामिणानुमतिः। तन्न विधेर्वैयर्थ्यं नान्तर्यामित्वबाधोऽपि ॥ १४९ ॥

इति परायत्ताधिकरणम् ॥ ११ ॥

सूत्रार्थचन्द्रिकायाम्

अथ परायत्ताधिकरणम् ॥ ११ ॥

सू ॥ परात्तु तच्छ्रुतेः ॥ ४० ॥ कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥ ४१ ॥

भगवत्पादमते, जीवस्यौपाधिकं तत्कर्तृत्वमपीश्वरायत्तमित्याह—सू ॥ **परात्तु तच्छ्रुतेः** ॥ ४१ ॥ अत्र 'एष ह्येव साधुकर्म कारयती' त्यादिश्रुतेर्विध्यादिशास्त्रेण विरोधोऽस्ति न वेति **संदेहः**। रागद्वेषादिवशात्स्वत एवात्मनः कर्तृत्वसंभवात् तत्प्रतिपादकविध्यादिशास्त्रेण विरोधोऽस्तीति **पूर्वपक्षः**। **सिद्धान्तस्तु,** सौत्रतुशब्दः पूर्वपक्षव्यावर्तकः । न स्वतो जीवस्य कर्तृत्वादिसिद्धिः। किं तु **तत्**=औपाधिकं कर्तृत्वम्। **परात्**=परस्मादीश्वरात्कर्माध्यक्षात् । अविद्यातिमिरान्धस्य जीवस्य कर्तृत्वादिसंसारसिद्धिः। ईश्वरानुग्रहे तु विज्ञानेन मोक्षसिद्धिर्भविष्यति । कुतः। **तच्छ्रुतेः**=‘एष ह्येव साधुकर्म कारयती’ त्यादिकायाः श्रुतेः तस्येश्वरस्य हेतुकर्तृत्वमवसीयत इत्यर्थः ॥

---

१ 'न चेश्वरेच्छां विज्ञाय तदिष्टो याग इति तं निर्वर्तयितुं पुरुषः प्रवर्तते किंतु विधितः स्वेष्टसाधनमिति विज्ञाय।' इति क ग पाठः। ख पाठ एव समीचीन इति सोऽत्रादृत इति विज्ञेयम्।

अथांशाधिकरणम् ॥ १२ ॥

॥ सू ॥ अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥ ४२ ॥

नित्यो ज्ञाताणुः कर्ता परमेश्वरसाहाय्यापेक्षप्रवृत्तिर्जीव इति पूर्वत्र निरूपितम् । स इह परमेश्वर एव ? किं वा तदंशभूतः ? ॥

इति संशये परमेश्वर इति पूर्वः पक्षः । परमेश्वर एव बहुविधोपाधिवशाज्जीवभावमुपगतो दृश्यते, यथैकमाकाशं घटाद्युपाधिवशान्नानाकारं दृश्यते परिच्छिन्नं च । तथा हि श्रुतिः–'अयमात्मा ब्रह्म' इति वदति । तस्मादीश्वर एवाज्ञानाज्जीवभावमुपगत इति ॥

सिद्धान्तस्तु–जीवात्मा परमेश्वरस्यांशो मूर्त्येकदेश एव । 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' 'य आत्मनि तिष्ठन्' पृथगात्मानं प्रेरितारं च मत्वा' ॥ 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् । तस्यावयवभूतेन व्याप्तं सर्वमिदं जगत्' ॥ इत्यादिषु नानाव्यपदेशात् । यदुक्तं 'अयमात्मा ब्रह्म' इत्यादिना ब्रह्मण एव जीवत्वमिति, तत्राह–अन्यथा 'तत्त्वमसि' 'अयमात्मा ब्रह्म'

अथांशाधिकरणम् ॥ १२ ॥

सू ॥ अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥ ४२ ॥
प्रतिपत्तिसौकर्याय जीवपेटिकायां वृत्तमर्थमनुवदन् सङ्गतिं सूचयति–नित्य इति । यत्साहाय्यापेक्षया जीवः प्रवर्तत इति निरूपितं स एव परमेश्वरः सत्योपाध्यवच्छेदेन मिथ्योपाध्यवच्छेदेन वा कल्पितभेदस्सन् जीव इति व्यवह्रियते उतान्तर्गणिकभेदे पारमार्थिके सत्येव विशेषणत्वेन विशिष्टैकदेशतया परमेश्वरांशो जीव इति अभेदश्रुतेर्भेदश्रुतेश्च विप्रतिपत्तितस्संशये सति पूर्वपक्षः । भेदाभेदश्रुत्योरन्यतरस्यावश्यममुख्यार्थत्वे कल्पनीये लाघवादभेदश्रुतिर्मुख्यार्थेति भेदश्रुतेर्घटाकाशादिभेदव्यपदेशवदमुख्यार्थत्वं कल्प्यत इत्येवं प्राप्ते सिद्धान्तः–जीवः परमेश्वरस्यांशः शरीरत्वेन विशिष्टैकदेश इत्यर्थः । नानाव्यपदेशात् 'य आत्मनि तिष्ठन्नि' त्यादिश्रुतिषु भेदव्यपदेशात् । अन्यथा च व्यपदेशात् 'तत्त्वम' स्यादिश्रुतिष्वभेदेनापि व्यपदेशात् । अपि चैके शाखिनः आथर्वणिकाः परमेश्वरस्यैव दाशकितवादिरूपत्वमधीयते 'ब्रह्म दाशा' इत्यादिना । एवं जीवपरयोश्शरीरशरीरिभावकृतविशि-

---

नन्वीश्वरस्य कारयितृत्वे वैषम्यनैर्घृण्ये स्यातामित्यत आह–**कृतप्रयत्नापेक्ष इत्यादि** । तुशब्द उक्तशंकानिरासकः । जीवेन कृतो यः प्रयत्नो धर्माधर्मलक्षणस्तदपेक्ष एवेश्वरोऽन्यस्मिन्नपि जन्मनि धर्मादिकं कारयति तदपेक्षश्च सुखादिफलं प्रयच्छतीति न वैषम्यनैर्घृण्यप्रसक्तिः । अनादित्वात्संसारस्य प्राक्तनधर्माद्यपेक्षा युक्तैव । ननु कस्मात्तदपेक्षत्वमत आह–**विहितप्रतिषिद्धावैयर्थ्यादिभ्यः**=ईश्वरस्य कर्मापेक्षत्वे 'ज्योतिष्टोमेन यजेत' 'ब्राह्मणो न हन्तव्यः' इति विधिनिषेधयोरवैयर्थ्यं भवति । अन्यथा विधिनिषेधशास्त्रमनर्थकमेव स्यात् । एवं चेश्वरकर्तृत्वप्रतिपादकविध्यादिशास्त्रेण 'एष ह्येव साधुकर्म कारयती' त्यादिशास्त्रस्य न विरोध इति सिद्धम् ॥

श्रीकण्ठमते तथा **रामानुजमते** च सूत्रार्थनिरूपणप्रकारवैषम्येऽपि संदेहपूर्वपक्षादिषु नास्ति वैषम्यं शांकरमतादिति विरम्यते पृथक्प्रपञ्चनतः ॥ इति ॥

आनन्दतीर्थमते, अनयोः सूत्रयोः पूर्वाधिकरणशेषतया तत्रैव तद्विवरणं कृतमिति वेद्यम् ॥

इति सूत्रार्थचन्द्रिकायां परायत्ताधिकरणम् ॥ ११ ॥

इत्यादिकाद्व्यपदेशात् तयोर्जीवब्रह्मणोर्व्याप्यव्यापकभावेनानन्यत्वम् । अपि च तथैवानन्यत्वमधीयत एके–'ब्रह्म दाशा ब्रह्म दासा ब्रह्मेमे कितवा उत' इत्यादिना ब्रह्मणोंऽशत्वेऽपि जीवस्य तद्व्याप्ततया तद्व्यपदेशो युक्तः, यथा वह्निना व्याप्तस्य काष्ठादेर्वह्निव्यपदेशः । तथापि हि तयोर्वह्निकाष्ठयोर्नाभेदः । तस्माज्जीवो ब्रह्मणोंऽशभूत एव तत्स्वरूपं प्रतिपद्यते । ब्रह्मण एवाज्ञानाज्जीवभावकल्पने बहुश्रुतिविरोधादिदोषप्रसक्तिर्दुर्वारा ॥

॥ सू ॥ मन्त्रवर्णात् ॥ ४३ ॥

'पादोस्य विश्वा भूतानि' इति मन्त्रवर्णाच्च ब्रह्मणोंऽश एव जीवः ।

'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् । तस्यावयवभूतेन व्याप्तं सर्वमिदं जगत्' ॥ इति श्रुतिः प्रकृतित्वं मायायास्तद्विशिष्टत्वं महेश्वरस्य तदवयवभूतत्वं सर्वस्य जगतः प्रकटयति । ततो मायिनः परमेश्वरस्यावयवलेशः पुरुषः ॥

॥ सू ॥ अपि च स्मर्यते ॥ ४४ ॥

'आत्मा तस्याष्टमी मूर्तिः शिवस्य परमात्मनः । व्यापिकेतरमूर्तीनां विश्वं तस्माच्छिवात्मकम् ॥' इति स्मरणाच्च शिवस्य मूर्त्येकदेश आत्मा ॥

॥ सू ॥ प्रकाशादिवत्तु नैवं परः ॥ ४५ ॥

ब्रह्मणोंऽशत्वेऽपि जीवस्य जीवो यत्स्वरूपो यत्स्वभावश्च नैवं परमेश्वरः, किंतु सर्वज्ञत्वादियुक्त एव । कथम् ? प्रकाशादिवत् । प्रकाशविशिष्टानां मणिप्रभृतीनां प्रकाशो विशिष्टैकदेशो यथांशः, तद्वज्जीवशरीरतया जीवविशिष्टस्य ब्रह्मणोंऽशो जीवः । आदिशब्दाद्विशेषणतैकस्वभावा जातिगुणादयो गृह्यन्ते ।

ष्टरूपत्वाभ्युपगमेन भेदाभेदश्रुत्योरुभयोरपि मुख्यत्वसमर्थनसंभवे क्वचिदपि नामुख्यत्वमाश्रयणीयम् । अभेदश्रुतिमुख्यत्वाश्रयणे च न केवलं भेदश्रुतिविरोधमात्रं किं तु नाहं सर्वज्ञ इत्यादिप्रमाणान्तरविरोधोऽपि दुर्वार इति । भाष्ये 'व्याप्यव्यापकभावेने' त्यस्यायमर्थः । कायव्यूहवतः काया इव परमेश्वरस्य जीवाश्शरीरत्वेन व्याप्याः व्यापनीयाः, परमेश्वरस्तान्सर्वान्व्याप्नुवन्व्यापकः इत्येवं रूपेण व्याप्यव्यापकभावेनेति । यथा वह्निना व्याप्तस्येति भाष्यस्यायमर्थः । शरीरशरीरिभावाभावेऽपि वह्निव्याप्तं काष्ठं निर्दिश्यायं वह्निरिति निरूढव्यवहारो दृश्यते । इह शरीरशरीरिभावस्यापि सत्त्वादयं ब्राह्मण इत्यादिव्यपदेशव 'दयमात्मा ब्रह्मे' ति व्यवहारस्सुतरामुपपद्यत इति । सू ॥ मन्त्रवर्णात् ॥ ४३ ॥ उदाहृतपुरुषसूक्तमन्त्रस्य मन्त्रांतरैकार्थ्येन परमेश्वरपरत्वं स्पष्टयितुं मन्त्रांतरमुदाहरति–मायां त्विति । सू ॥ अपि च स्मर्यते ॥ ४४ ॥ इतरमूर्तयः क्ष्मादाद्यचेतनमूर्तयः तासामभिमानित्वेन जीवरूपा मूर्तिर्व्यापिकेत्यर्थः ॥ सू ॥ प्रकाशादिवत्तु नैवं परः ॥ ४५ ॥ यथा विशेषणं विशिष्टैकदेशतया तदंशस्तथा विशेष्यमपि । तथा चांशत्वाविशेषाज्जीवब्रह्मणोस्साम्यमेव भवेत् किञ्चिद्ज्ञत्वसर्वज्ञत्वनियम्यनियामकत्वादिवैषम्यं न स्यादिति शङ्कां दृष्टान्तमुखेन निराकर्तुमिदं सूत्रमित्यभिप्रेत्य व्याचष्टे–ब्रह्मण इति । स्वरूपभेदो जीवब्रह्मणोर्वैलक्षण्यं लौकिकानामन्यविशेषणतैकस्वभावानां प्रकाश-

विशेषणानां विशिष्टैकदेशतया तदंशत्वेऽपि स्वरूपभेदो न विरुद्धः, 'य आत्मनि तिष्ठन्' इत्यादिश्रुतेः ॥

॥ सू ॥ स्मरन्ति च ॥ ४६ ॥

'विग्रहं देवदेवस्य जगदेतच्चराचरम् । एतमर्थं न जानन्ति पशवः पाशगौरवात् ॥' इत्यादि । ततो ब्रह्मणोंऽश एव जीवः । तद्विशिष्टतया स्वरूपभेदश्च सिद्धः ॥

॥ सू ॥ अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत् ॥ ४७ ॥

सर्वेषां जीवानां ब्रह्मांशत्वेऽपि कथं कस्यचिद्वेदादिष्वनुज्ञा, कस्यचित् परिहार इति चेत्—ब्राह्मणदेहादिसंबन्धात् तदुपपत्तिः, यथाग्न्यादेः श्रोत्रियागारश्मशानादिसंबन्धात्तद्वत् ॥

॥ सू ॥ असंततेश्चाव्यतिरेकः ॥ ४८ ॥

असंततिरव्याप्तिः । प्रतिशरीरं भिन्नत्वात् तत्रतत्राणुत्वेनावच्छिन्नत्वादसंततेरव्याप्त्या च स्थूलोऽहं कृशोऽहं सुख्यहं दुःख्यहं ब्राह्मणोऽहं क्षत्रियोऽहमिति देहाभिमानिनां ज्ञानसुखाद्यव्यतिरेको भवति । किमुक्तं भवति ? देहाभिमानिनां व्याप्त्यभावस्य समानत्वात् परिच्छिन्नज्ञानसुखादिकं सांसारिकमेक-

---

जातिगुणानां विशेष्यमपि लौकिकमिति नियमदर्शनादलौकिकमीश्वरं प्रति लौकिकस्य विशेषणत्वं न युक्तमित्याशङ्कानिराकरणार्थमुत्तरसूत्रम्—सू ॥ स्मरन्ति च ॥ ४६ ॥ येषां विशेषणतैकस्वभावत्वमपि लोकसिद्धं तेषामेव विशेष्यस्य लोकसिद्धत्वनियम इत्यभिप्रेत्य तथा नियमसंकोचापादिनीं स्मृतिमुदाहरति—विग्रहमिति । ननु, सर्वेषामात्मनामीश्वरविग्रहत्वाविशेषे कथं ब्राह्मणादीनां वेदाध्ययनादिष्वनुज्ञा शूद्रादीनां तत्परिहार इत्याशङ्कानिराकरणार्थं सूत्रम्—सू ॥ अनुज्ञापरिहारौ देहसंबंधाज्ज्योतिरादिवत् ॥ ४७ ॥ यथाग्न्यादेरिति । अग्न्युदकादीनां येषां श्रोत्रियागारस्थितिदशायां कर्मार्हत्वं तेषामेव हि श्मशानादिदेशं प्राप्तानां कर्मानर्हत्वं दृष्टमेवमात्मनां ब्राह्मणादिदेहेषु स्थितिदशायामनुज्ञा, शूद्रादिदेहस्थितिदशायां परिहारश्चेत्युपपद्यत इत्यर्थः । सू ॥ असन्ततेश्चाव्यतिरेकः ॥ ४८ ॥ नन्वीश्वरविग्रहत्वाविशेषेऽपि ब्राह्मणादीनां शूद्राद्यलभ्यवेदाध्ययनाद्यनुज्ञावत्तदलभ्यनिरतिशयज्ञानसुखादिप्राप्तिरपि किं न स्यात्तेषां तत्प्राप्त्यभावे मुक्तानां वा तत्प्राप्तिः कथं स्यादविशिष्टाः खल्वीश्वरविग्रहत्वेन बद्धा मुक्ताश्चेति शंकाद्वयस्य श्रुत्यर्थाभ्यां निराकरणार्थमिदं सूत्रम् । तत्र प्रथमशङ्कानिराकरणप्रकारं दर्शयन् सूत्रं व्याचष्टे । असन्ततिरिति । चकारसमुच्चेयं हेतुद्वयं दर्शयति—प्रतिशरीरमिति । अत्रायमाशयः । प्रतिप्राणिव्यवस्थितानां ज्ञानादिगुणानां[1] सर्वेषामप्युपलब्ध्यनुपलब्धिसूत्रोक्तरीत्या ब्राह्मणादिगतज्ञानसुखादिजनकत्वापादनेन तेषां सर्वविधज्ञानसुखादिप्राप्तिराशंक्यते उत मुक्तानां यादृशी निरतिशयज्ञानसुखादिप्राप्तिः तादृशी तेषामाशंक्यते । आद्ये प्रतिप्राणिव्यवस्थितज्ञानसुखादिकारणसाधारण्यापादनं सर्वशरीरेष्वात्मैकत्वे जीवानां विभुत्वे तदीयचिच्छक्तिव्याप्तौ वांगीक्रियमाणायां शक्यं कर्तुम् । न चैतत्त्रयमंगीक्रियते । अतः प्रतिशरीरं भिन्नानां तत्र तत्रैव शरीरे व्यवस्थितानां तत्तच्छरीरानति-

---

१ 'कारकाणां' इति ख पाठः ।

प्रकारकमेवासंकीर्णं भवतीति । अनेन परब्रह्मज्ञानविशेषेण विगलितदेहाभिमानानां महाव्याप्त्या पराहंभावमुपगतानां मुक्तात्मनां निरतिशयत्वेन नित्यत्वेन च ज्ञानादीनां स्वाभाविकानां सांसारिकज्ञानादितो व्यतिरेक इति सिद्धम् ॥

अज्ञानोपाधिभ्यां ब्रह्मैव संबध्यत इति यदुक्तं, तत्र न व्यवस्थेत्याह—

॥ सू ॥ आभासा एव च ॥ ४९ ॥

सत्यमिथ्योपाधिभ्यां बद्धस्य ब्रह्मण एव जीवभाव इति पक्षद्वयेऽपि युक्तय आभासा एव ॥

तथा हि—

॥ सू ॥ अदृष्टानियमात् ॥ ५० ॥

सत्यमिथ्योपाधिकृतत्वे ह्यात्मनां ब्रह्मण एवाज्ञानमुपाधिश्चेति तत्कृतेनादृष्टेनापि न नियमः ॥

किं च—

॥ सू ॥ अभिसंध्यादिष्वपि चैवम् ॥ ५१ ॥

अदृष्टहेतुभूताभिसंध्यादिषु चैवमेव नियमाभावः ॥

लंधिचिच्छक्तिव्याप्तिकानां ब्राह्मणादीनां ज्ञानसुखादेः शूद्रादिगतज्ञानसुखाद्यव्यतिरेकस्तद्वैरूप्यमेव भवति। यथा शूद्रादीनां ज्ञानसुखादिकं यथाकारणलाभं परिमितं भवति तथैव ब्राह्मणादीनामपि भवतीति यावत् । अतः प्रथमकल्पो न संभवति । द्वितीयकल्पस्तु बद्धानां मलावृतचिच्छक्तिकत्वान्न संभवति । अत एव बद्धमुक्तसाम्यापादनरूपा द्वितीयशंकापि न प्रवर्तते । परमेश्वरसाक्षात्कारसंपन्नां चिच्छक्तिव्याप्तिमुपगतानां हि मुक्तानां ज्ञानसुखादिकमभिव्यक्तं परिमितात्सांसारिकज्ञानसुखैश्वर्यादितो निरतिशयत्वेन विलक्षणमेव भवतीति । एवं बद्धानां ज्ञानसुखादिकं यथाकारणलाभं व्यवस्थितमेकप्रकारं भवति । मुक्तानां तु तत्स्वाभाविकमावरणापायादभिव्यक्तं निरतिशयत्वेन तद्विलक्षणं भवतीति व्यवस्थोपपादिता । एवं व्यवस्था मिथ्योपाध्यवच्छिन्नब्रह्मजीववादे सत्योपाध्यवच्छिन्नब्रह्मजीववादे च पूर्वपक्षिते न संभवतीति प्रतिपादनार्थत्वेन उत्तरसूत्राण्यवतारयति—अज्ञानेति । सू ॥ आभासा एव च ॥ ४९ ॥ असत्यमज्ञानं सत्यं शरीरान्तःकरणादिकं वोपाधिर्भवत् स्वयं भिन्नभिन्नमप्येकस्यैव ब्रह्मण उपाधिर्भवेत् । न तावता तदुपहितं ब्रह्म भिद्यते । न खलु दारुखण्डे निपतन्कुठारः दारुखण्डमिव ब्रह्मणि समवयन्नुपाधिर्ब्रह्म भिनत्ति । तथा च भोगानाश्रयाणामुपाधीनां भेदेऽपि विचित्रभोगाश्रयस्यैकत्वेन भोगसांकर्यमपरिहार्यमिति । इत्येवं तदसांकर्योपपादकयुक्तय आभासा इति भावः । अदृष्टादेर्भोगव्यवस्था भविष्यतीत्याशंकानिराकरणार्थान्युत्तरसूत्राणीति दर्शयति—तथा हीति । सू ॥ अदृष्टानियमात् ॥ ५० ॥ अदृष्टमप्यज्ञानाद्युपाधिभिरुपहितस्यैकस्यैव ब्रह्मणो धर्मो भवन्न व्यवस्थापकमित्यर्थः । सू ॥ अभिसन्ध्यादिष्वपि चैवम् ॥ ५१ ॥ अदृष्टहेतुसंकल्पानुष्ठानशरीरादिप्रतिनियमाद्व्यवस्था भविष्यतीति शंकानिराकरणायादृष्टे दर्शितस्यानियमापादकन्यायस्य संकल्पादिष्वतिदेशार्थमिदं सूत्रम् । नन्वात्मप्रदेशव्यवस्थया

॥ सू ॥ प्रदेशादिति चेन्नान्तर्भावात् ॥ ५२ ॥

उपाधिसंबन्धिब्रह्मप्रदेशभेदात् व्यवस्थेति चेत्—न, उपाधिषु गच्छत्सु सर्वप्रदेशानां तदन्तर्भावात् । तस्मात् सत्यमिथ्योपाधिपरिच्छिन्नब्रह्मजीवत्वपक्षद्वयेऽपि न व्यवस्था संभवति । ततो ब्रह्मणोंऽशभूतो जीवस्तद्विशेषणैकस्वभाव इति युक्तमेव ॥

इत्यंशाधिकरणम् ॥ १२ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये

द्वितीयस्याध्यायस्य तृतीयः पादः ॥

भोगव्यवस्था भविष्यतीति शङ्कानिराकरणार्थमुत्तरसूत्रम्—सू ॥ प्रदेशादिति चेन्नान्तर्भावात् ॥ ५२ ॥ ब्रह्मणः प्रदेशाश्शरीरान्तर्भूता एव भोगाश्रया वाच्याः । तदन्तर्भूतप्रदेशास्तु न व्यवस्थिताः । प्रायः सर्वेषामपि प्रदेशानां संचरत्सु तेषु तेषु शरीरेष्वन्तर्भावात् । तथा च ब्रह्मप्रदेशव्यवस्थया भोगव्यवस्थोपपादनमपि विवक्षितम् । विवेकेन शरीरव्यवस्थयैव तदुपपादनं पर्यवस्यति । शरीरव्यवस्था च पूर्वसूत्रेण निराकृता । ब्रह्मोपाधिभूतानि सर्वाण्यपि शरीराणि ब्रह्मात्मकसर्वजीवसाधारण्यात् न कस्यचित्किंचिदिति व्यवस्थितानि भवेयुरिति । तस्मात्सर्वगतात्मपक्ष इवैकात्म्यपक्षेऽपि भोगव्यवस्था दुरुपपादेति भावः ॥

इति श्रीशिवातिवादिमूर्धन्यशिवदर्शनस्थापनधुरन्धरसकलदेवभूदेवप्रतिष्ठापकश्रीमच्चिन्नबोम्मभूपालहृदयकमलकुहरविहरमाणश्रीसाम्बशिवप्रेरितस्य श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीविश्वजिद्याजिश्रीरंगराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ श्रीकण्ठाचार्यविरचितब्रह्ममीमांसाभाष्यव्याख्यायां शिवार्कमणिदीपिकाख्यायां द्वितीयस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

नयमणिमालायाम् अथ अंशाधिकरणम् ॥ १२ ॥

सू ॥ अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥ ४२ ॥ मन्त्रवर्णाच्च ॥ ४३ ॥ अपि च स्मर्यते ॥ ४४ ॥ प्रकाशादिवत्तु नैवं परः ॥ ४५ ॥ स्मरन्ति च ॥ ४६ ॥ अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत् ॥ ४७ ॥ असंततेश्चाव्यतिरेकः ॥ ४८ ॥ आभास एव च ॥ ४९ ॥ अदृष्टानियमात् ॥ ५० ॥ अभिसंध्यादिष्वपि चैवम् ॥ ५१ ॥ प्रदेशादिति चेन्नान्तर्भावात् ॥ ५२ ॥

जीवो ब्रह्माभिन्नस्तत्त्वमसीत्यादिवचनतात्पर्यात् । जलचंद्रवदेकत्राप्युपाधिभेदेन कल्पितो भेदः ॥ १५० ॥

आत्मनि तिष्ठन्नित्याद्याम्नानाद्भिन्न एव तस्यांशः । वह्निव्याप्तेंधनवत्तद्व्याप्तत्वादभेदगीरस्मिन् ॥ १५१ ॥

इत्यंशाधिकरणम् ॥ १२ ॥

इति श्रीमदप्पयदीक्षितकृतौ चतुर्मतसारसंग्रहे नयमणिमालाख्ये तृतीयपरिच्छेदे द्वितीयस्याध्यायस्य तृतीयः पादः ॥ ३ ॥ ॥ ॥ ॥ ॥ ॥

सूत्रार्थचन्द्रिकायाम्

अथ अंशाधिकरणम् ॥ १२ ॥

सू ॥ अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥ ४२ ॥ मंत्रवर्णाच्च ॥ ४३ ॥ अपि च स्मर्यते ॥ ४४ ॥ प्रकाशादिवन्नैवं परः ॥ ४५ ॥ स्मरंति च ॥ ४६ ॥ अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत् ॥ ४७ ॥ असन्ततेश्चाव्यतिरेकः ॥ ४८ ॥ आभास एव च ॥ ४९ ॥ अदृष्टानियमात् ॥ ५० ॥ अभिसंध्यादिष्वपि चैवम् ॥ ५१ ॥ प्रदेशादिति चेन्नान्तर्भावात् ॥ ५२ ॥

भगवत्पादमते, इत्थं नित्यत्वं स्वप्रकाशत्वं व्यापित्वमकर्तृत्वं चात्मनोऽभिधाय अत्र तस्य ब्रह्मैक्यं साधयति–**अंशो नानेत्यादिना ।** अत्र 'तत्त्वमसी' त्याद्यभेदश्रुतिजातस्य 'य आत्मनि तिष्ठ'न्नित्यादिभेदश्रुतिजातेन विरोधोऽस्ति न वेति **संदेहः ।** जीवेश्वरयोः पूर्वोक्तोपकार्योपकारकभावस्य स्वामिभृत्यवद्भेदाधीनसंबन्धसापेक्षत्वात्तदभेदश्रुतिजातेन विरोधोऽस्तीति **पूर्वपक्षः । सिद्धान्तस्तु,** अविद्यानिमित्तजीवभावव्युदासेन ब्रह्मभावमेव जीवस्य प्रतिपादयतस्तत्त्वमस्यादिश्रुतिजातस्य आविद्यकभेदानुवादिश्रुतिजातेन न विरोध इति । **सूत्रार्थस्तु,** जीवः ईश्वरस्यांश **इवांशः** न तु स्वाभाविकोंऽशः । तस्य 'निष्कल' मित्यादिना निरंशत्वश्रवणात् । अतः कल्पितांशो जीवः । कुतः । **नानाव्यपदेशात्**='य आत्मनि तिष्ठ'-न्नित्यादिना तयोर्नानात्वस्य च व्यपदेशात् । **अन्यथा चापि**=अनानात्वस्यापि व्यपदेशात् । तथा हि–**एके**=शाखिन आथर्वणिकाः 'ब्रह्म दाशा ब्रह्म दासा ब्रह्म कितवा' इति **दाशकितवादित्वमधीयते**=आमनन्तीत्यतोऽनानात्वस्य च व्यपदेशः । अतः भेदवादिश्रुतिजातस्य प्रत्यक्षसिद्धभेदानुवादेनाभेदपरत्वात्कल्पितभेदवानंशो जीव इत्यर्थः ॥ किं च ।

सू ॥ मन्त्रवर्णाच्च ॥ ४३ ॥ 'पादोऽस्य विश्वा भूतानि' इति मंत्रवर्णात्परमेश्वरस्याविद्याकल्पितपादोंऽशो भूतशब्दवाच्यो जीव इति गम्यते ॥ किं च ॥ **सू ॥ अपि च स्मर्यते ॥ ४४ ॥** 'ममैवांशो जीवलोके जीवभूतस्सनातनः ।' इति भगवद्गीतासु चेश्वरस्याविद्याकल्पितोंऽशो जीव इति स्मर्यते ॥

ननु जीवस्येश्वरांशत्वे तद्दुःखेनेश्वरस्य दुःखित्वं स्यादित्यत आह–**सू ॥ प्रकाशादिवन्नैवं परः ॥ ४५ ॥** यथा जीवोऽविद्यावशाद्देहाद्यात्मभावमिव गतोऽहं दुःखीत्यभिमन्यते **नैवं परः**=ईश्वरो नैवं भवति । किंवत् । **प्रकाशादिवत्**=यथा सौरश्चांद्रो वा प्रकाशो नभो व्याप्य वर्तमानो वक्रकाष्ठाद्युपाधिकृतवक्रभावमिवापन्नोऽपि न वस्तुतो वक्रभावमापद्यते तद्वत् । जीवोऽपि न परमार्थतो दुःखित्वमभिमन्यत इत्यर्थः ॥

सू ॥ स्मरन्ति च ॥ ४७ ॥ 'तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृतः । न लिप्यते फलैश्चापि पद्मपत्रमिवांभसा ॥' इत्यादिभिर्व्यासादय ईश्वरस्य सांसारिकदुःखासंस्पर्शित्वं स्मरन्तीत्यर्थः ॥

ननु, 'नान्योऽतोऽस्ति द्रष्टे' त्यादिना आत्मभेदमात्रनिषेधात् 'मित्रं सेव्यं' 'शत्रवः परिहर्तव्याः' इत्याद्यनुज्ञापरिहारौ कथं स्यातामित्यत आह–**सू ॥ अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत् ॥ ४८ ॥** सर्वत्रात्मनोऽखण्डैकरसत्वेऽपि उक्तावनु**ज्ञापरिहारौ । देहसंबन्धात्**=देहतादात्म्यसंबन्धात्संगच्छेते । कथम् । **ज्योतिरादिवत्**=यथा ज्योतिषोऽग्नेरेकत्वेऽपि श्मशानाग्निः परिहार्यो नेतरस्तद्वदात्मापीत्यर्थः ॥

नन्वेवमपि स्वाम्येकत्वात्कर्मफलसंकरः स्यादित्याह–**सू ॥ असंततेश्चाव्यतिकरः ॥ ४९ ॥ अव्यतिकरः**=कर्मफलसंबन्धस्यासंकरः । कुतः । **असंततेः**=उपाधिपरिच्छिन्नस्यात्मनः सर्वैः शरीरैरसंबन्धादित्यर्थः ॥

किं च ॥ सू ॥ आभास एव च ॥ ५० ॥ आभास एवैष जीवः परस्यात्मनः सूर्यप्रतिबिंबवत् । ततश्च यथैकस्मिन्प्रतिबिंबे कम्पमाने प्रतिबिंबांतरं न कम्पते तथा एकस्मिञ्जीवे कर्मफलसंबन्धिनि न जीवान्तरस्य तत्संबन्ध इति भावः । स्वाभाविकात्मनानात्ववादे तु तत्संकरो दुर्वार इति दिक् ॥

ननु नानात्ववादे अदृष्टनियमात्कर्मफलनियम इति चेत् तत्राह–**सू ॥ अदृष्टानियमात् ॥ ५१ ॥** सांख्यमते प्रधानसमवेतस्यादृष्टस्य सर्वात्मसाधारण्यात् न्यायमतेऽप्यदृष्टहेतुमनस्संयोगस्य सर्वाविशेषाच्च अदृष्टनियमाभावात्फलानियम इत्यर्थः ॥

नन्वहमिदं फलं प्राप्नवानीत्यभिसंध्यादयः प्रत्यात्मनियताः अदृष्टनियमहेतवो भविष्यंतीत्यत आह–**सू ॥ अभिसंध्यादिष्वपि चैवम् ॥ ५२ ॥** साधारणमनस्संयोगसाध्येष्वभिसंध्यादिष्वपि च । **एवम्**=अदृष्टनियमहेतुत्वाभावात्स दोषस्तदवस्थ एव ॥

सू ॥ प्रदेशादिति चेन्नान्तर्भावात् ॥ ५३ ॥ प्रदेशादिति चेत्=आत्मनां विभुत्वेऽपि स्वस्वशरीरावच्छिन्न एवात्मप्रदेशे मनस्संयोग इति भवत्यभिसंध्यादिनियम इति चेत् । **न । अन्तर्भावात्**=सर्वात्मनां सर्वशरीरेष्वन्तर्भावात् । नियामकाभावेन प्रदेशकल्पना न संभवतीत्युक्तसंकरस्तदवस्थ एव । अस्मत्पक्षे जीवभेदस्याविद्यकत्वे न संकरः ॥ तथा च 'तत्त्वम'-स्याद्यभेदश्रुतिजातस्य आविद्यकभेदानुवादिश्रुतिजातेन न विरोध इति सिद्धम् । तदेवं भूतभोक्तृविषयश्रुतीनां मिथो विरोधाभावेन प्रामाण्याद्ब्रह्मणि समन्वयस्सिद्ध इत्यनवद्यम् ॥ अस्मिन्मते अत्र पादे त्रिपंचाशत्सूत्राणि । अधिकरणानि तु त्रयोदश ।

श्रीकण्ठमते, पूर्वत्र नित्यो ज्ञाताणुः कर्ता परमेश्वरायत्तप्रवृत्तिर्जीव इति निरूपितम् । अधुना स किं परमेश्वर एव । किं वा तदंशभूतः इति **संशयः** । परमेश्वर एव बहुविधोपाधिवशाज्जीवभावमुपगतः 'अयमात्मा ब्रह्म' इति श्रुतेः इति **पूर्वपक्षः । सिद्धान्तस्तु** 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' य आत्मनि तिष्ठन्' 'पृथगात्मानं प्रेरितारं च मत्वा' इत्यादिषु नानाव्यपदेशात् जीवात्मा परमेश्वरस्यांशो मूर्त्येकदेश एवेति । **सूत्रार्थस्तु** जीवः **अंशः**=परमेश्वरस्यांशः । कुतः । **नानाव्यपदेशात् । अन्यथा चापि**='तत्त्वमसि' 'अयमात्मा ब्रह्म' इत्यादिकाद्व्यपदेशाज्जीवब्रह्मणोर्व्याप्यव्यापकभावेनानन्यत्वमपि युक्तम् । तथैवानन्यत्वं 'ब्रह्म दाशा ब्रह्म दासा' इत्यादिना एके शाखिनोऽधीयते । इति ।

सू ॥ **मंत्रवर्णात्** ॥ ५४ ॥ 'पादोऽस्य विश्वा भूतानि' इति मंत्रवर्णाच्च ब्रह्मणोंऽश एव जीवः । इति ॥

किं च ॥ सू ॥ **अपि च स्मर्यते** ॥ ४४ ॥ 'आत्मा तस्याष्टमी मूर्तिश्शिवस्य परमात्मनः । व्यापिकेतरमूर्तीनां विश्वं तस्माच्छिवात्मकम् ॥' इति स्मरणाच्च शिवस्य मूर्त्येकदेश एव जीव इति ॥

सू ॥ **प्रकाशादिवत्तु नैवं परः** ॥ ४५ ॥ जीवस्य ब्रह्मणोंऽशत्वेऽपि जीवो यत्स्वरूपो यत्स्वभावश्च **नैवं परः**=परमेश्वरो नैवंरूपो भवति किं तु सर्वज्ञत्वादियुक्त एव । कथम् । **प्रकाशादिवत्**=प्रकाशवतां मणिप्रभृतीनां प्रकाशजातिगुणादयो यथांशाः तद्वत् जीवशरीरतया जीवविशिष्टस्य ब्रह्मणोऽशो जीव इत्यर्थः ॥

सू ॥ **स्मरन्ति च** ॥ ४६ ॥ 'विग्रहं देवदेवस्य जगदेतच्चराचरम्' इत्यादिना जीवस्य ब्रह्मांशत्वं मुनयोऽपि स्मरंतीत्यर्थः ॥

सू ॥ **अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत्** ॥ ४७ ॥ **अनुज्ञापरिहारौ**=वेदादिष्वधिकारविधिनिषेधौ । **देहसंबन्धात्**=ब्राह्मणादिदेहसंबंधादुपपद्येते । इतरत्समानं शांकरमतेन ॥

सू ॥ **असंततेश्चाव्यतिरेकः** ॥ ४८ ॥ जीवानां प्रतिशरीरं भिन्नत्वादणुत्वेन तत्रतत्रावच्छिन्नत्वात् अव्याप्तेश्च । **अव्यतिरेकः**=ज्ञानसुखाद्यवैरूप्यमेव स्यादित्यर्थः ।

सू ॥ **आभासा एव च** ॥ ४९ ॥ अज्ञब्रह्मवादे उपहितब्रह्मवादे च युक्तय आभासा एवेत्यर्थः । बहुवचनान्ततया पाठो विशिष्टोऽत्र शांकरमतात् ॥

तथा हि–सू ॥ **अदृष्टानियमात्** ॥ ५० ॥ आत्मनां सत्यमिथ्योपाधिकृतत्वे अदृष्टमप्यज्ञानाद्युपाधिभिरुपहितस्यैव ब्रह्मणो धर्मो भवन्न व्यवस्थापकं स्यादित्यर्थः ॥

किंच । **अभिसंध्यादिष्वपि चैवम्** ॥ ५१ ॥ अदृष्टहेतुभूताभिसंध्यादिषु चैवमेव नियमाभावः ॥

सू ॥ **प्रदेशादिति चेन्नान्तर्भावात्** ॥५२॥ **प्रदेशादिति चेत्**=उपाधिसंबन्धिब्रह्मप्रदेशानुपहितब्रह्मप्रदेशस्य भिन्नतया सा व्यवस्थोपपद्येतेति चेत् । न । कुतः । **अन्तर्भावात्**=उपाधिषु गच्छत्सु सर्वप्रदेशानां तदन्तर्भावात् । तस्मात्सत्यमिथ्योपाधिपरिच्छिन्नब्रह्मजीवत्वपक्षद्वयेऽपि व्यवस्था न संभवति । ततो ब्रह्मणोंऽशभूतो जीवस्तद्विशेषणैकस्वभाव इति युक्तमेव ॥ अस्मिन्**मते द्विपञ्चाशत्**सूत्राणि अधिकरणानि **द्वादश** ॥

रामानुजमते, संदेहपूर्वपक्षादिकं सर्वं प्रायोऽविशिष्टमेव श्रीकण्ठमतात् । **'स्मरन्ति च' 'अपिच स्मर्यते'** इत्यादिसूत्रेषु विष्णुपराणि वचनान्युदाहृतानीति पूर्वस्माद्विशेषः । **'असंततेश्चाव्यतिकरः'** इति शांकरमतवदेवात्र सूत्रपाठः । **अव्यतिकरः**=असांकर्यमिति च तदर्थः ॥ अधिकरणानि **सप्ते**ति च विशेषः पूर्वस्मात् ॥

आनन्दतीर्थमते, 'अंशो नानाव्यपदेशा' दित्यादिक **'माभास एव चे'** त्यन्तं सूत्राष्टकमंशाधिकरण **'मदृष्टानियमा'** दित्यादिकमधिकरणान्तरमिति च विशेषः पूर्वस्मात् । अत्र जीवस्य परमेश्वरांशत्वानंशत्वविचारेण तद्विषय श्रुतिविरोधः परिहियते । **संदेहपूर्वपक्षा**दिकस्य जीवस्येश्वरांशत्वानंशत्वविषयतया नास्ति विशेष इति **सूत्रार्थः** परमत्र निरूप्यते–सू ॥ **अंशो नानाव्यपदेशादिति** ॥ ४३ ॥ **अंशः**=जीवः परमात्मनोंऽश एव पितापुत्रत्वादिसंबन्धेन केवलं तदुपजीवकत्वेन तच्छेषभूत इत्यर्थः । कुतः । **नानाव्यपदेशात्**='मां रक्षत्वि' त्यादौ पितृत्वभ्रातृत्वादिनानाप्रकारेण जीवस्येशसंबन्धित्वोक्तेः । किंच । यतः **एके**=शाखिनः 'अन्यः परोऽन्यो जीव' इत्यादिना एनं जीवं परा**दन्यथा चापि**=भिन्नत्वेना**धीयते**=पठन्ति । यतः अन्ये च शाखिनः । **दाशकितवादित्वम्**='ब्रह्म दाशा' इत्यादिना ब्रह्मणस्तत्तज्जातिविशेषरूपत्वेन तदभेदं चाधीयते । अतो जीवस्तदंशभूत इत्यर्थः ॥

किंच ॥ मंत्रवर्णात् ॥ ४४ ॥ 'पादोऽस्ये' ति श्रुतेश्च जीवः परमात्मांश इत्यर्थः ॥

सू ॥ **अपि च स्मर्यते** ॥ ४५ ॥ जीवस्यांशत्वं कृष्णादिभिः 'ममैवांश' इत्यादिना कथ्यते चेत्यर्थः ॥

सू ॥ **प्रकाशादिवन्नैवं परः** ॥ ४६ ॥ जीवः **प्रकाशादिवत्**=खद्योताद्यभिमानितेजोंऽशवत् परमात्मनो भिन्नांशः । **परः**=मत्स्यरूपी विष्णुस्तु । **नैवम्**=जीववद्भिन्नांशो न । किं तु **प्रकाशादिवत्**=कालाग्न्याद्यभिमानितेजोंऽशवत् ईशाभिन्नांश एवेत्यर्थः ॥

सू ॥ **स्मरंति च** ॥ ४७ ॥ स्मर्तारो जीवेशयोर्भिन्नांशत्वाभिन्नांशत्वे 'एते स्वांशकला' इत्यादिस्मृत्या कथयन्ति चेत्यर्थः ॥

सू ॥ अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत् ॥ ४८ ॥ यतो **ज्योतिरादिवत्**=चक्षुर्गोलकादिस्थितापभ्रष्टदेवतादेस्तत्तद्देहसंबन्धात्सूर्यवरुणाद्यनुज्ञया तत्प्रवृत्त्यादेरिव जीवस्यापि **देहसंबन्धात्**=तत्तद्देहसंबन्धाद्धेतोः परमात्मन एव **अनुज्ञापरिहारौ**=प्रवृत्तिर्बन्धनिवृत्तिश्च प्रतीयते । न तथा मत्स्यादेः । अतोऽपि जीवः परमात्मनो भिन्नांशः मत्स्यादिस्त्वभिन्नांश इति व्यवस्था सिद्धेत्यर्थः ॥

सू ॥ असन्ततेश्चाव्यतिकरः ॥ ४९ ॥ असंततेश्च=जीवस्य सम्यक्शक्त्यभावात् मत्स्यादीनां तु तद्भावात् । **अव्यतिकरः**=जीवेशयोर्भिन्नाभिन्नांशत्वमित्युक्तार्थस्य व्यत्यासाभाव इत्यर्थः ॥

सू ॥ आभास एव च ॥ ५० ॥ चस्समुच्चये । यतो जीवः परस्याभास एव प्रतिबिंब एव मत्स्यादिस्तु न तथा । अतोऽप्युक्तस्य न व्यत्यास इत्यर्थः ॥ **इत्यंशाधिकरणम् ॥ १८ ॥**

अथादृष्टाधिकरणम् ॥ १९ ॥

सू ॥ अदृष्टानियमात् ॥ ५१ ॥ अत्राधिकरणे जीवानामीश्वरप्रतिबिंबत्वतदभावश्रुत्योर्विरोधः परिह्रियते । जीवानामीश्वरप्रतिबिंबत्वं वा तदभावो वेति **संदेहः** । तेषामीश्वरैकप्रतिबिंबत्वे परस्परवैचित्र्यानुपपत्तेर्न प्रतिबिंबत्वमिति **पूर्वपक्षः । सिद्धान्तस्तु,** अभेदेऽपि विशेषबलाद्गुणगुणिभावादिवदुपाधिप्रतिबिंबभावोऽप्युपपद्यते । प्रतिबिंबत्वाभावश्रुतेस्तु स्वरूपातिरिक्तोपाधिमत्प्रतिषेधपरत्वात् जीवानां स्वरूपोपाधिकप्रतिबिंबत्वेन विचित्रादृष्टशालितत्तत्स्वरूपोपाधिवैचित्र्यात्तेषां वैचित्र्योपपत्तेश्चेति । **सूत्रार्थस्तु, अदृष्टानियमात्**=अदृष्टपदोपलक्षितविद्याकर्मसंस्काराणामनियमात् वैचित्र्यात् प्रतिबिंबभूतजीवानामपि देवदानवमानवादिवैचित्र्यं युज्यत इत्यर्थः ॥

सू ॥ अभिसंध्यादिष्वपि चैवम् ॥५२॥ यतोऽभिसंध्यादिषु कामक्रोधादिदोषेष्वपि च एवमदृष्टादिवैचित्र्यादेव वैचित्र्यं वाच्यम् । अत आवश्यकत्वाददृष्टादिवैचित्र्यमेव जीववैचित्र्यकारणम् । न दोषादिवैचित्र्यमित्यर्थः ॥

सू ॥ प्रदेशादिति चेन्नान्तर्भावात् ॥ ५३ ॥ ननु **प्रदेशात्**=स्वर्गभूम्यादिस्थानवैचित्र्यादेव सुरनरादिजनवैचित्र्यमस्तु नादृष्टवैचित्र्यात् **इति चेत् न** । कुतः । **अन्तर्भावात्**=स्थानवैचित्र्ये किं कारणमिति कारणान्वेषणे तत्कारणस्यादृष्टवैचित्र्य एवान्तर्भावात् । तद्रूपत्वादत आवश्यकत्वाददृष्टवैचित्र्यमेव सुरनरादिवैचित्र्यनियामकमित्यर्थः ॥ अत्र **पादे** अस्मिन्**मते त्रिपंचाशत्**सूत्राणि अधिकरणान्**येकोनविंशतिः** ॥ **इत्यानन्दतीर्थमतेऽदृष्टाधिकरणम् ॥ १९ ॥**

यं प्रासूत विशुद्धशीलमनघं वृद्धांबिकाख्या सती-
यं मृत्युञ्जयशर्मणो बुधमणेर्भाग्यं विदुस्साधवः ।
वाधूलान्वयजन्मनोऽस्य सुधियो हालास्यनाथाह्वय-
स्येयं सत्कृतिरेधतामिह चतुर्भाष्यानुगा चन्द्रिका ॥

सूत्रार्थचन्द्रिकायामविरोधाख्ये द्वितीयकेऽध्याये । **सृष्टिश्रुत्यविरोधापादक** आद्ये मतत्रये कथितः ॥
वियदादिभूतभोक्तॄनधिकुर्वन्पूर्तिमभ्यगात्पादः । **तार्तीयीको माध्वैः** प्रोक्तः **श्रुत्यविरोधपाद**शब्देन ॥

इति हालास्यनाथकृतौ सूत्रार्थचन्द्रिकायां द्वितीयस्याध्यायस्य तृतीयः पादः ॥ २ ॥ ३ ॥

श्रीः
शिवाभ्यां नमः ।
श्रीकण्ठाचार्यकृतौ

ब्रह्ममीमांसाभाष्ये

अथ द्वितीयस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥

अथ प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

॥ सू ॥ तथा प्राणाः ॥ १ ॥

पूर्वत्र भूतानि ब्रह्मण उत्पद्यन्त इति निरूपितम्, जीवो नित्य इति । इह भूतानामिवेन्द्रियाणां ब्रह्मण उत्पत्तिः, उत जीववन्नित्यत्वमिति विचार्यते । यथा नित्यत्वान्न जीवः समुत्पद्यते तथेन्द्रियाण्यपि । जीववदमीषामपि नित्यत्वे श्रुतिसंभवात् । तथा हि, 'असद्वा इदमग्र आसीत्' 'ऋषयो वाव ते अग्रे सदासन् । तदाहुः । के ते ऋषय इति । प्राणा वा ऋषयः' इति प्रलयकाले प्राणानां

शिवार्कमणिदीपिकायाम्

अथ द्वितीयस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥

अथ प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

कारणविषयश्रुतिविरोधसमाधानानन्तरं कार्यविषयश्रुतिविरोधसमाधित्सया तृतीयचतुर्थपादावारब्धौ । तत्र पारंपर्यक्रमाधिकरणोक्तरीत्या भूतसृष्टेः प्राथमिकत्वादाकाशादिभूतोत्पत्त्यनुत्पत्तिविषयश्रुतिविरोधसमाधानं तृतीयपादेन कृतम् । तत्र ब्रह्मव्यतिरिक्तस्याकाशादेः कृत्स्नस्य कार्यत्वे समर्थिते जीवस्य कार्यत्वेऽपि स्वरूपान्यथाभावलक्षणं कार्यत्वं नास्तीति विशेषो दर्शितः । तत्प्रसंगाज्जीवस्य ज्ञातृत्वादिविषयश्रुतीनामपि विरोधसमाधानं तृतीयपाद एव कृतम् । इदानीं जीवोपकरणभूतेन्द्रियमुख्यप्राणोत्पत्त्यनुत्पत्त्यादिविषयश्रुतिविरोधसमाधानार्थं चतुर्थः पाद आरभ्यते–सू ॥ तथा प्राणाः ॥ १ ॥ नन्विंद्रियाणामुत्पत्त्यनुत्पत्तिविचारो नोपपद्यते । 'प्रतिज्ञाहानिरव्यतिरेका'दिति वियदधिकरणसिद्धांतसूत्रोक्तरीत्या ब्रह्मव्यतिरिक्तस्य सर्वस्याप्युत्पत्तिनियमादित्याशंक्योत्पत्तिसामान्ये नियमेऽपि स्वरूपान्यथाभावोत्पत्तिनियमो नास्ति । तथाभूतोत्पत्तितदभावविषय एव विचारः करिष्यत इति दर्शयन्वृत्तमनुवदति–पूर्वत्रेति । श्रुतिविप्रतिपत्त्या संशयं दर्शयति–इहेति । सौत्रं तथाशब्दं विवृण्वन् पूर्वपक्षमाह–यथेति । ननु जीवेऽस्ति कृतहानाकृताभ्यागमप्रसंगरूपतर्कानुगृहीतत्वेनानन्यथासिद्धा नित्यत्वश्रुतिर्न तथेंद्रियेष्वस्ति । तन्नित्यत्वश्रुतिसद्भावे तस्या वाय्वाकाशामृतत्वश्रुतिवच्चिरकालावस्थायित्वपरतया योजयितुं शक्यत्वादित्याशङ्क्यानन्यथासिद्धां श्रुतिमुदाहरति–तथा हीति । इयं हि श्रुतिर्महाप्रलये प्राणानां स्थितिं वर्णयति । सा च ब्रह्मण इव प्राणानां नित्यत्वमन्तरेण नोपपद्यते । प्राणाश्चेंद्रियाण्येव । प्राणशब्दस्य 'प्राणमेवाभिसंविशंती'त्यादिश्रुत्यन्तरे ब्रह्मणि दृष्टप्रयोगत्वेऽपि तस्मिन्बहुवचनस्यानन्वयात् ऋषिशब्दस्य 'तस्यासते ऋषयस्सप्त तीरे' इती-

स्थितिराम्नायते । प्राणास्ततो ब्रह्मणो नोत्पद्यन्ते ॥

इति प्राप्ते ब्रूमः–

॥ सू ॥ गौण्यसंभवात्तत्प्राक्छ्रुतेश्च ॥ २ ॥

न प्राणानां सृष्टेः प्रागवस्थितिः, किंतु परमेश्वरस्यैव, 'सदेव सौम्येदमग्र आसीत्' इति श्रुतेः । ऋषिशब्दः प्राणशब्दश्च परमेश्वर एव वर्तते । तस्य बहुत्वासंभवात् बहुवचनश्रुतिस्तत्र गौणी । ततो ब्रह्मण एव प्रागवस्थितिर्नेन्द्रियाणाम् ॥

युक्त्यन्तरमाह–

॥ सू ॥ तत्पूर्वकत्वाद्वाचः ॥ ३ ॥

परमेश्वरसृष्टिपूर्वकत्वादितरेषां नामरूपयोगस्य । तदानीं प्राणशब्दो नेन्द्रियविषयः । ततो ब्रह्मैव पूर्वभावि ॥ इति प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

न्द्रियेष्वपि दृष्टप्रयोगत्वेन तेषु तदन्वयसंभवात् । 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च' इति इन्द्रियोत्पत्तिश्रुतिस्तु जीवोत्पत्तिश्रुतिवन्नेतव्येति भावः । पूर्वपक्षमुपसंहरति–प्राणा इति । सू ॥ गौण्यसंभवात्तत्प्राक्श्रुतेश्च ॥ २ ॥ साध्यनिर्देशपूर्वकं द्वितीयहेतुयोजनक्रमेण सूत्रं व्याचष्टे–न प्राणानामिति । बह्वीषु श्रुतिषु ब्रह्मण एव एकत्वावधारणसहितसृष्टिप्राग्भावश्रवणात् सृष्टिप्राग्भावरूपादनुत्पत्तिलिंगा 'देतस्माज्जायत' इत्याद्युत्पत्तिश्रुतेः प्रबलत्वात् इहापि सृष्टिप्राग्भावश्रुतौ प्रथमश्रुतस्य ऋषिशब्दस्य द्रष्टरि ब्रह्मण्येव स्वारस्यात् दर्शनकरणेषु ज्ञानेंद्रियेषु स्वारस्याभावात् कर्मेंद्रियेषु कथमप्यप्रवृत्तेश्च । बहुवचनस्य ब्रह्मण्यसंभवतः 'पाशा'निति बहुवचनस्य पाशावयवबहुत्वविषयतयेव ब्रह्मविशेषणबहुत्वविषयतयौपचारिकत्वोपपत्तेश्च 'प्राणा वा ऋषय' इति श्रुतिर्ब्रह्मविषयेति भावः । सू ॥ तत्पूर्वकत्वाद्वाचः ॥ ३ ॥ तच्छब्दार्थमाह–परमेश्वरसृष्टीति । 'वाच' इत्यस्यार्थमाह–नामरूपयोगस्येति । सौत्रहेतुं साध्ये संगमयति–तदानीमिति । जीवानां प्रलयेऽपि स्थितिरभ्युपगता । अन्यथा कृतहानादिदोषप्रसंगात् । प्राणानां स्थित्यनभ्युपगमे तु न किंचिद्बाधकमस्ति । अतस्तदंशे व्याकरणस्य सृष्टिपूर्वकत्वनियमो न बाधनीय इति भावः । इति प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

नयमणिमालायाम्

अथ द्वितीयस्याध्यायस्य तुरीयः पादः ॥

अथ प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

सू ॥ तथा प्राणाः ॥ १ ॥ गौण्यसंभवात्तत्प्राक्छ्रुतेश्च ॥ २ ॥ तत्पूर्वकत्वाद्वाचः ॥ ३ ॥

प्राणा नोत्पद्यन्ते नित्यास्ते जीववद्ज्ञेयाः । प्राणा वा ऋषय इति प्रलये तेषामवस्थितिश्रवणात् ॥ १५२ ॥

प्रागेकत्वावधृतेः प्राणानां सृष्टिवाक्यौघ । ब्रह्मपरमुक्तवाक्यं बहुवचनं पाशनीत्या स्यात् ॥ १५३ ॥

इति प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

सूत्रार्थचन्द्रिकायाम्

अथ द्वितीयस्याध्यायस्य तुरीयः पादः ॥

अथ प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

भगवत्पादमते, पूर्वस्मिन्पादे भूतभोक्तृश्रुतिविरोधः परिहृतः । अधुना भौतिकेन्द्रियादिश्रुतिविरोधं परिहर्तुं पादान्तरमारभ्यते । पूर्वाधिकरणे कर्तृस्वरूपावधारणेन बुद्धिस्थानां तदुपकरणानामिन्द्रियाणामुत्पत्तिं साधयति–**सू ॥ तथा प्राणाः ॥ १ ॥** अत्र 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' इत्यादीन्द्रियोत्पत्तिश्रुतेः 'ऋषयो वाव तेऽग्रेऽसदासीत्' इत्यादिप्रागुत्पत्तेरिन्द्रियसद्भावश्रुत्या विरोधोऽस्ति न वेति **संदेहः** । विरोधोऽस्तीति **पूर्वपक्षः** । **सिद्धान्तस्तु,** सृष्टेः प्रागिन्द्रियसद्भावश्रुतेर्हिरण्यगर्भात्मकावान्तरप्रकृतिविषयतया एकविज्ञानप्रतिज्ञानिर्वाहायोत्पत्तिश्रुतेर्मुख्यत्वाभ्युपगमावश्यंभावेन 'एतस्माज्जायते' इत्यादिवाक्ये खवाय्वादिषु मुख्यस्य जन्मवाचिपदस्यैव तदपेक्षया प्राचीनेषु प्राणादिष्वपि श्रवणेन च इन्द्रियोत्पत्तिश्रुतेर्गौणत्वासंभवात् 'तत्तेजोऽसृजते' ति श्रुतौ भूतमात्रोत्पत्तिश्रवणेऽपि 'अन्नमयं हि सोम्ये' त्यादिना मनःप्राणसहिताया वाचः ब्रह्मप्रकृतिकतेजोऽबन्नपूर्वकत्वाभिधानाच्च प्राक्सृष्टेरिन्द्रियसद्भावश्रुत्योत्पत्तिश्रुतेर्नास्ति विरोध इति । **सूत्रार्थस्तु, तथा**='एतस्माज्जायते' इत्युदाहृतवाक्यस्थाकाशादिवत् । **प्राणाः**=इन्द्रियाण्यपि जायन्ते । उत्पत्तिश्रुतेरविशेषादित्यर्थः ॥

सृष्टेः प्रागिन्द्रियसद्भावश्रवणादुत्पत्तिश्रुतिर्गौणी इति चेत्तत्राह–**सू ॥ गौण्यसंभवात् ॥ २ ॥** गौण्या उत्पत्तिश्रुतेरसंभवादित्यर्थः । अन्यथा एकविज्ञानप्रतिज्ञा हीयेतेत्यर्थः । सद्भावश्रुतिस्तु हिरण्यगर्भात्मकावान्तरप्रकृतिविषयेति न तयोत्पत्तिश्रुतेर्विरोध इति भावः ॥

इन्द्रियोत्पत्तिर्मुख्येत्यत्र हेत्वन्तरमाह–**सू ॥ तत्प्राक्श्रुतेश्च ॥ ३ ॥** 'एतस्माज्जायते' इत्यादिवाक्ये जन्मवाचिपदस्य खवाय्वादिषु मुख्यस्य तदपेक्षया प्राचीनेषु प्राणादिषु श्रवणाच्चेत्यर्थः ॥

ननु 'तत्तेजोऽसृजते' ति भूतमात्रोत्पत्तिश्रवणात्तत्कथमित्याशंक्याह–**सू ॥ तत्पूर्वकत्वाद्वाचः ॥ ४ ॥** यद्यपि भूतमात्रोत्पत्तिः पठ्यते । तथापि 'अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक्' इति मनःप्राणसहिताया वाचो ब्रह्मप्रकृतिकतेजोऽबन्नपूर्वकत्वाभिधानादस्त्युत्पत्तिश्रुतिरित्यतो न विरोध इति सिद्धम् ॥

श्रीकण्ठमते, अत्रापि इन्द्रियाणामुत्पत्त्यनुत्पत्तिविचार एव विषयः । यद्यपि संदेहपूर्वपक्षसिद्धान्तादिकं प्रायस्समानमेव । तथापि तन्निरूपणप्रकारवैलक्षण्येन सूत्रार्थवर्णनं भिद्यते । इह किं भूतानामिवेन्द्रियाणां ब्रह्मण उत्पत्तिः उत जीववन्नित्यत्वमिति **संदेहे** यथा नित्यत्वान्न जीवस्समुत्पद्यते तथेन्द्रियाण्यपि, जीववदमीषामपि नित्यत्वे श्रुतिसंभवादिति पूर्वपक्षनिरूपकतयाद्यं सूत्रं व्याख्यातमिति पूर्वस्माद्विशेषः । **तथा**=यथा नित्यत्वान्न जीवस्समुत्पद्यते तथा । **प्राणाः**=इन्द्रियाण्यपि नोत्पद्यन्त इति सूत्रार्थः । तथाहि–'असद्वा इदमग्र आसीत्' ऋषयो वाव ते अग्रे सदासन् । तदाहुः । के ते ऋषय इति । प्राणा वा ऋषयः' इति प्रलयकाले प्राणानां स्थितिराम्नायते । प्राणास्ततो ब्रह्मणो नोत्पद्यंत इति **पूर्वपक्षः** । **सिद्धान्तस्तु,** 'सदेव सोम्येदमग्र आसीत्' इति श्रुतेः प्राणानां सृष्टेः प्रागवस्थितिर्नास्ति । किं तु परमेश्वरस्यैव । ऋषिशब्दः प्राणशब्दश्च परमेश्वर एव वर्तते । तत्र बहुवचनश्रुतिः **गौणी** । कुतः । **असंभवात्**=तस्य बहुत्वासंभवात् । **तत्प्राक्श्रुतेश्च**=तस्य परमात्मनः प्रागवस्थानश्रुतेश्च । ततो ब्रह्मण एव प्रागवस्थितिर्नेन्द्रियाणामिति ॥ अत्र '**गौण्यसंभवात्तत्प्राक्श्रुतेश्चे**' त्येकं सूत्रम् । युक्त्यन्तरमाह–**सू ॥ तत्पूर्वकत्वाद्वाचः ॥ ३ ॥ वाचः**=परमेश्वरव्यतिरिक्तनामरूपयोगस्य । **तत्पूर्वकत्वात्**=परमेश्वरकर्तृकवियदादिसृष्टिपूर्वकत्वादित्यर्थः । तदानीं प्राणशब्दो नेन्द्रियविषयः । अतः परमात्मैव प्राणशब्दनिर्दिष्टः ॥ **इति प्राणोत्पत्त्यधिकरणम् ॥ १ ॥**

रामानुजमते संदेहपूर्वपक्षसिद्धान्तसूत्रार्थवर्णनादिकं सर्वमविशिष्टमेव श्रीकण्ठमतादिति न पृथक्प्रपञ्चमर्हति ॥

आनन्दतीर्थमते, अस्मिन्पादे सृष्टिश्रुतीनां युक्तिसहितश्रुतिविरोधः परिह्रियते । अत्रापि इन्द्रियाण्युत्पद्यन्ते वा न वेति **संदेहः** । 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च' इतीन्द्रियाणामुत्पत्तिश्रुतेः 'नोपादानं हीन्द्रियाणामतोऽनुत्पत्तिरिष्यते' इति स्मृत्युक्तयुक्तिसाहित्येन प्रबलया 'प्राणा एवानादयः प्राणा नित्या' इति कौषायणश्रुत्या बाधान्नोत्पद्यन्त इन्द्रियाणीति **पूर्वपक्षः** । **सिद्धान्तस्तु, सू ॥ तथा प्राणाः ॥ १ ॥** यथा वियदादय उत्पद्यंते तथा तन्न्यायेनैव इन्द्रियाण्यप्युत्पद्यंत इत्यर्थः ॥

सू ॥ गौण्यसंभवात् ॥ २ ॥ अनादित्वश्रुतिर्गौणानादित्वपरा । इन्द्रियाणां मुख्यानादित्वायोगात् इत्यर्थः ॥

सू ॥ प्रतिज्ञानुपरोधाच्च ॥ ३ ॥ इदं सूत्रमस्मिन्मत एव पठ्यते नान्यमतेषु ॥ 'स इदं सर्वमसृजते' ति प्रतिज्ञानुसाराच्चोत्पत्तिरिन्द्रियाणामङ्गीकर्तव्येत्यर्थः ॥ **इत्यानन्दतीर्थमते प्राणोत्पत्त्यधिकरणम् ॥ १ ॥**

अथ तत्प्रागधिकरणम् ॥ २ ॥

सू ॥ तत्प्राक्श्रुतेश्च ॥ ४ ॥ अत्र मनउत्पत्तिमद्वा न वेति **संदेहः** । 'द्विधा हैवेन्द्रियाणि नित्यान्यनित्यानि च । तत्र नित्यं मनोऽनादित्वात् । न ह्यमनाः पुमांस्तिष्ठत्यनित्यान्यन्यानि' इति गौपवनश्रुत्या सयुक्तिकया मनसोऽनुत्पत्तिरिति **पूर्वपक्षः** । **सिद्धान्तस्तु,** 'मनस्सर्वेन्द्रियाणि च' इति तस्य मनसस्तेभ्य इन्द्रियेभ्यः पूर्वमुत्पन्नत्वेन श्रवणात् 'तदनुत्पत्ति-

अथ सप्तगत्यधिकरणम् ॥ २ ॥

॥ सू ॥ सप्तगतेर्विशेषितत्वाच्च ॥ ४ ॥

पूर्वत्र प्रत्यकार्यतया सिद्धानीन्द्रियाणि कियत्संख्यानीति संदेहे सप्तेति पूर्वः पक्षः। कुतः ? 'यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह । बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिम् ॥' इति सप्तानामेवावगतेः, 'सप्त प्राणाः प्रभवन्ति' इत्यादिश्रुतौ सप्तेति विशेषितत्वाच्च ॥

इत्येवं प्राप्तेऽभिधीयते–

॥ सू ॥ हस्तादयस्तु स्थितेऽतो नैवम् ॥ ५ ॥

न सप्तैवेन्द्रियाणि । हस्तादयोऽपीन्द्रियाणि, जीवे देहान्तःस्थिते उपकरण-

---

अथ सप्तगत्यधिकरणम् ॥ २ ॥

सू ॥ सप्तगतेर्विशेषितत्वाच्च ॥ ४ ॥ प्रासंगिकसंगतिं सूचयति–पूर्वत्रेति । कियत्संख्यानीति । सप्तसंख्यानि वा एकादशसंख्यानि वेत्यर्थः । श्रुतिविप्रतिपत्तेस्सन्देहः । सौत्रं गतिशब्दमवगतिपरमभिप्रेत्य सप्तसंख्यावगमिकां स्मृतिमुदाहरति–यदेति । ज्ञानानीति । करणव्युत्पत्त्या ज्ञानशब्द इन्द्रियपरः । मनोबुद्धिसहपाठात् । परमां गतिमिति । परमगतिरूपमोक्षसाधनं योगमाहुरित्यर्थः । 'विशेषितत्वा'दिति सौत्रपदं सप्तसंख्यां स्वशब्देनोपादाय तया विशेषितत्वादित्यर्थपरतया व्याचष्टे–सप्तेति । न्यूनाधिकसंख्याश्रवणे न्यूनसंख्याग्रहणं न्याय्यं लाघवादिति युक्त्यन्तरसमुच्चयार्थश्चकारः । न च वाच्यमधिकसंख्याग्रहणे न्यूनसंख्यायास्तत्रान्तर्भावादुभयान्वयो भवति अतस्तदर्थमधिकसंख्याग्रहणमेव न्याय्यमिति । तथा सति क्वचिद् ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि पंच मनो हृदयमिति द्वादशेंद्रियाणि श्रूयन्ते । क्वचित्तान्येव प्राणाधिकानि त्रयोदश श्रूयन्ते इति सर्वाधिकसंख्याग्रहणे एकादशसंख्याव्यवस्थित्यसिद्धेरिति । सू ॥ हस्तादयस्तु स्थितेऽतो नैवम् ॥ ५ ॥ 'अतो नैव' मिति व्याख्यास्यमानसूत्रांशलभ्यं साध्यं दर्शयति–न सप्तैवेति । तु शब्दमप्यर्थं कृत्वा व्याचष्टे–हस्तादयोऽपीति । 'स्थितेऽत' इति सूत्रांशेन विवक्षितं हेतुमपेक्षिताध्याहारपूर्वकं विवृणोति–जीव इति ॥ हस्तादिसत्वोपन्यासलभ्यायामिन्द्रिय-

---

वचनमल्पोपचयकारणात्' इति वायुप्रोक्तवचनाच्च मन उत्पत्तिमदेव न त्वनुत्पत्तिमदित्यर्थः ॥ इति ॥

इति तत्प्रागधिकरणम् ॥ २ ॥

अथ तत्पूर्वकत्वाधिकरणम् ॥ ३ ॥

सू ॥ तत्पूर्वकत्वाद्वाचः ॥ अत्र वागिन्द्रियमुत्पत्तिमद्वा अनुत्पत्तिमद्वेति संदेहः । 'नित्ययानित्यया स्तौमि परमात्मानमच्युतम् । वाग्वाव नित्या न ह्येषोत्पद्यतेऽस्यां हि श्रुतिरवतिष्ठते' इति श्रवणादनुत्पत्तिमदिति पूर्वपक्षः । सिद्धान्तस्तु, 'तस्मान्मन एव पूर्वरूपं वागुत्तररूपम्' इति श्रवणात् 'वागिन्द्रियस्य नित्यत्वं श्रुतिसन्निधियोग्यता । उत्पत्तिर्मनसो यस्मान्न नित्यत्वं कुतश्चने' ति वायुप्रोक्तवचनाच्च वागिन्द्रियमुत्पत्तिमदेवेति ॥

इति तत्पूर्वकाधिकरणम् ॥ ३ ॥

इति सूत्रार्थचन्द्रिकायां प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

---

(१) 'दुमयावामो' इति क पाठः ।

त्वाविशेषात् । अपि त्वेकादश । 'दशेमे पुरुषे प्राणा आत्मैकादशः' 'इन्द्रियाणि दशैकं च' इति श्रुतिस्मृतिभ्याम् । बुद्ध्यादीनां न पृथगिन्द्रियत्वम्, किं तु ते मनोवृत्तिभेदा एव । सप्तानां गतिश्रवणं विशेषणं च तेषां प्राधान्यात् । अतो न सप्तेन्द्रियाणि, किं त्वेकादश ॥ इति सप्तगत्यधिकरणम् ॥ २ ॥

संख्यायां श्रुतिं दर्शयति—'दशेम' इति । आत्मा मनः । श्रुतिस्मृतिभ्यामिति । अयमपि हेतुरतश्शब्देनावृत्तेन विवक्षितः । बुद्ध्यहंकारचित्तानां मनस्यन्तर्भावात् नाधिकसंख्या प्रसज्यत इत्याह—बुद्ध्यादीनामिति । नानाविधसंख्याश्रवणे कार्यानुसारेण संख्यानियमनं युक्तं नानाविधावदानसाधनश्रवणे सामर्थ्यानुसारेणावदेयनियमनवत् । कार्यं च गन्धाद्युपलब्धिपञ्चकमादानादिक्रियापञ्चकमान्तरज्ञानजातं चेत्येकादशविधं प्राणादिसत्त्वे चक्षुरादिष्वसत्स्वजायमानमेकादशविधमिंद्रियगणं व्यवस्थापयति । यानि तु बुद्ध्यहंकारचित्तवृत्तित्वेन प्रसिद्धानि अध्यवसायाभिमानचिंतारूपाणि कार्याणि तानि मनोव्यतिरेके जायमानत्वानवगमान्न करणांतरव्यवस्थापनशक्तानीति बुद्ध्यादयो मनोऽवस्थाभेदा इत्येव युक्तमिति भावः । पूर्वपक्षयुक्तिं निरस्यति—सप्तानामिति । योगदशायां कर्मेंद्रियेभ्यो ज्ञानेंद्रियाणि यत्नेन वशीकरणीयानीति तेषां वशीकर्तव्यत्वेऽस्ति प्राधान्यम् । तदभिप्रायेण 'यदा पंचावतिष्ठन्ते' इत्यादिस्मृतिः प्रवृत्ता । 'सप्त वै शीर्षण्याः प्राणा द्वाववांचौ' इत्यादिश्रुतिषु सप्तानां शीर्षण्यत्वरूपं प्राधान्यं प्रसिद्धम् । तदभिप्रायेण 'सप्त प्राणा' इति श्रुतिः प्रवृत्ता । न च 'सप्तेमे लोका येषु चरन्ति प्राणा' इति तदुत्तरार्धे सप्तानामिह परत्र च संचारश्रवणात् सर्वत्र जीवानुगन्तृत्वलक्षणं प्राधान्यं विवक्षितमस्त्विति शंकनीयम् । 'दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदास्मान्मर्त्याच्छरीरादुत्क्रामन्ती'ति श्रुतावेकादशानामपि जीवानुगन्तृत्वश्रवणात् । 'अतो नैव'मिति सूत्रांशं व्याकुर्वन्नधिकरणार्थमुपसंहरति—अतो न सप्तेति । पुनरावृत्तस्यातश्शब्दस्य हस्तादीनां सत्त्वादित्यर्थः ॥

इति सप्तगत्यधिकरणम् ॥ २ ॥

नयमणिमालायाम् अथ सप्तगत्यधिकरणम् ॥ २ ॥

सू ॥ सप्तगतेर्विशेषितत्वाच्च ॥ ४ ॥ हस्तादयस्तु स्थितोऽतो नैवम् ॥ ५ ॥

प्राणास्सप्तैव यदा पञ्चेत्यादौ तथावगतेः । सप्त प्राणा इत्यपि विशेषितत्वाच्च मन्त्रेण ॥ १५४ ॥
वाक्पाण्यादीनामपि सत्तावगमाद्दशेम इति वाक्यात् । एकादशसप्तत्वश्रवणं प्राधान्यतो नेयम् ॥ १५५ ॥

इति सप्तगत्यधिकरणम् ॥ २ ॥

सूत्रार्थचन्द्रिकायाम्

अथ सप्तगत्यधिकरणम् ॥ २ ॥

सू ॥ सप्त गतेर्विशेषितत्वाच्च ॥ ४ ॥ हस्तादयस्तु स्थितेऽतो नैवम् ॥ ५ ॥

भगवत्पादमते, इत्थमिन्द्रियाणामुत्पत्तिं प्रसाध्य तेभ्यो जीवस्य विवेकार्थं तदाश्रितसंख्यां निर्धारयति—**सप्तगतेरित्यादि** । अत्र 'सप्त प्राणाः प्रभवन्ति तस्मात्' इति इन्द्रियाणि सप्त संकीर्त्यन्ते । क्वचिदष्टौ । क्वचिन्नव । क्वचिद्दश । क्वचिदेकादश । इत्येवं सप्तत्वाष्टत्वादिश्रुतीनां परस्परविरोधोऽस्ति न वेति **संदेहः** । अस्तीति **पूर्वपक्षे** प्राप्ते **एकदेशिसिद्धान्तः** । **सप्तेन्द्रियाणि** । कुतः । **गतेः**=श्रुत्या सप्तत्वावगतेः 'सप्त वै शीर्षण्याः प्राणाः' इति शीर्षण्यत्वेन विशेषितत्वाच्च । अष्टत्वादिसंख्याश्रवणं तु एकस्यैवान्तःकरणस्य वृत्तिभेदाभिप्रायमिति न श्रुतीनां विरोध इति ॥

एकदेशिमतं दूषयति—**सू ॥ हस्तादयस्तु स्थितेऽतो नैवम् ॥ ५ ॥** तुरेकदेशिमतनिरासकः । 'हस्तौ वै ग्रहः' इत्यादिना हस्तादयो व्यतिरिक्ताः प्राणाः श्रूयन्ते । सप्तत्वातिरेके स्थिते सप्तत्वसंख्या एकादशत्वसंख्यायामन्तर्भावयितुं शक्यते । **अतो नैवम्**='सप्तैव प्राणा' इति न मन्तव्यम् । 'दशेमे पुरुषे प्राणा आत्मैकादश' इति श्रवणादेकादशैव । तस्माच्छ्रुतीनां विरोध इति सिद्धम् ॥

अथ प्राणाणुत्वाधिकरणम् ॥ ३ ॥

॥ सू ॥ अणवश्च ॥ ६ ॥

तानीन्द्रियाणि विभूनि किमणूनीति संदेहे चक्षुरादीनां दूरगतवस्तुग्रहणसामर्थ्याद्विभूनीति प्राप्तेऽणूनीत्युच्यन्ते–कथम् ? 'प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इति श्रवणात् । न विभूनि । विभुत्वे हि तेषां न गतिः संभवति । चक्षुरादेर्दूरगतवस्तुग्रहणसामर्थ्यं न विभुत्वेन, किंतु तेजोरूपत्वादणुत्वाच्च शीघ्रगतिमत्त्वात् । तस्मादिन्द्रियाण्यणून्येव ॥ इति प्राणाणुत्वाधिकरणम् ॥ ३ ॥

अथ प्राणाणुत्वाधिकरणम् ॥ ३ ॥

सू ॥ अणवश्च ॥ ६ ॥ 'अत एते सर्व एव समाः सर्वेऽनंता' इति श्रुतेः 'सर्वे प्राणा अनूत्क्रामन्ति' इति श्रुतेश्च विप्रतिपत्त्या संशयं दर्शयति–तानींद्रियाणीति । अणुत्वमिह परिच्छिन्नत्वम् । दूरगतेति । तथा चोक्तयुक्तिसहकृतत्वादानन्त्यश्रुतिः प्रबला यथा कार्यदर्शनयुक्तिसाहित्यादेकादशसंख्याश्रुतिरेवेति भावः । आनन्त्यश्रुतिः 'स यो हैताननन्तानुपास्ते अनन्तं वै स लोकं जयतीति' वाक्यशेषदर्शनादुपासनार्थत्वेनान्यथा सिद्धेति । ततः प्रबलया उत्क्रमणश्रुत्या परिच्छिन्नत्वमुपपादयति–प्राणमिति । शीघ्रगतिमत्त्वादिति । 'दूरगतवस्तुग्रहणसामर्थ्यमिन्द्रियाणां विषयपर्यन्तप्रसृमरप्रवृत्त्यात्मना विषयसंबंधेन युज्यत इति तदप्यन्यथासिद्धमित्यर्थः । इति प्राणाणुत्वाधिकरणम् ॥ ३ ॥

श्रीकण्ठमते, अत्रापि संदेहपूर्वपक्षादिकं प्रायः पूर्वस्मादविशिष्टम् । इन्द्रियाणि कियत्संख्यानि सप्तसंख्यानि वा अधिकसंख्यानि वेति **संदेहः** । 'यदा पञ्चावतिष्ठंते ज्ञानानि मनसा सह । बुद्धिश्च न विचेष्टेत तमाहुः परमां गतिम् ॥' इति सप्तानामेवावगतेः 'सप्त प्राणाः प्रभवन्ति तस्मा' दिति श्रुतौ सप्तेति विशेषितत्वाच्च सप्तैवेन्द्रियाणीति **पूर्वपक्षः** । **सूत्रार्थोऽ**पि व्याख्यातः । **सिद्धान्तस्तु,** न सप्तैवेन्द्रियाणि । किं तु जीवे देहान्तः स्थिते उपकरणत्वाविशेषाद्धस्तादयोऽपीन्द्रियाणि । अत इन्द्रियाण्येकादश । **अतो नैवम्**='दशेमे पुरुषे प्राणा आत्मैकादश' इति श्रवणात् 'इन्द्रियाणि दशैकं चे' ति स्मृतेश्चैवमिन्द्रियाणि सप्तैवेति न वक्तव्यम् । किं तु ज्ञानेन्द्रियाणि पञ्च, कर्मेन्द्रियाणि पञ्च, मन इत्येकादशेन्द्रियाणीति । **सूत्रार्थश्च** व्याख्यातः ॥ **रामानुजमते,** सर्वमविशिष्टं श्रीकण्ठमतादित्यवधेयम् ॥

आनन्दतीर्थमते, 'सप्त प्राणाः प्रभवन्ति तस्मात्' तस्माद्द्वादश वा एते प्राणाः' इति श्रुत्योः परस्परविरोधादन्यतरबलवत्त्वकारणाभावाच्च द्वयोरप्रामाण्ये श्रुतिवाक्यान्तरेष्वनाश्वासान्न ब्रह्मणि श्रुतीनां समन्वयः सिद्ध्यतीति **पूर्वपक्षः** । ज्ञानेन्द्रियाणि चक्षुरादीनि मनोबुद्धिसहितानि सप्त । तदभिप्रायेण 'सप्त प्राणा' इति श्रुतिः कर्मेन्द्रियाणि हस्तादयः पञ्च तैस्सह द्वादशसंख्याश्रुतिरिति न विरोध इति **सिद्धान्तः** । **सूत्रार्थस्तु, गतेः**=ज्ञानस्य जनकानीन्द्रियाणि **सप्त**=सप्तसंख्यानि । इति निर्णय एव । कुतः । **विशेषितत्वाच्च**='गुहाशयां निहितास्सप्तसप्त' इति विशेषणयुक्ततया निर्दिष्टत्वात् चकारात् 'सप्त प्राणास्त्ववगतेः' इति भविष्यत्पर्ववचनाच्चेत्यर्थः ॥

सू ॥ हस्तादयस्तु स्थितेऽतो नैवम् ॥ ७ ॥ तुशब्दो वैलक्षण्यद्योतकः । यतो **हस्तादयस्तु**=हस्तादीन्द्रियाणि तु । **स्थिते**=स्थितं कर्म । तादर्थ्ये सप्तमी । कर्मार्थानीत्यर्थः । **अतः**=अस्माद्वैलक्षण्यात् । तानि **एवम्**=ज्ञानेन्द्रियसहभावेन **न** पठितानि । अतस्तेषां सप्तता सिद्धैवेत्यर्थः ॥ **इति सप्तगत्यधिकरणम् ॥ २ ॥**

नयमणिमालायाम् अथ प्राणाणुत्वाधिकरणम् ॥ ३ ॥

सू ॥ अणवश्च ॥ ६ ॥

प्राणानामानन्त्यश्रवणाद्दूरस्थितग्रहणात् । हस्त्यादितनुव्याप्तेर्विभुता स्यादन्यथाप्यनाम्नानात् ॥ १५६ ॥
गत्यागत्यश्रुतेर्बाधात्सूक्ष्मास्तेऽनन्ततोक्तिराध्यानार्था । वृत्त्या दूरस्थगतिर्विकासभजनाद्गजादिदेहाप्तिः ॥ १५७ ॥

इति प्राणाणुत्वाधिकरणम् ॥ ३ ॥

अथ श्रैष्ठ्याधिकरणम् ॥ ४ ॥

॥ सू ॥ श्रेष्ठश्च ॥ ७ ॥

'प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इति सर्वप्राणश्रेष्ठतया श्रूयमाणः पञ्चवृत्त्यात्मा प्राणवायुर्ब्रह्मण उत्पद्यते ? न वा ? ॥

इति संशये न जायते प्राणवायुः नासदासीये सूक्ते 'आनीदवातम्' इति सृष्टेः प्रागपि प्राणचेष्टाश्रवणात् ॥

इति प्राप्ते वदामः—प्राणवायुरपि जायत एव । आनीच्छब्दो न प्राणव्यापारं वक्ति । अवातमिति तन्निषेधात् । किंतु ब्रह्मसत्त्वमेव ब्रूते । अतो न प्राणानादित्वं संभवति ॥

भवति त्वयं प्राणवायुरुत्पत्तिमान् । स तु 'सामान्यकरणवृत्तिः प्राणाद्या

अथ श्रैष्ठ्याधिकरणम् ॥ ४ ॥

सू ॥ श्रेष्ठश्च ॥ ७ ॥ प्राणस्य भूतवायोरिंद्रियवृत्तिभ्यश्चान्यत्वं श्रुतिविरोधसमाधाने नोपपादनीयम् । तदन्यत्वानन्यत्वविचारस्तदुभयस्वरूपस्य निर्ज्ञातत्वात्सुकरो भवतीति तद्विचारचिकीर्षया तस्य कार्यत्वविचारमुखेन प्रासंगिकत्वसंपादनायेंद्रियकार्यत्वोपपादकन्यायं प्राणकार्यत्वेऽतिदेष्टुमिदं सूत्रम् । अस्य पूर्वाधिकरणेन संगतिं प्राणवायौ सौत्रश्रेष्ठपदप्रवृत्तिनिमित्तं च विवृण्वन्नेव श्रुतिविप्रतिपत्त्या संशयं दर्शयति—प्राणमिति । यदनूत्क्रमणेनेंद्रियाणां परिच्छिन्नत्वं समर्थितं तस्य कार्यत्वं समर्थ्यत इति पूर्वाधिकरणसंगतिः । तत्र च श्रेष्ठपदमिंद्रियेभ्यः श्रैष्ठ्यपरमिति द्वयमप्यनेन विवृतम् । किंतु ब्रह्मसत्त्वमेवेति । अनन्व्यापारो हि वाताश्रयः स तु वातनिषेधेन प्रतिपाद्यमानस्सत्तारूप एव पर्यवस्यति । सत्ता च वस्तुविशेषानवच्छिन्ना-निरुपाधिकब्रह्मसत्तैव भवेदिति भावः । एवं प्रसङ्गं संपाद्य प्रासंगिकमर्थं पूर्वपक्षमुखेनावतारयति—भवति त्वयमिति । सामान्येति । यथा पञ्जरस्थानां

सूत्रार्थचन्द्रिकायाम्

अथ प्राणाणुत्वाधिकरणम् ॥ ३ ॥

सू ॥ अणवश्च ॥ ६ ॥

भगवत्पादमते, नन्विन्द्रियाणामपरिच्छिन्नाहंकारजन्यत्वेन विभुत्वादिन्द्रियाणामुत्पत्तिर्न संभवतीत्याक्षेपसंगत्येदमाह—**सू ॥ अणवश्च ॥ ७ ॥** अत्रोत्क्रान्त्यादिश्रुतेः 'प्राणास्सर्वेऽनन्ता' इतीन्द्रियविभुत्वश्रुत्या विरोधोऽस्ति न वेति **संदेहः** । विरोधोऽस्तीति **पूर्वपक्षः** । **सिद्धान्तस्तु,** इमे प्राणा **अणवः**=परिच्छिन्नाः । इन्द्रियाग्राह्यत्वेन सूक्ष्मत्वात् । विभुत्वश्रुतेरुपासनापरत्वाच्च तयोत्क्रान्त्यादिश्रुतेर्विरोध इति सिद्धम् ॥ इति ॥

श्रीकण्ठमते, तथा रामानुजमते च तानीन्द्रियाणि विभूनि किमणूनीति **संदेहे** चक्षुरादीनां दूरगतवस्तुग्रहणसामर्थ्याद्विभूनीति **पूर्वपक्षः** । 'प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ती'ति श्रवणात् विभुत्वे गत्यसंभवाच्च न विभूनीति **सिद्धान्तः** । चक्षुरादेर्दूरगतवस्तुग्रहणसामर्थ्यं च तेजोरूपत्वादणुत्वाच्च शीघ्रगामित्वादुपपद्यते । तस्मादिन्द्रियाण्यणून्येवेति भावः । विभुत्वश्रवणमुपासनार्थम् ॥

आनन्दतीर्थमते, 'प्राणा वा अणवः' इति प्राणाणुत्वश्रुतेः 'दिवीव चक्षुराततम्' मिति दूरश्रवणदर्शनादियुक्तिसहितया इन्द्रियव्याप्तिश्रुत्या विरोधादणुत्वश्रुतेरप्रामाण्याच्च समन्वयसिद्धिरिति **पूर्वपक्षः** । 'तद्यथा ह्यणुनश्चक्षुसः प्रकाश' इति विशेषश्रुतिसद्भावाद्व्याप्तश्रुतेश्चक्षुःप्रकाशव्याप्तिगोचरत्वाच्चाणुत्वश्रुतेर्न बाध इति **सिद्धान्तः** । **सूत्रार्थस्तु, प्राणाः**=इन्द्रियाणि । **अणवः**=स्वतोऽणूनीत्यर्थः । न केवलमणूनि किं तु तेजसा व्याप्तानि चेति चशब्दार्थः ॥

इतिप्राणाणुत्वाधिकरणम् ॥ ३ ॥

वायवः पञ्च' इति तन्त्रान्तरोक्तरीत्येन्द्रियवृत्तिभ्यः 'योऽयं प्राणः स वायुः' इति श्रुत्या भूतवायोर्वा न पृथग्भूत इत्यत आह—

॥ सू ॥ न वायुक्रिये पृथगुपदेशात् ॥ ८ ॥

पञ्चवृत्तिः प्राणोऽयं न वायुः । न चेन्द्रियवृत्तिः,–

'एतस्माज्जायते प्राणो मनःसर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥' इति श्रुत्या पृथगुपदेशात् । ततो वायोरिन्द्रियवृत्तिभ्यश्चान्य एव प्राणः ॥

वायोरन्यत्वेऽपि न तस्य भूतान्तरत्वमित्याह–

॥ सू ॥ चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॥ ९ ॥

वायोः पृथग्भूतोऽप्ययं नाग्न्यादिवत् भूतान्तरम्, किंतु वायुरेव देहधारणयोग्यतामापद्यते स्वयं परमेश्वराधारः । 'भर्ता सन् भ्रियमाणो बिभर्ति । एको

सर्वेषां शुकानां साधारणो व्यापारः पञ्जरचालनं यथा वा सर्वासां खलकपोतिकानामुपरिपतितवागुरोत्क्षेपणं साधारणव्यापारः तथा शरीरस्थानां सर्वेषामिंद्रियाणां साधारणव्यापारः प्राणादिवायुपञ्चकमिति सांख्या वदंति । तथैवोपपत्तौ प्राणादिपञ्चवृत्तिर्मुख्यप्राणोऽन्यो न स्वीकरणीयः । यदींद्रियकार्येभ्यो गन्धोपलब्ध्यादिभ्योऽन्यस्य श्वसनकार्यस्य दर्शनान्मुख्यप्राण इन्द्रियवृत्तिभ्योऽन्यः स्यात् तदा प्राणापानादयोऽपि कार्यभेदाद् भिन्नाः स्युरिति पञ्चवृत्तिर्मुख्यप्राण इति न सिद्ध्येदिति पूर्वपक्षः । एवं वादिविप्रतिपत्तिनिरासः श्रुतिविप्रतिपत्तिनिरासार्थेऽस्मिन्पादे संगतिरहितत्वादन्वाचयशिष्टः । पूर्वपक्षांतरार्था त्वधिकरणप्रवृत्तिः । तत्पूर्वपक्षांतरमित्थम्–'यः प्राणस्स वायु' रिति श्रुतेः प्राणो भूतवायोर्न भिद्यते । पृथगुपदेशाद्भूतवायोरवस्थान्तरं प्राणः न[1] वायुरेवेति चेत् तर्हि तदवस्थान्तररूपस्य तेजस इव प्राणस्यापि पूर्वावस्थारूपवायुत्वपरित्यागः स्यादिति । सू ॥ न वायुक्रिये पृथगुपदेशात् ॥ ८ ॥ अन्य एवेति । 'यः प्राण स्स वायुरिति' श्रुतिः प्राणस्य वाय्ववस्थांतरत्वेन वायुविशेषत्वादुपपद्यते इति भावः । तदवस्थान्तरत्वे तेजस इव वायुत्वपरित्यागेन भूतान्तरत्वप्रसङ्ग इति शंकोत्तरत्वेनोत्तरसूत्रमवतारयति–वायोरन्यत्व इति । सू ॥ चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॥ ९ ॥ नन्वनेन सूत्रेण प्राणस्य वायुत्वपरित्यागप्रसंगस्य तेजोदृष्टांतोपपादितस्य न कश्चित्परिहार उच्यते । वायुत्वपरित्यागेऽपि चक्षुरादिवज्जीवोपकरणत्वसंभवादित्याशंक्य सूत्रेण विवक्षितं परिहारमाह–वायोरिति । सत्येव तंतूनां तन्तुत्वे परस्परसंयोगेन शकटाकर्षणयोग्यतापत्तिरिव सत्येव प्राणस्य वायुत्वे देहधारणयोग्यतापत्तिरस्यावस्थान्तरापत्तिरिति न भूतान्तरत्वप्रसंग इति भावः । एकैकतन्तुष्वदृष्टा शकटाकर्षणयोग्यता मिलितेषु तन्तुषु संयोगविशेषेणेव वाय्वन्तरेष्वदृष्टा देहधारणयोग्यतास्य केन विशेषेणेत्याशंकायामाह–स्वयमिति । यथायं देहधारणयोग्यो भवति तथैनं परमेश्वर उत्तभ्नातीत्यर्थः । भर्ता सन्निति । परमेश्वरेण स्वयं भ्रियमाण एव भर्ता भरणशक्तस्सन्बिभर्ति कार्यकारणसंघातम् । एको देवो मुख्यप्राणः बहुधा प्राणा-

---

(१) 'न स एव' इति ख. पाठः ।

देवो बहुधा निविष्टः' 'त्वमेकोऽसि बहूननुप्रविष्टः' 'प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः' इत्यादिश्रुतेः। किंच। अयं चक्षुरादिवज्जीवोपकरणम्। प्राणसंवादादिषु चक्षुरादिभिः सहोपदेशात् तत्तुल्योपकारमुख्यत्वादिभ्यश्च ॥

॥ सू ॥ अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॥ १० ॥

अकरणमक्रिया। न जीवोपकारक्रियारहितत्वात् दोषः। यतः श्रुतिरेव देहेन्द्रियाद्यशैथिल्यकारणं वायुरिति दर्शयति। प्राणसंवादे 'यस्मिन्नुत्क्रान्ते इदं शरीरं पापिष्ठतरमिव दृश्यते स वः श्रेष्ठः' इति प्रजापतिवचनानन्तरं, वागाद्युत्क्रमणेऽपि देहस्येन्द्रियाणां च स्थितिं दर्शयित्वा प्राणोत्क्रमणे देहेन्द्रियशैथिल्याभिधानात् ॥

॥ सू ॥ पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥ ११ ॥

प्राण एक एव स्ववृत्तिभिः पञ्चभिः प्राणापानादिसंज्ञाभेदभाग्भवति, यथा

पानादिबहुप्रकारेण निविष्ट इत्यर्थः। प्राणानां प्राणापानादिवृत्तीनां ग्रन्थिः ग्रथयिता तत्र तत्र स्थापक इत्यर्थः। आदिशब्दो 'न प्राणेन नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ'। इत्यादिश्रुत्यंतरसंग्राहकः। प्राणस्य देहधारकत्वे युक्त्युपन्यासपरत्वेन सूत्रं योजयति–किं चायमिति। चक्षुरादिवदेव प्राणोऽपि जीवस्योपकरणविशेष इति मन्तव्यम्। प्राणसंवादादिप्रदेशेषु तस्य चक्षुरादिभिस्सह पाठात्। 'अथ ह प्राणा अहं श्रेयसे व्यूदिरे अहं श्रेयानस्म्यहं श्रेयानस्मी'ति चक्षुरादिभिस्सह कलहाभिधानेन तत्तुल्योपकारकत्वसन्देहसूचनात् तदनंतरं त्वं नः श्रेष्ठोऽसीति चक्षुरादिवचनेन प्राणस्य मुख्यत्वनिर्धारणाच्च। समानजातीयानां हि सहपाठस्तुल्योपकारत्वसंशयेन च परस्परोत्कर्षकलहः। तन्निर्धारणार्थं 'ते ह प्राणाः प्रजापतिं पितरमेत्योचुः भगवन् को नः श्रेष्ठ' इति प्रश्नः। कस्यचिदुपकारातिशयदर्शनेन मुख्यत्वनिर्धारणञ्च भवति। जीवोपकरणत्वेन प्रसिद्धेः। समानजातीयत्वं च जीवोपकरणस्य भवति। प्राणस्य तदुपकरणत्वं च देहधारणादृते नान्येनोपकारेणोपपद्यत इति भावः। नन्वप्राणस्य पाषाणादेरिव देहस्यापि प्राणेन धारणं नापेक्षितम्। अतो न देहधारणं जीवोपकारः इत्याशंक्य प्राणस्य देहनियतधारकत्वमन्वयव्यतिरेकाभ्यां तत्प्रदर्शनपरां श्रुतिमुदाहृत्य व्यवस्थापयितुं सूत्रम् सू ॥ अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॥ १० ॥ करणमुपकारक्रिया तद्रहितत्वाद्यो दोषः जीवोपकरणत्वासंभवदोषः स न प्रवर्तते। श्रुतिरेव हि तथा देहधारकतया जीवोपकरणत्वेन प्राणं दर्शयतीति सूत्रार्थं विवृण्वन्नुक्तशङ्कां निरस्यति—अकरणमिति। इंद्रियवृत्तित्वपूर्वपक्षबीजशंकानिराकरणार्थं सूत्रम्–सू॥ पञ्चवृत्तिर्मनोवद्व्यपदिश्यते॥११॥ मुख्यप्राणस्य कार्यभेदादिंद्रियवृत्तिभ्यो भेदाभ्युपगमे प्राणापानादयोऽपि मुख्यप्राणवृत्तिभ्यो भिन्नाः स्युः कार्यभेदादेव इति हि शंका। नेयमुपपद्यते। प्राणस्य इंद्रियवृत्तित्वकल्पने हि न तावन्मिलितानामिंद्रियाणां स वृत्तिः। चक्षुराद्येकद्वित्रिचतुरभावे प्राणनाभावप्रसङ्गात्। नाप्येकस्यैव त्वगिन्द्रियस्य वृत्तिः। सामान्यकरणवृत्तित्वाभ्युपगमभंगप्रसंगात्

---

(१) 'जीवस्य देहे धार्यमाणत्वं' इति. ख. पाठः।

कामादीमिमन एकमेव । अतः प्राण एक एव भूतवाय्विन्द्रियवृत्तिव्यतिरिक्तो जीवोपकारक इति सिद्धम् ॥ इति श्रैष्ठ्याधिकरणम् ॥ ४ ॥

शरीरैकदेशे त्वगिन्द्रियोपहतौ तत्र प्राणनव्यापाराभावप्रसंगाच्च । तस्मात् 'पृथगुपदेशात्' सामान्यकरणवृत्तित्वानुपपत्तेश्च प्राणः करणवृत्तिभ्यो भिन्न इति युक्तम् । न तथा प्राणापानादीनां मुख्यप्राणतः पृथगुपदेशोऽस्ति । नाप्यनन्यथासिद्धः कार्यभेदोऽस्ति । एकस्यैव वायोर्हृदयादिस्थानविशेषावच्छेदेन तत्तत्कार्यकरत्वोपपत्तेः तत एव प्राणापानादीनां भेदोपपत्तेश्च । तस्मात् 'पञ्चधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य धारयामी' ति श्रुतेर्मुख्यप्राण एक एव प्राणापानादिभेदेन पंचवृत्तिरिति युक्तम् । यथा 'कामस्सङ्कल्पो विचिकित्से'त्यादिश्रुतेरेकमेव मनः कामसंकल्पाद्यनेकवृत्तीति । अधिकरणार्थमुपसंहरति—अत इति । 'श्रेष्ठश्चे'ति सूत्रं पादाद्याधिकरणन्यायसिद्धार्थस्मरणार्थमिति तदर्थो नोपसंहृतः ॥

इति श्रैष्ठ्याधिकरणम् ॥ ४ ॥

नयमणिमालायाम् अथ श्रैष्ठ्याधिकरणम् ॥ ४ ॥

सू ॥ श्रेष्ठश्च ॥ ७ ॥ न वायुक्रिये पृथगुपदेशात् ॥ ८ ॥ चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॥ ९ ॥ अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॥ १० ॥ पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥ ११ ॥

नित्यो मुख्यप्राणः प्रलये तद्व्यापृतेस्सत्त्वात् । आनीदिति यत्सूक्ते परिपठितं नासदासीये ॥ १५८ ॥

आनीदिति शिवसत्ताविषयं प्राणो ह्यवातमित्यस्तः । सोऽपि च न वातमात्रं न तत्क्रिया वा पृथग्जनिश्रवणात् ॥१५९॥

इति श्रैष्ठ्याधिकरणम् ॥ ४ ॥

सूत्रार्थचन्द्रिकायाम् अथ प्राणश्रैष्ठ्याधिकरणम् ॥ ४ ॥

सू ॥ श्रेष्ठश्च ॥ ७ ॥ न वायुक्रिये पृथगुपदेशात् ॥ ८ ॥ चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॥ ९ ॥ अकरणत्वाच्च न दोषस्तथाहि दर्शयति ॥ १० ॥ पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥ ११ ॥

भगवत्पादमते, अत्र 'एतस्माज्जायते प्राणः' इति मुख्यप्राणोत्पत्तिश्रुतेः 'आनीदवात' मिति सृष्टेः प्राग्महाप्रलये प्राणसद्भावश्रुत्या विरोधोऽस्ति न वेति **संदेहः** । अस्तीति **पूर्वपक्षः** । **सिद्धान्तस्तु** इन्द्रियवत् श्रेष्ठोऽपि प्राणो ब्रह्मणो जायते । अतः 'आनीदवात' मिति श्रुतौ आनीच्छब्दः कारणसद्भावं दर्शयति । अवातं प्राणरहितमिति विशेषणात् । न तया श्रुत्या प्राणोत्पत्तिश्रुतेर्विरोध इति सिद्धम् ॥ **इति प्राणश्रैष्ठ्याधिकरणम्** ॥ ४ ॥

अथ वायुक्रियाधिकरणम् ॥ ५ ॥

उत्पत्तिचिन्तानन्तरं तस्य स्वरूपं विचार्यते—**सू ॥ न वायुक्रिये पृथगुपदेशात्** ॥ ९ ॥ अत्र मुख्यः प्राणः किं वायुरेव उत इन्द्रियव्यापारः आहोस्विद्वायुविशेष इति त्रेधा **संशयः** । 'यः प्राणस्स वायु' रिति 'एतस्माज्जायते प्राणो मनःसर्वेन्द्रियाणि च । खं वायु' रिति भेदाभेदश्रुत्योरुभयोर्विरोधे भेदश्रुतेर्गौणत्वाङ्गीकारे वायुरेव प्राण इति भेदश्रुत्यवष्टम्भे सर्वेन्द्रियव्यापार एव प्राण इति च द्वेधा **पूर्वपक्षः** प्राप्तः । **सिद्धान्तस्तु,** मुख्यप्राणो **न वायुक्रिये**—न वायुर्नापीन्द्रियव्यापारः किं तु वायुविशेष एव । कुतः । **पृथगुपदेशात्**—'स वायुना ज्योतिषा' इति वायोः तथा 'एतस्माज्जायते प्राणः' इत्यादिना करणेभ्यश्च पृथगुपदेशात् । तस्माद्वायुविशेषोऽयमध्यात्मभावापन्नः पंचवृत्तिः प्राणः इति ॥ ततश्च न श्रुत्योर्विरोध इति सिद्धम् ॥

इन्द्रियव्यापारस्य प्राणत्वाभावे प्राणस्य जीववत्स्वातन्त्र्यं स्यादित्यत आह—**सू ॥ चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॥ १० ॥** तुशब्दः शंकाव्यावर्तकः । प्राणो न जीववत्स्वतंत्रः । किं तु चक्षुरादिवत् जीवं प्रति करणभूतः । कुतः ॥ **तत्सहशिष्ट्यादिभ्यः**—तैश्चक्षुरादिभिस्सह प्राणसंवादादिषु प्राणस्य **शिष्टेः**—शासनात् । अचेतनत्वादिरादिशब्दार्थः ॥

नतु प्राणस्य जीवोपकरणत्वे तस्य विषयान्तरं प्रसज्येतेत्यत आह—**सू ॥ अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॥ ११ ॥** अकरणत्वात्र प्राणस्य विषयान्तरापेक्षा दोषः । कस्मात् । तथाहि श्रुतिः प्राणान्तरेष्वसंभाव्यमानं मुख्यप्राणस्यासाधारणं कार्यं 'तान्वरिष्ठः प्राण उवाचे' त्यादिना दर्शयतीत्यर्थः ॥

किंच ॥ **सू ॥ पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥ १२ ॥ मनोवत्**—यथा मनः स्मृत्याख्यानेकव्यापारापेक्षया अनेकधा व्यपदिश्यते तद्वत् । उच्छ्वासनिश्वासादिव्यापारानपेक्ष्य पञ्चवृत्तिः प्राणः प्राणापानादिसंज्ञया व्यपदिश्यते ॥

श्रीकण्ठमते, तथा **रामानुजमते** च '**श्रेष्ठश्चे**'त्यादिकं '**पञ्चवृत्तिर्मनोवद्व्यपदिश्यते**' इत्यन्तमेकमेवाधिकरणम्। अधिकरणैकत्वरूपवैलक्षण्येऽपि संदेहपूर्वपक्षादिकं प्रायोऽविशिष्टमेव शांकरमतात्। अनयोर्मतयोः प्रथमसूत्रेण मुख्यप्राणस्यापि ब्रह्मण उत्पत्तिं प्रसाध्य तस्यैवेन्द्रियवृत्तेर्वा भूतवायोर्वा अपृथग्भावमाशंक्य '**न वायुक्रिये पृथगुपदेशा**'दिति सूत्रेण ताभ्यां पृथग्भावः प्रसाधितः । **रामानुजमते** परं '**न वायुक्रिये पृथगुपदेशा**' दिति सूत्रे क्रियाशब्दं वायुक्रियापरतया व्याख्याय तदानुगुण्येन मुख्यप्राणस्य वायुक्रियायाः पृथग्भावस्साधित इति विशेषः। आद्यं सूत्रद्वयमविशिष्टार्थमेव शांकरमतात् ॥

मुख्यप्राणस्य वायोरन्यत्वेऽपि नाग्न्यादिवत्तस्य भूतान्तरत्वमित्याह—**सू ॥ चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॥ ९ ॥** प्राणो नाकाशादिवद्भूतान्तरमपि तु वायुरेवावस्थान्तरमापन्नश्चक्षुरादिवज्जीवोपकरणम् । कुतः । **तत्सहशिष्ट्यादिभ्यः**=प्राणसंवादादिषु चक्षुरादिभिस्सहोपदेशात् तत्तुल्योपकारमुख्यत्वादिभिश्चेत्यर्थः ॥

सू ॥ अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॥१०॥ अकरणत्वाच्च=प्राणस्य जीवं प्रत्युपकारविशेषरहितत्वाच्च **दोषो नास्ति । तथाहि दर्शयति**=यतः श्रुतिरेव देहेन्द्रियाद्यशैथिल्यकारणं वायुरिति दर्शयति इत्यर्थः ॥

सू ॥ पंचवृत्तिर्मनोवद्व्यपदिश्यते ॥ ११ ॥ अस्यार्थश्शांकरमतवदेव । अतः प्राण एव भूतवाय्विन्द्रियव्यतिरिक्तो जीवोपकारक इति सिद्धम् ॥

आनन्दतीर्थमते, इदं सूत्रपञ्चकमपि श्रेष्ठाधिकरणं चक्षुराद्यधिकरणं पञ्चवृत्त्यधिकरणमिति चाधिकरणत्रयतया विभक्तम् । आद्ये 'नैष प्राण उदेति नास्तमेती'ति श्रुत्या 'यत्प्राप्तिर्यत्परित्यागः उत्पत्तिर्मरणं तथा । तस्योत्पत्तिर्मृतिश्चैव कथं प्राणस्य युज्यते ॥' इति स्मृत्युक्तयुक्तिसाहित्येन प्रबलया विरोधात् 'आत्मन एष प्राणो जायते' इति तदुत्पत्तिश्रुतिरप्रमाणमिति **पूर्वपक्षः । श्रेष्ठश्च**=यथेतरे प्राणा उत्पद्यन्ते एवं मुख्यप्राणोऽपि विष्णोरुत्पद्यत एव । न त्वनुत्पत्तिमान् । 'सौक्ष्म्येण ह वा एषोऽवतिष्ठते स्थूलत्वेनेति सूक्ष्मश्चाथो स्थूलश्च प्रकृतितस्सूक्ष्मोऽन्यतस्स्थूलोऽथैनमाहुस्सादिरनादि'रिति श्रुतेरनुत्पत्तिश्रुतेस्स्वाभाविकसूक्ष्मरूपविषयत्वादिति **सिद्धान्तः ।** आद्यं सूत्रं व्याख्यातम् ॥

यद्यपि प्राणशब्दो बाह्यवायौ चेष्टारूपक्रियायां मुख्यप्राणे च वर्तते तथापि प्राणोत्पत्तिश्रुतेर्न वायुक्रिये विषय इत्याह—**सू ॥ न वायुक्रिये पृथगुपदेशात् ॥ १० ॥ वायुक्रिये**=बाह्यवायुचेष्टाख्यकर्मणी । **न**='एतस्मा' दिति प्राणोत्पत्तिश्रुतिप्रतिपाद्ये न भवतः । किं तु मुख्यवायुरेव तत्प्रतिपाद्यः । कुतः । **पृथगुपदेशात्**='स प्राणमसृजते' त्यादिश्रुतौ मुख्यवायूत्पत्तिश्रुतेः वायुक्रियोत्पत्तिभ्यां सकाशात्पृथक्श्रवणात् ॥ इत्यर्थः ॥ **इति श्रेष्ठाधिकरणम् ॥ ६ ॥**

अथ चक्षुराद्यधिकरणम् ॥ ७ ॥

अत्र 'न प्राणः किंचिदाश्रितः' इति मुख्यप्राणस्य स्वातन्त्र्यं प्रतिपादयन्त्याः आग्निवेश्यश्रुतेः 'यदाश्रया अस्य चेष्टास्सोऽन्यं कथमुपाश्रयेत्' इति स्मृत्युक्तसकलजगच्चेष्टकत्वयुक्तिसाहित्येन प्रबलत्वात् तया 'प्राणस्यैतद्वशे सर्वं प्राणः परवशे स्थितः ।' इति तस्येश्वरपारतन्त्र्यं वदन्त्याः पैङ्गिश्रुतेर्बाधादप्रामाण्यमिति **पूर्वपक्षः । सिद्धान्तस्तु** मुख्यप्राणोऽपि चक्षुरादिवदीश्वरपरतन्त्र एव । न तु स्वतन्त्रः । कुतः । **तत्सहशिष्ट्यादिभ्यः**=तैश्चक्षुरादिभिस्सह मुख्यवायोरपि 'सर्वे ह्येवैत' दिति श्रुतौ पराधीनत्वोक्तेः । तस्य कर्तृत्वादियुक्तत्वयुक्तिभ्यश्चेति आदिशब्दार्थः ॥ ईश्वरद्वयानुपपत्तिरूपयुक्तिविरोधात् सर्वेश्वरत्वानन्येश्वरत्वश्रुतिर्बाध्यत इति भावः । मुख्यस्यानन्येश्वरत्ववचनानि विशेषश्रुत्यनुसारेणानेकेश्वरत्वप्रसंगयुक्तिविरोधेन च भगवदतिरिक्तनियन्तृनिषेधपराणीत्यविरोध इति यावत् ॥

ननु चक्षुरादितुल्यतया तस्य कथं भगवदतिरिक्तनियन्तृराहित्यमित्याशंक्याह—**सू ॥ अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॥** इतरेषां प्राणानां करणत्वान्मुख्यप्राणस्याकरणत्वाच्च तस्यान्येभ्य उत्तमत्वं युज्यते । अतो **न दोषः**=मुख्यप्राणस्वातन्त्र्यवाचिश्रुतेरवान्तरेश्वरपरत्वाभावदोषो नास्ति । कस्मादेवं कल्प्यत इति चेत् **हि**=यस्मात् 'तानि ह वा' इति श्रुतिः । **तथा**=उक्तप्रकारेण । **दर्शयति**=ज्ञापयति तस्मादित्यर्थः ॥ **इति चक्षुराद्यधिकरणम् ॥ ७ ॥**

अथ पञ्चवृत्त्यधिकरणम् ॥ ८ ॥

सू ॥ पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥ १२ ॥ अत्र ये प्राणापानादयः पञ्च वायवस्ते मुख्यप्राणस्य दासा वा उत तस्य स्वरूपाणि वेति **संदेहे** 'सर्वे वा एते मुख्यदासाः प्राणोऽपानो व्यान उदानस्समान' इति 'मुख्यस्यैव स्वरूपाणि प्राणाद्याः पञ्च वायवः । स एव प्राणिनां देहे पञ्चधा वर्ततेऽनिशम् ॥' इति च युक्तिसाहित्येन समप्राधान्ये उभे श्रुती श्रूयेते । उभयोः परस्परविरोधादुभयोरप्रामाण्येन समन्वयासिद्धिरिति **पूर्वपक्षः । सिद्धान्तस्तु, मनोवत्**=यथा मनो द्विविधैर्मनःप्रभृतिभिः पञ्चवृत्ति पञ्चदासं च तथा मुख्यप्राणोऽपि द्विविधैः प्राणादिभिः तथा व्यपदिश्यते । 'प्राणो वाव पञ्चवृत्तिः प्राणोऽपानो व्यान उदानस्समान इति तेभ्यो वा एतेभ्यः पंच दासाः प्रजायन्ते प्राणाद्वाव प्राणोऽपानादपानो व्यानाद्व्यान उदानादुदानस्समानादेव समानो यथा ह्वै मनः पञ्चधा व्यपदिश्यते मनो बुद्धिरहङ्कारश्चित्तं चेतनेति तेभ्यो वा एतेभ्यः पञ्च दासाः प्रजायन्ते मनसो वाव मनो बुद्धेश्च बुद्धिरहङ्कारादहङ्कारश्चित्ताच्चित्तं चेतनाया एव चेतनैव' मिति । अतो विषयभेदेन श्रुत्योरविरोध इति । स्वरूपभूताः प्राणादयो मुख्यगुणपरिपूर्णाः दासास्तु किंचित्तदीयगुणशालिनः इति भेदः ॥ **इति पंचवृत्त्यधिकरणम् ॥ ८ ॥ इति सूत्रार्थचन्द्रिकायां प्राणश्रैष्ठ्याधिकरणम् ॥ ४ ॥**

अथ मुख्यप्राणाणुत्वाधिकरणम् ॥ ५ ॥

॥ सू ॥ अणुश्च ॥ १२ ॥

पञ्चवृत्तिरयं प्राणवायुरिन्द्रियवदणुर्विभुर्वेति संदेहे सति, नाणुरयम्, 'समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण' 'प्राणे सर्वं प्रतिष्ठितम्' 'सर्वं हीदं प्राणेनावृतम्' इति श्रुतेः सर्वावारकतया व्यापी प्राणः ॥

इति प्राप्ते ब्रूमः–अणुरेव प्राणवायुः, 'प्राणमनूत्क्रामन्तम्' इति तस्य गतिश्रवणात् । आधिदैविकस्य हिरण्यगर्भप्राणस्य विभुत्वं न व्यष्टिरूपस्येति न विरोधः। तस्मादणुरेव प्राणः पञ्चवृत्तिरिति ॥ इति मुख्यप्राणाणुत्वाधिकरणम् ॥५॥

अथ मुख्यप्राणाणुत्वाधिकरणम् ॥ ५ ॥

सू ॥ अणुश्च ॥ १२ ॥ ननु 'सर्वेऽनन्ता' इति इन्द्रियाणामानन्त्यश्रुतौ सत्यामप्युत्क्रमणलिंगेन तेषां परिच्छिन्नत्वं प्रसाधितम् । एवं 'समोऽनेन सर्वेणे'ति व्यापित्वश्रुतौ सत्यामपि तेनैव लिंगेन प्राणस्यापि परिच्छिन्नत्वं सिद्ध्येत् किमनेनाधिकरणेन । न च वाच्यमुपास्तिविधानान्तर्गतत्वाद्दुर्बलमिति । सर्वसाम्यश्रवणेऽपि तुल्यत्वात् । तत्रापि 'साम प्राण'इत्युक्त्वा 'य एवमेतत्साम वेद' इत्युपास्तिविधानात् इत्याशंक्याधिकरणारंभहेतुभूतामधिकाशंकां दर्शयति–सर्वावारकतयेति । उदाहृतश्रुतौ हि प्राणस्य सर्वसाम्यमुक्त्वा तत्रोपपत्तितया 'सर्वं हीदं प्राणेनावृत'मित्युक्तम् । अतस्सोपपत्तिकतयोत्क्रमणलिंगतः प्रबलेन सर्वसाम्यलिंगेन प्राणस्य विभुत्वसिद्धावुत्क्रमणलिंगमौपाधिकोत्क्रमणतया नेतव्यम् । 'सम एभिस्त्रिभिर्लोकै'रित्यतः प्राक्'समः प्लुषिणा समो मशकेन समो नागेने'ति वाक्यान्यपि घटकरकाद्याकाशन्यायेन औपाधिकपरिच्छेदपरतया योजनीयानीति भावः । आधिदैविकस्येति । सर्वसाम्यवचनं समष्टिप्राणविषयमित्यविरोधे संभवति न सर्वविषयत्वं कल्पनीयमिति भावः ॥ इति मुख्यप्राणाणुत्वाधिकरणम् ॥ ५ ॥

नयमणिमालायाम् अथ मुख्यप्राणाणुत्वाधिकरणम् ॥ ५ ॥

सू ॥ अणुश्च ॥ १२ ॥

लोकैस्त्रिभिस्समानस्सर्वेण यतश्च सम उक्तः । सर्वस्य च प्रतिष्ठा तस्माद्विभुरेष इत्युदितम् ॥ १६० ॥
उत्क्रान्त्याद्यनुरोधादयमप्यणुरक्षवद्युक्तः । लोकत्रयसाम्यादेराम्नानं स्यात्समष्टिपरम् ॥ १६१ ॥

इति मुख्यप्राणाणुत्वाधिकरणम् ॥ ५ ॥

सूत्रार्थचन्द्रिकायाम्

अथ मुख्यप्राणाणुत्वाधिकरणम् ॥ ५ ॥

सू ॥ अणुश्च ॥ १२ ॥

भगवत्पादमते, पंचवृत्तेः प्राणस्यान्तरंगस्वरूपकथनानन्तरं बहिरंगपरिमाणमतिदिशति—सू ॥ अणुश्च ॥ १३ ॥

अत्रोत्क्रान्त्यादिश्रुतेः 'सम एभिस्त्रिभिर्लोकैः' इत्यादिप्राणविभुत्वश्रुतेश्च मिथो विरोधोऽस्ति न वेति **संदेहः** । अस्तीति **पूर्वपक्षः । सिद्धान्तस्तु,** चक्षुरादिवत्प्राणोऽप्यणुः परिच्छिन्नः सूक्ष्मश्च । 'सम एभिः' इति श्रुतिः सकलवायुपरा, नाध्यात्मिकप्राणमात्रपरेत्यनयोर्न विरोध इति सिद्धमिति ॥

श्रीकण्ठमते, तथा **रामानुजमते च** अत्राधिकरणे संदेहादिषु नास्ति वैशिष्ट्यं पूर्वस्मादिति वेद्यम् ॥

आनन्दतीर्थमते, मुख्यप्राणोऽणुर्वा व्याप्तो वेति **संदेहः** । 'प्राण एवाधस्तात्प्राण उपरिष्टात्प्राणो मध्यतः प्राणस्सर्वेत'

अथ ज्योतिराद्यधिष्ठानाधिकरणम् ॥ ६ ॥

॥ सू ॥ ज्योतिराद्यधिष्ठानं तु तदामननात् प्राणवता शब्दात् ॥ १३ ॥

इह 'आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशत्' इत्यादिश्रुत्या चक्षुरादीनामादित्याद्यधिष्ठानं श्रूयते। जीवस्य च रूपादिग्रहणाय तदधिष्ठानमुपदिश्यते 'एवमेवैष एतान् प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते' इति। तदिदं जीवेन सहेन्द्रियाधिष्ठानमादित्यादीनां परमेश्वरायत्तमुत स्वतन्त्रम् ॥

इति संशये 'आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशत्' इत्यादिषु स्वातन्त्र्यश्रवणादादित्याद्यधिष्ठानं न परमेश्वरायत्तमिति पूर्वः पक्षः ॥

सिद्धान्तस्तु–परमेश्वरायत्तमिन्द्रियाद्यधिष्ठानमादित्यादीनाम्। कुतः? 'य आदित्यमन्तरो यमयति' 'य आत्मानमन्तरो यमयति' इत्यादिश्रवणात्, परमेश्वरसंकल्पपूर्वकत्वाच्च सर्वप्रवृत्तीनाम्। तस्मादिन्द्रियाद्यधिष्ठानं जीवस्यादित्यादीनां च परमेश्वरायत्तमेव ॥

॥ सू ॥ तस्य च नित्यत्वात् ॥ १४ ॥

सर्वस्य च परमेश्वरनियम्यत्वं नित्यमेव। अतोऽपि परमेश्वरसंकल्पायत्तमेवै-

---

अथ ज्योतिराद्यधिष्ठानाधिकरणम् ॥ ६ ॥

सू ॥ ज्योतिराद्यधिष्ठानं तु तदामननात्प्राणवता शब्दात् ॥ १३ ॥ आदित्यादीनामभिमानिदेवतानां जीवस्य च श्रुतिसिद्धं प्राणाधिष्ठातृत्वम्। तत्राभिमानिदेवतानां तदधिष्ठातृत्वमीश्वरायत्तं स्वतन्त्रं वेति संशये यद्यऽपि 'परात्तु तच्छ्रुते' रि (ब्र–२. ३–४०) त्यधिकरणे जीवानां कर्तृत्वमीश्वरायत्तमित्यविशेषेणोपपादितं तथाप्यादित्यादीनामीश्वरदत्तैश्वर्याणामीश्वरवदाराध्यत्वफलप्रदत्वादिसत्त्वेन स्वातन्त्र्यमप्यस्तु कर्तृत्वस्य परायत्तताश्रुतेः मनुष्यादिविषयत्वेन 'समोऽनेन सर्वेणे'ति श्रुतेस्समष्टिप्राणविषयत्वेनेव संकोचसंभवे तत्तदैश्वर्यश्रवणानुगृहीतस्य स्वातंत्र्यश्रवणस्य बाधनायोगादिति पूर्वः पक्षः। अत्र सौत्रं सिद्धांतमाह–सिद्धान्तस्त्विति। ज्योतिरादीनामादित्यादीनां यदधिष्ठानं चक्षुराद्यधिष्ठातृत्वं तत् तदामननात्तस्य परमेश्वरस्य सङ्कल्पात्। कुतः। तस्यान्तर्यामित्वश्रुतेरिति सूत्रार्थः। प्राणवता जीवेन सहेति दृष्टान्तार्थमुपादानम्। यथा जीवस्य स्वातन्त्र्यश्रवणेऽपि तस्येंद्रियाधिष्ठातृत्वं परायत्तम् एवमिंद्रियाभिमानिदेवतानामपीति भावः। ननु परमेश्वरदत्तैश्वर्येण देवतानां मनुष्यादिजीवाद्विशेषोऽस्तीति शंकानिराकरणार्थं सूत्रम्–तस्य च नित्यत्वात् ॥ १४ ॥ 'स ईशोऽस्य जगतो नित्यमेवे'ति श्रुतेर्नित्यं संसारिणां परमेश्वरनियम्यत्वम्। अतः प्रागधिकारप्राप्तेः परमेश्वरनियम्यानां तदनन्तरमपि नियम्य-

---

इति प्राणव्याप्तिश्रुत्या 'एतत्सर्वं जगद्व्याप्य तिष्ठति प्राण एव तु। अतो धृतं जगत्सर्वमन्यथा केन धार्यते' इति स्मृत्युक्तयुक्तिसहितया बाधात् 'अणुनैतत्सृज्यते अणुनैतद्धार्यते अणौ लयमभ्युपैति प्राणोऽणु' रिति श्रुतिरप्रमाणमिति पूर्वपक्षः। 'अणुरेव मुख्यप्राणोऽयमुत्क्रामति नाडीभि' रिति सयुक्तिकश्रुतेरणुरेवायम्। व्याप्तिश्रुतिस्तु समस्तकंधगतलोकधारकमुख्यवायुरूपस्य तस्य व्याप्तिमाह–'स वा एष प्राणोऽणुर्महा' नित्यादिश्रुतेरिति सिद्धान्तः। सूत्रार्थः स्पष्टः ॥

इति मुख्यप्राणाणुत्वाधिकरणम् ॥ ५ ॥

णामधिष्ठातृत्वम् ॥ इति ज्योतिराद्यधिष्ठानाधिकरणम् ॥ ६ ॥

अथ त इन्द्रियाधिकरणम् ॥ ७ ॥

॥ सू ॥ त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १५ ॥

इह पूर्वोक्तानि वागादीनीन्द्रियाणि प्राणवृत्तिभ्यो भिन्नानि न वा ?.

इति संशये तानि मुख्यप्राणवृत्तय एव, 'एतस्यैव सर्वे रूपमभवन्' इत्या-

त्वमवर्जनीयमिति भावः । इति ज्योतिराद्यधिष्ठानाधिकरणम् ॥ ६ ॥

अथ त इंद्रियाधिकरणम् ॥ ७ ॥

सू ॥ इंद्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १५ ॥ इंद्रियवृत्तिः प्राण इति शङ्का 'न वायुक्रिये' इत्यधिकरणे निरस्ता । इह 'प्राणवृत्तय इन्द्रियाणीति' शङ्का निरस्यते । नन्विन्द्रियाणामादित्यादीनधिष्ठातॄन्सिद्धवत्कृत्य तेषामधिष्ठातृत्वं परमेश्वरायत्तमिति पूर्वाधिकरणे प्रसाधितम् । तन्न सिद्ध्येत् यदि प्राणवृत्तय इंद्रियाणि स्युः । न हि वृत्तिमदधिष्ठातृव्यतिरेकेण वृत्तीनामधिष्ठात्रपेक्षास्ति । वृत्तिप्रसरणार्थत्वाद्वृत्तिमदधिष्ठानस्य । सत्यम् । इह तदेवाक्षिप्यते । अत एवाक्षेपिकी सङ्गतिरस्याधिकरणस्य । न च श्रुतिसिद्धमादित्यादीनां चक्षुराद्यधिष्ठातृत्वमाक्षेप्तुमशक्यमिति वाच्यम् । चक्षुरादीनामादित्यादिरूपत्वेनादित्यादिदैवत्यत्वेन वोपासनार्थानि 'आदित्यश्चक्षुर्भूत्वेत्यादि' वाक्यानीत्युपपत्तेः । यथाश्रुतार्थस्य बाधितत्वात् । अस्मदादीन्द्रियाणामादित्याद्यधिष्ठानेन ज्ञानकर्मार्जकत्वे हि तत्प्रयुक्तपुण्यपापफलभोक्तृत्वमपि तेषां प्रसज्यते। कर्तृत्वभोक्तृत्वयोरैकाधिकरण्यनियमात् । जीवाधिष्ठितानामिन्द्रियाणामादित्यादिभिरप्यधिष्ठितत्वे जीवस्यादित्यादीनाञ्च कदाचिद्वैमत्येन कार्यानिष्पत्तिप्रसङ्गाच्च । न च जीवो नेन्द्रियाणामधिष्ठाता तद्गोचरापरोक्षज्ञानरहितत्वात् किं

नयमणिमालायाम्

अथ ज्योतिराद्यधिष्ठानाधिकरणम् ॥ ६ ॥

सू ॥ ज्योतिराद्यधिष्ठानं तु तदामननात्प्राणवताशब्दात् ॥ १३ ॥ तस्य च नित्यत्वात् ॥ १४ ॥

अक्षाधिष्ठातृत्वं जीवस्याग्न्यादिदेवतानां च । न परस्मिन्नायतते तदधिकृतेः पूर्वमेव दत्तत्वात् ॥ १६२ ॥

जीवाग्निप्रभृतीनामन्तर्याम्यादिशास्त्रतोऽवगतम् । नित्यं हि पारतन्त्र्यं तस्मात्तत्स्यात्परायत्तम् ॥ १६३ ॥

इति ज्योतिराद्यधिष्ठानाधिकरणम् ॥ ६ ॥

सूत्रार्थचन्द्रिकायाम्

अथ ज्योतिराद्यधिष्ठानाधिकरणम् ॥ ६ ॥

सू ॥ ज्योतिराद्यधिष्ठानं तु तदामननात्प्राणवताशब्दात् ॥ १३ ॥ तस्य च नित्यत्वात् ॥ १४ ॥

भगवत्पादमते अत्र आधिदैविकाद्यधिष्ठितानामाध्यात्मिकानामिन्द्रियाणां चेष्टामाचष्टे—**ज्योतिरादीत्यादिना** । 'आदित्यश्चक्षुर्भूत्वे' त्यादिनेन्द्रियाणां देवताधीनचेष्टावत्त्वश्रुतेः 'चक्षुषा हि रूपाणि पश्यती' ति श्रुत्या विरोधोऽस्ति न वेति **संदेहः** । अस्तीति **पूर्वपक्षः** । **सिद्धान्तस्तु, ज्योतिराद्यधिष्ठानं तु**=ज्योतिरादिभिरादित्यादिभिरधिष्ठीयते प्रेर्यते इत्यधिष्ठानम् अधिष्ठितं वागादिकं चेष्टते । कुतः । **तदामननात्**=तस्य देवताधिष्ठितत्वस्य 'आदित्यश्चक्षु' रित्यादिश्रुत्याभिधानात् । 'चक्षुषा ही'ति श्रुतौ तु देवताधिष्ठितत्वानिषेधात् न तयैतस्या विरोध इति सिद्धम् ॥

देवतानामधिष्ठातृत्वे तासां भोक्तृत्वं प्रसज्येतेत्यत आह—**सू ॥ प्राणवता शब्दात् ॥ १५ ॥ प्राणवता**=जीवेनैवेन्द्रियाणां स्वस्वामिभावः संबन्धः । ततश्चेन्द्रियसाध्यभोगभाक्त्वं जीवस्यैव न देवतानाम् । कुतः । **शब्दात्**='स चाक्षुषः पुरुषो दर्शनाय चक्षु' रित्यादिश्रुतेरित्यर्थः ॥

दिना तेषां प्राणरूपत्वश्रवणात्, वागादीनामुपरमरूपे मरणे प्राणो गत इति व्यवहारसामान्याच्च। तस्मात् प्राणादनन्यानीन्द्रियाणि ॥

इति प्राप्ते ब्रूमः–मुख्यप्राणादन्यान्येवेन्द्रियाणि, श्रेष्ठादन्ये ये प्राणास्त इन्द्रि-

---

त्वादित्यादय एव तेषामतीन्द्रियार्थदर्शित्वादिति वाच्यम् । जीवस्याप्यभिमतार्थग्राहके-न्द्रियमनस्संयोजनादिव्यापारेण ज्ञानेन्द्रियकर्मेन्द्रियाधिष्ठातृत्वस्यानुभवसिद्धत्वात् । 'अथ यो वेदेदं जिघ्राणीति स आत्मे'त्यादिश्रुतिषु सङ्कल्पपूर्वकं जीवे गन्धाघ्राणादिसंपादकत्वस्य प्रतिपादनाच्च । इन्द्रियाणामतीन्द्रियत्वेऽपि तेषामभिमतार्थग्रहणाय नोदनकारिणीषु नाडीषु त्वगिन्द्रियजन्यापरोक्षज्ञानस्य तन्मूलप्रयत्नस्य च संभवाच्च। अत एव नाडीगो-चरप्रयत्नेनैव तन्नोदनीयानां श्वासमलमूत्रादीनामिच्छया मोचनं धारणं च दृश्यते। 'प्राणान्गृहीत्वा स्वे शरीरे यथाकामं परिवर्तत'इति श्रुतिरपि चक्षुरादीनां जीवाधिष्ठानेन वृत्तिसंकोचं स्वापे सुषुप्साधीनत्वदर्शनेन लोकानुभवसिद्धमनुवदति। तदित्थं पूर्वाधिकरण-सिद्धार्थाक्षेपेणास्याधिकरणस्य प्रवृत्तिरिति श्लिष्यते । अत्रायं पूर्वपक्षः–इंद्रियाणि प्राण-वृत्तयः। तादधीन्यताद्रूप्यतत्कृततन्नामभाक्त्वश्रवणात्। प्राणाधीनस्थितिकत्वं हीन्द्रियाणां श्रूयते। 'प्राण उच्चिक्रमिषन् स यथा सुहयः पड्वीशशंकून् सङ्खिदेदेवमितरान्प्राणान्समखिद' दिति। तथा ताद्रूप्यं तत्कृततन्नामभाक्त्वं च श्रूयते। 'त एतस्यैव सर्वे रूपमभवन् तस्मा-देत एतेनाख्यायन्ते' इति। अत इंद्रियाणि प्राणवृत्तय इति सूत्रं योजयन् सिद्धांतमाह– मुख्यप्राणादिति। 'इंद्रियाणी'ति सूत्रे पक्षनिर्देशः। 'श्रेष्ठादन्यत्रे'ति साध्यनिर्देशः। श्रेष्ठा-दन्यानीत्यर्थः । एतैः पदैरावृत्तैरन्यैश्च सूत्रपदैर्हेतुनिर्देशः । इतिशब्दश्चाध्याहर्तव्यः । तथा च श्रेष्ठादन्यत्र ते श्रेष्ठादन्ये चक्षुरादयः प्राणा इंद्रियाणीति तेष्वेव तद्व्यपदेशात्

किंच ॥ **तस्य च नित्यत्वात्** ॥ १६ ॥ **तस्य च**=जीवस्य । स्वकर्मार्जिते कार्ये कर्तृत्वेन भोक्तृत्वेन नित्यत्वात् न देवतानां भोक्तृत्वमस्मिन्शरीरे इति सिद्धम् ॥

श्रीकण्ठमते, तथा **रामानुजमते** च अत्र संदेहपूर्वपक्षादीनामविशिष्टत्वेऽपि सूत्रार्थवर्णनमात्रेऽस्ति किंचिदिव वैल-क्षण्यम्। जीवेन सहेन्द्रियाधिष्ठानमादित्यादीनां किं परमेश्वरायत्तमुत स्वतन्त्रमिति **पूर्वपक्षे** प्राप्ते **प्राणवता**=जीवेन सह। **ज्योतिराद्यधिष्ठानं** तु=आदित्यादेश्चक्षुराद्यधिष्ठानं तु । **तदामननात्**=तस्येश्वरस्याभिमुख्येन मननात् तत्संक-ल्पादित्यर्थः। कुतः। **शब्दात्**='य आदित्यमन्तरो यमयती' त्यादिश्रुतेरित्यर्थः । **रामानुजमते** ज्योतिरादिपदमग्न्या-दीत्यर्थकतया व्याख्याय तदानुगुण्येन 'शब्दा'दिति पदस्य 'योऽग्नौ तिष्ठन् योऽग्निमन्तरो यमयती' त्यादिश्रुतेरित्यर्थकतया च व्याख्यानाद्विशेषः श्रीकण्ठमतात् ॥

सू ॥ **तस्य च नित्यत्वात्** ॥ १४ ॥ **तस्य च**=सर्वेषामात्मतयानुप्रविश्य सर्वनियमनस्य। **नित्यत्वात्**=परमा-त्मनोऽवर्जनीयत्वादित्यर्थः ॥

आनन्दतीर्थमते, अत्र 'ब्रह्मणो वा एतानि करणानि चक्षुः श्रोत्रं मनो वा' गिति इन्द्रियाणां ब्रह्मकरणत्वप्रतिपादिनी काषायणश्रुतिः 'जीवस्य करणान्याहुः प्राणानेतांस्तु सर्वशः । यस्मात्तु तद्वशा एते दृश्यन्ते सर्वदेहिषु ॥' इति सयुक्तिक-सौकरायणश्रुत्या बाध्यते इति **पूर्वपक्षः। सिद्धान्तस्तु,** ज्योतिरादीनामधिष्ठानं ब्रह्मैव तदंशभूतानां चक्षुरादीनामपि प्रेरकम्। 'यश्चक्षुषि तिष्ठ' न्नित्याद्याम्नानात् ब्रह्मकरणत्वश्रुतिर्न बाध्यते इति । सूत्रमपि व्याख्यातम् ॥

सू ॥ **प्राणवता शब्दात्** ॥ १६ ॥ अत्र मते शांकरमतवदेव सर्वत्र सूत्रविभागः। परमात्मा स्वप्रयोज्यैरेव चक्षु रादिभिः करणैः **प्राणवता**=जीवेन कर्त्रा दर्शनादि कारयति न जीवप्रयोज्यैः । कुतः। **शब्दात्**='एष ह्येनेनात्मना चक्षुषा दर्शयति श्रोत्रेण श्रावयति मनसा मनयति' इत्यादिश्रवणादित्यर्थः ॥

सू ॥ **तस्य च नित्यत्वात्** ॥ १७ ॥ चक्षुरादीनां ब्रह्मकरणत्वेऽपि **तस्य च**=तस्य जीवस्य करणस्य तयोः संबन्धस्य च। **नित्यत्वात्**=नित्यत्वश्रवणात्। तद्विवक्षया जीवकरणश्रुतिरुपपद्यत इति भावः ॥

सूत्रार्थचन्द्रिकायां ज्योतिराद्यधिष्ठानाधिकरणम् ॥ ६ ॥

इंद्रियत्वव्यपदेशादित्यर्थः । ननु प्राणव्यावृत्तव्यानादिनामभाजां यथा न प्राणादन्यत्वं तथा इंद्रियाणामप्यस्तु । मैवम् । न हि इंद्रियनामात्र हेतूक्रियते किं तु तच्छब्दोक्त इन्द्रियत्वधर्मः । व्यपदेशादिति हेत्वसिद्धिपरिहाराय तत्र श्रुतिस्मृतिरूपं प्रमाणमुक्तम् । 'श्रेष्ठादन्ये प्राणास्त इंद्रियाणी'ति व्यपदेशानुकरणं मुख्यप्राणे व्यभिचारपरिहारार्थम् । अतश्चक्षुरादीनां प्राणान्यत्वे साध्ये इंद्रियत्वमात्रं हेतुत्वेन विवक्षितमिति न कश्चिद्दोषः । किमिदमिन्द्रियत्वं यद्ज्ञानेंद्रियकर्मेन्द्रियान्तःकरणेष्वनुगतं मुख्यप्राणाच्च व्यावृत्तम् । पञ्चीकरणपक्षे तावदेकैकभूततन्मात्रप्रभवत्वं तत् । श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि क्रमेण शब्दतन्मात्रादिप्रभवाणि पादपाणिवागुपस्थपायवश्च । तथान्तःकरणं तु पार्थिवम् । एतेषामुक्तरीत्या शब्दतन्मात्रादिप्रभवत्वमुदाहृतक्रमेण ज्ञानेन्द्रियकर्मेन्द्रियाणामीशानादिदेवत्यत्वमन्तःकरणस्य सद्योजातदेवत्यत्वं च प्रदर्शयद्भिः[1] पुराणवचनैः प्रकटितम् । अतो न लक्षणस्यासंभवाव्याप्ती । नाप्यतिव्याप्तिः । ब्रह्माण्डनभोगोलक[2]गिरिनदीसमुद्रचन्द्रसूर्यवडबानलप्राणप्रवहानिलादीनां देशरूपाकाशस्य च पञ्चीकरणोक्तप्रक्रियया पञ्चभूतप्रभवत्वेनैकैकभूततन्मात्रप्रभवत्वाभावात् । त्रिवृत्करणपक्षे त्वतीन्द्रियत्वविशेषितमुक्तलक्षणं द्रष्टव्यम् । देशरूपस्याकाशस्य प्रत्यक्षत्वं प्रागुपपादितम् । वायुरपि प्रत्यक्षः । त्वगिंद्रियव्यापारानंतरं वायुर्वातीति प्रतीतेस्त्वक्करणकत्वोपपत्तौ चलदनोकहशाखायां चक्षुर्व्यापारानंतरमुक्तप्रतीतेरिवान्तरालिकानुमानकरणकत्वकल्पनाया गौरवेणायुक्तत्वात् । बहिर्द्रव्यप्रत्यक्षे द्रव्यप्रत्यक्ष इव गुणप्रत्यक्ष इव च नीलघटवदार्थसमाजवशादुपपन्ने विषयगतस्योद्भूतस्पर्शस्येव विशेषप्रयोजकस्योद्भूतरूपस्याप्रयोजकत्वात् । अन्यथा विनिगमनाविरहेण स्पर्शस्तत्र प्रयोजक इत्यपि कल्पनाप्रसङ्गात् चन्द्रप्रभादीनां प्रत्यक्षत्वेऽपि चन्द्रतारादिगत्यनुमानस्य जैनाधिकरणे समर्थितत्वात् लाघवादुद्भूतरूपं द्रव्यप्रत्यक्षमात्रे प्रयोजकमिति कल्पनेनात्मनोऽपि प्रत्यक्षतापलापापत्तेश्च । आत्मनोऽप्रत्यक्षत्वे योऽहमद्राक्षं सोऽहं स्पृशामीत्यभेदप्रत्यभिज्ञा दुरुपपादा चेत् वायोरप्रत्यक्षत्वेऽपि शीतो वायुरिति प्रत्ययो दुरुपपाद इति तुल्यम् । शीतद्रव्योपनायकत्वेनानुमिते वायौ तदभेदारोपासंभवात् । वायोः प्रत्यक्षत्वे तद्गतसंख्यायाः प्रत्यक्षत्वं स्यादाश्रयप्रत्यक्षस्य तत्प्रयोजकत्वादिति चेत् । इष्टापत्तेः । अहं वक्तेति प्रतीतावात्मैकत्ववद्वायुर्वातीति प्रतीतौ तदेकत्वस्य विषयत्वात् । बहुषु वायुषु संघीभूय वीजत्सु सत्यपि प्रणिधाने तद्बहुत्वं न प्रतीयत इति चेन्न । बहूनां वायूनां मेलने तेषां संसर्गिद्रव्यतया जलवदेकद्रव्यतापत्त्या तेषु बहुत्वासिद्धेः । अत एव पशावद्भिगुप्रैषगते 'सूर्यं चक्षुर्गमयताद्वातं प्राणमन्ववसृजता' दिति मन्त्रे बहुपशुकेषु विकृतिपशुष्वतिदेशतः प्राप्ते चक्षुरादिपदानां पशुसंख्यानुरोधेन द्विवचनबहुवचनाभ्यामूहमाशंक्य जलवत्तेजोवाय्वोस्संसर्गिद्रव्यतया सर्वपशुसंबधिनां चक्षुषां प्राणानां च बहिर्निर्गतानामेकीभावो भवतीति यथाप्रकृत्येव मन्त्र इति सिद्धांतितं नवमेऽध्याये । एवमपि वायावयवबहुत्वग्रहणमाशंक्येत यदि विरलतंत्ववयवसंयोगारब्धे वस्त्र इवावयवबहुत्वानुपमर्दनेन वायावैक्यमाविर्भवेत् । न त्वेवम् । संसर्गिद्रव्याणामैक्यापत्तेरवयवबहुत्वोपमर्दकत्वनियमात् । न हि जलबिन्दूनां मेलनेनैक्यापत्तौ सत्यां तेषां विरलसंयोगेन बहुत्वमनुवर्तते । एवं प्रदी-

(१) 'प्रतिपादयद्भिः' इति ख-पाठः । (२) 'भूगोलक' इति ख—पाठः ।

याणीति चक्षुरादिष्वेव 'इन्द्रियाणि दशैकं च' इत्यादिष्विन्द्रियव्यपदेशात् ॥

॥ सू ॥ भेदश्रुतेर्वैलक्षण्याच्च ॥ १६ ॥

पकिरणानां मेलनेऽपि न विरलसंयोगः । मध्येऽन्धकारादर्शनात् । तथा च वायोरपि संसर्गिद्रव्यत्वाविशेषाद्बहूनां वायूनां मेलनेनैक्यापत्तौ बहुत्वाननुवृत्तेर्न तद्ग्रहणप्रसङ्गः । यत्र तु बहुत्वमनुवर्तते तद्ग्रहणे बहुत्वग्रहणमप्यस्त्येव । यथा क्रमिकानेकफूत्कारवायुग्रहणे यथा वा भिन्नभिन्नशरीरावयवसंसृष्टानेकफूत्कारवायुग्रहणे । तथा चाकाशस्य वायोश्च प्रत्यक्षत्वात् न तयोर्लक्षणस्यातिव्याप्तिः । न चैवमपि वायूपनीतचम्पकादिसौरभाश्रयद्रव्यभागेष्वतिव्याप्तिः । तेषामतींद्रियत्वासिद्धेः । जालसूर्यमरीच्याद्यभिव्यंजकाभावे तेषामप्रतीत्युपपत्तेः । ये तु मन्यंते वह्निसहचरितानुद्भूतरूपोद्भूतस्पर्शा ऊष्मादिरूपास्तेजोभागा इव चम्पकादिगन्धद्रव्यसहचरितास्तत्तत्सामान्योद्भूतगन्धा अनुद्भूतरूपस्पर्शाः पार्थिवभागास्सन्ति त एव विसृमराः परितस्तथातथा वासयन्तीति तन्मतानुसरणेऽपि न तेष्वतिव्याप्तिः । तेषां पञ्चीकृतपृथिव्यवस्थाविशेषत्वसंभवेन तदुत्पादनार्थं सर्गाद्यकाले प्राक्पंचीकरणादपञ्चीकृतगन्धतन्मात्रावशेषणकल्पनायां प्रमाणाभावात् । इदमिन्द्रियाणां भौतिकत्वपक्षे पारंपर्यक्रमाधिकरणभाष्यस्वारस्यानुरोधेन लक्षणमुक्तम् । शिवागमादिप्रसिद्धे तेषामाहङ्कारिकत्वपक्षे तु रजस्तमोऽनभिभूताहङ्कारप्रभवत्वादिकं लक्षणमुन्नेयम् । उक्तलक्षणस्येंद्रियत्वस्य हेतूकरणे च न हेतोरप्रयोजकत्वम् । अपञ्चीकृतपृथिव्याद्यवस्थाविशेषरूपाणामिन्द्रियाणां पञ्चीकृतवाय्ववस्थाविशेषरूपप्राणवृत्तित्वं न संभवतीत्यनुकूलतर्कसद्भावात् । अत एव प्राणाधीनशरीरावस्थितिकत्वादिकमिन्द्रियाणां लक्षणांतरं संभवदपि न तदिह हेतुत्वेन विवक्षितम् । तस्य व्यानादिदृष्टान्तेन प्राणवृत्तित्वसाध्यानुकूलतया प्रकृतसाध्यविरुद्धत्वादित्यलं प्रपञ्चेन । यत्तु प्राणाधीनस्थितिकत्वतद्रूपत्वतन्नामत्वश्रवणादिन्द्रियाणां प्राणवृत्तित्वमवसीयत इति पूर्वपक्षशङ्काबीजं तन्निराकरणार्थं सूत्रम्—सू ॥ भेदश्रुतेर्वैलक्षण्याच्च ॥ १६ ॥ प्राणसंवादे खल्विन्द्रियाणां प्राणाधीनस्थितिकत्वादिकं त्रयमपि श्रूयते । तत्र प्राणेन सह तेषां कलहोपक्रमेणैव ततो भेदः स्पष्टीकृतः । चक्षुरादीनामेकैकस्य प्रवासेऽप्यन्येषां यथापूर्वमवस्थानं प्राणस्य प्रवासोद्योग एवान्येषां शैथिल्यापत्तिरिति प्राणस्य चक्षुरादिभ्यो वैलक्षण्यं च तत्रानंतरमेव प्रतिपादितम् । इदमुभयमिन्द्रियाणां प्राणस्य च वृत्तिवृत्तिमद्भावेन संघटते । न हि वृत्तीनां वृत्तिमता सह समस्वातन्त्र्याभिमानेन कलहाभिधानं युज्यते। न वा वृत्तयो वृत्तिमन्तमपहाय प्रवसन्ति। वृत्तिमत्प्रवासे परं नावतिष्ठंत इत्युपपद्यते । तस्मात्प्राणसंवादोपक्रमादिपर्यालोचनयैवेंद्रियाणां प्राणव्यतिरेके स्पष्टे सति तदधीनत्वादिकं न प्राणाभेदसाधनक्षमम् । प्राणाधीनस्थितिकत्वं च शरीरे प्राणादत्यन्तभिन्ने व्यभिचारि । प्राणनामभाक्त्वं च तथाभूते नाभिरन्ध्रे व्यभिचारि । श्रूयते हि—'नव वै पुरुषे प्राणा नाभिर्दशमी'ति । तस्मादिन्द्रियाणां प्राणरूपत्वश्रवणं प्राणश्रैष्ठ्यप्रतिपादनार्थं प्राणनामभाक्त्वश्रवणं च प्राणप्राधान्यात् अच्छात्राणां छत्रिपदेनेव प्राणनाम्ना लक्षणीयत्वप्रतिपादनपरं योज्यमित्येवं सूत्रतात्पर्यं 'चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्य' इति (ब्र०२-४-९) सूत्रगतहेत्वर्थकथनेनैव स्पष्टमिति मत्वा सूत्रस्यार्थांतरमाह—

'एतस्माज्जायते प्राणो मनःसर्वेन्द्रियाणि च' इति प्राणेन्द्रियाणां भेदेनोत्पत्तिः श्रूयते । इन्द्रियाणुपरमेऽपि प्राणवृत्त्यनुपरमरूपं वैलक्षण्यं च दृश्यते । अतोऽपि प्राणवृत्तिभ्यो भिन्नानीन्द्रियाणीति ॥ इति त इन्द्रियाधिकरणम् ॥ ७ ॥

अथ संज्ञामूर्तिक्लृप्त्यधिकरणम् ॥ ८ ॥

॥ सू ॥ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ १७ ॥

एतस्मादिति । भेदेनोत्पत्तिरिति । ननु मनस इंद्रियाणां च भेदेनोत्पत्तिः श्रूयते, अथापि नेंद्रियेभ्यो मनसो भेदः । तथा प्राणादपींद्रियाणां स्यात् । नैष दोषः । मन इति न भिन्नं पदं किंतु मनःप्रधानानींद्रियाणीति शाकपार्थिवादिवत् समासेनैकं पदम् । 'तत्सहशिष्ट्यादिभ्य' इति सौत्रहेतुपर्यालोचनयैवावगन्तुं शक्यमपीन्द्रियाणां प्राणवृत्तिव्यतिरेकं हेत्वंतरैरपि स्पष्टीकर्तुमिदमधिकरणमारब्धमतोऽस्य न वैयर्थ्यम् ॥ इति त इंद्रियाधिकरणम् ॥ ७ ॥

अथ संज्ञामूर्तिक्लृप्त्यधिकरणम् ॥ ८ ॥

सू ॥ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ १७ ॥ 'आकाशो ह वै नाम नामरूपयोर्निर्वहिते'ति वाक्ये नामरूपव्याकर्तृत्वं परमेश्वरस्य प्रतीयते । 'सर्वाणि रूपाणि

नयमणिमालायाम् अथ त इंद्रियाधिकरणम् ॥ ७ ॥

सू ॥ त इंद्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १५ ॥ भेदश्रुतेर्वैलक्षण्याच्च ॥ १६ ॥

अक्षाणि वृत्तयः स्युः मुख्यप्राणस्य यत्तेषाम् । प्राणपदेन व्यवहृतिराम्नातं चैतदीयरूपत्वम् ॥ १६४ ॥
उपरतिमत्स्वक्षेष्वप्यनुपरमात्प्राणवृत्तीनाम् । प्राणाद्भेदेन जनिश्रुतेश्च भिन्नानि तानि स्युः ॥ १६५ ॥

इति त इन्द्रियाधिकरणम् ॥ ७ ॥

सूत्रार्थचन्द्रिकायाम्

अथ त इन्द्रियाधिकरणम् ॥ ७ ॥

सू ॥ त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १५ ॥ भेदश्रुतेर्वैलक्षण्याच्च ॥ १६ ॥

भगवत्पादमते, सत्स्विन्द्रियेषु तदधिष्ठातृविचारः । प्राणव्यापारव्यतिरेकेण तान्येव न सन्तीत्याह—**त इन्द्रियाणीत्यादिना ।** अत्र 'एतस्माज्जायते प्राणो मनःसर्वेन्द्रियाणि च' इति मुख्यप्राणादिन्द्रियाणां तत्वान्तरत्वश्रुतेः 'त एतस्यैव सर्वे रूपमभवन्' इति प्राणात्मकत्वश्रुत्या विरोधोऽस्ति न वेति **संदेहः ।** अस्तीति **पूर्वपक्षः । सिद्धान्तस्तु, श्रेष्ठात्**=मुख्यप्राणात् । **अन्यत्र**=अन्ये ते प्रकृता वागादय इन्द्रियाणीत्युच्यन्ते न प्राणाः । कुतः । **तद्व्यपदेशात्**='एतस्माज्जायते' इत्यादौ तस्य भेदस्य व्यपदेशात् इन्द्रियाणां प्राणात्मकत्वश्रुतेर्गौणत्वेन न तया विरोधः ॥

किंच । **सू ॥ भेदश्रुतेः ॥ १८ ॥** वागादीन्द्रियप्रकरणमुपसंहृत्य 'अथ हेममासन्यं प्राणमूचु' रिति भिन्नप्रकरणे प्राणस्येन्द्रियेभ्यो भेदेन श्रवणात् न प्राणव्यापारत्वमिन्द्रियाणां किं तु तत्त्वान्तरत्वमेवेत्यर्थः ॥

किं च ॥ **सू ॥ वैलक्षण्याच्च ॥ १९ ॥** सुषुप्त्यवस्थायां प्राणस्य स्थितिर्नेन्द्रियाणामित्यादिवैलक्षण्यात्तत्त्वान्तरत्वम् । तस्मान्नानयोर्विरोध इति सिद्धम् ॥

श्रीकण्ठमते, तथा **रामानुजमते,** च सर्वमविशिष्टं पूर्वस्मात् । **भेदश्रुतेर्वैलक्षण्याच्चे**त्येकमेव सूत्रमनयोर्मतयोरिति विशेषः ॥ '**तद्व्यपदेशा**'दिति पदं तेष्वेवेन्द्रियशब्दनिर्देशादित्यर्थकतया च व्याख्यातमन्यदविशिष्टम् ॥

आनन्दतीर्थमते, 'अथेन्द्रियाणि प्राणा वा इन्द्रियाणि हीदं द्रवन्ती'ति सर्वेषां प्राणशब्दवाच्यनामविशेषेणेन्द्रियत्वमिदंद्रावकत्वयुक्तिपूर्वकं प्रतिपादयन्त्या पौत्रायणश्रुत्या विरोधात्, 'द्वादशैवेन्द्रियाण्याहु' रिति काषायणश्रुतेरप्रामाण्यात्कस्येन्द्रियत्वं निवार्यमिति **पूर्वपक्षः । सिद्धान्तस्तु, अन्यत्र श्रेष्ठात्**=मुख्यप्राणादन्ये ये प्राणा**स्ते द्वादशैवेन्द्रियाणि ।** न तु मुख्यप्राणोऽपि । कुतः । **तद्व्यपदेशात्**='द्वादशैवेन्द्रियाणि' इति श्रुतौ तथोक्तत्वादिति ॥

सू ॥ भेदश्रुतेः ॥ १९ ॥ शांकरमतवदिदं पृथक्सूत्रम् । मुख्यप्राणस्य सर्वकर्तृकारयितृत्वरूपभेदकधर्मस्यान्येषां तदभावस्य च 'स्थित एव ही'ति श्रुतौ श्रुतत्वान्न तस्य चक्षुराद्यविशेष इत्यर्थः ॥

सू ॥ वैलक्षण्याच्च ॥ २० ॥ मुख्यप्राणस्य तदितरप्राणानां च केवलेश्वराधीनत्वेश्वरजीवोभयाधीनत्वरूपवैलक्षण्यसत्वाच्च न तस्येन्द्रियत्वं किं तु चक्षुरादीनामेवेत्यर्थः ॥

इति सूत्रार्थचन्द्रिकायां त इन्द्रियाधिकरणम् ॥ ७ ॥

पूर्वमाकाशादीनां भूतानां सह सदाशिवादिभिरधिष्ठातृभिः परमेश्वरादुत्पत्तिरभिहिता । तदेवं तेषु जातेषु ततो देवानां नामरूपादिक्लृप्तिस्तस्मादेव मूलकारणात् उतान्यस्मादिति संदेहः ॥

एवं सति 'तत् तेज ऐक्षत बहु स्यां प्रजायेयेति, तदपोऽसृजत' इति श्रुतेस्तेजोऽभिमानी रुद्रोऽपः सृजति, तासु च स्ववीर्यं क्षिपति, तासु सत्त्वसहितो विष्णुरभिवर्तते इति । 'आपो नारा नरो रुद्रः' इति श्रुतिदर्शनाद्रुद्रसंभूतासत्त्वायतनत्वेन विष्णोर्नारायणसंज्ञता । 'ता आप ऐक्षन्त' 'ता अन्नमसृजन्त' इति श्रुतेस्तदभिमानी नारायणोऽन्नशब्दवाच्यां पृथिवीमुत्पादयति । तत्र पृथिवीतत्त्वरूपे अण्डे हिरण्यगर्भः संवर्तते । तथा हि श्रूयते—'अण्डं हिरण्मयं मध्ये समुद्रं रुद्रस्य वीर्यात् प्रथमं संबभूव । तस्मिन् ब्रह्मा विष्णुर्जातो जातवेदाः' इति ॥

विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते' इति मन्त्रे पुरुषस्य नारायणस्य । वेदेन रूपे व्याकरोत् सतासती प्रजापति'रिति वाक्ये हिरण्यगर्भस्य । अत्र हि रूपग्रहणं नाम्नोऽप्युपलक्षणम् । नामरूपव्याकरणयोस्समानकर्तृकत्वनियमात्, 'नाम रूपं च भूतानां कृत्यानां च प्रपञ्चनम् । वेदशब्देभ्य एवादौ देवादीनां चकार स' इति तदुपबृंहणाच्चेत्येवं जीवोपकरणसृष्ट्यात्मकनामरूपव्याकरणकर्तृत्वविषयश्रुतिविरोधसमाधानमिह क्रियते । अतोऽध्यायपेटिकापादसंगतयः । पूर्वाधिकरणे प्राणनामरूपभाक्त्वमिंद्रियाणां पूर्वपक्षबीजतया बुद्धिस्थमासीदिति नामरूपप्रसंगात्तद्व्याकर्ता निरूप्यत इत्यनंतरसङ्गतिः । एवं सतीत्यादि । 'तेजोऽतस्तथा ह्याहे' त्यधिकरणसिद्धां साधिष्ठातृकारणां सर्वेषां भूतानां साक्षादेव परमेश्वरादुत्पत्तिमंगीकृत्य तदनन्तरमण्डान्तर्वर्तिनामिन्द्रादिदेवानां नामरूपादिक्लृप्तिमेतदधिकरणविषयत्वेन निर्दिश्य सा मूलकारणात्परब्रह्मण उतान्यस्माद्धिरण्यगर्भादेरिति श्रुतिविप्रतिपत्तिबीजसन्देहः प्राक्प्रदर्शितः । कथं 'तत्तेज ऐक्षते'त्यादिश्रुतिमपि तद्भूताधिष्ठातृदेवताविषयामापाद्य पूर्वपूर्वभूताधिष्ठातुरुत्तरोत्तरभूतानां साधिष्ठातृकाणामुत्पत्तिराशंक्यते ? उच्यते । तदधिकरणस्थितिरप्यनेनाक्षिप्यत इत्यभिप्रेत्यैवमाशंक्यते । अन्यथा हि तत्राकाशाद्यधिष्ठातृसदाशिवादिशरीरकात्परमेश्वरात्साधिष्ठातृकपवनाद्युत्पत्तिरिति निरूपितत्वात्तेनैव न्यायेन नारायणहिरण्यगर्भशरीरकात्ततस्तत्तद्देवादिनामरूपक्लृप्तिरित्युदाहृतत्रिविधवाक्यविरोधसमाधानसिद्धेरिदमधिकरणमनारंभणीयं स्यादिति । 'ननु तत्तेज ऐक्षते' त्यादिकमीक्षणं परमेश्वरस्यैव न तु तत्तद्भूताभिमानिनः, परमेश्वरबहुभवनसङ्कल्पप्रपञ्चनरूपत्वादिति तदभिध्यानसूत्रेणोक्तं कथं तदेवेक्षणं भूताभिमानिन इत्याशंक्यते । परमेश्वरस्य स्वयं प्रथमकार्यतदधिष्ठातृमात्रस्रष्टृत्वेऽपि तत्सृष्टकार्यपरंपरया तस्य बहुभवनमुपपद्यते कूटस्थस्येव पुत्रपौत्रप्रपौत्रपरंपरयेति । एवं पारमेश्वरबहुभवनसंकल्पाविरोधमभिप्रेत्यैवमाशंक्यते । अत्रायं पूर्वपक्षाभिप्रायः । 'तत्तेज ऐक्षते'त्यादिश्रुतेरुपबृंहणानुसारेण वीर्यक्षेपादिद्वारा पृथिव्यादिसृष्टिपरत्वमङ्गीकरणीयम् । वीर्यक्षेपकत्वं च मूर्त्यात्मनस्तेजोऽभिमानिनो रुद्रस्यैवेत्युदाहृतपुराणवचनादवगम्यते । 'तेन क्षिप्तं रसे वीर्यं वरमूर्त्यभिमानिने'ति ॥ अतो यस्य जले पृथिव्युत्पादनसामर्थ्याधायकवीर्यक्षेपकत्वं तस्यैव जलस्रष्टृत्वं तत्सृष्टिसङ्कल्परूपेक्षणवत्त्वं च वक्तुं युक्तमिति 'तत्तेज ऐक्षते'ति वाक्यं तावद्रुद्रविषयम् । एवं ता

'अप एव ससर्जादौ तासु वीर्यमवासृजत् । तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ॥ तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः । आपो नारा इति प्रोक्ता आपो वै नरसूनवः ॥ अयनं तस्य ता यस्मात् ततो नारायणः स्मृतः । नारायणः परोऽव्यक्तोऽव्यक्तादण्डसमुद्भवः ॥ अण्डस्यान्तस्त्विमे लोकास्सप्तद्वीपा च मेदिनी ।'

इति मनुस्मृतिः । पुराणं च—

'रुद्रसंज्ञस्य देवस्य रूपे मूर्तिः प्रजायते । तेन क्षिप्तं रसे वीर्यं परं मूर्त्यभिमा-

---

आप ऐक्षन्ते'ति वाक्यमपि जलाभिमानिनारायणविषयं 'यतो विष्णुस्तत्प्राविश'दित्याद्युपबृंहणश्लोकेन । तद्वीर्यं कथं ब्रह्माण्डमभवदित्याकांक्षायां परमेश्वरदत्तसामर्थ्यस्य विष्णोस्तदेव वीर्यमण्डरूपेण परिणामयितुं तन्मध्ये हिरण्यगर्भं स्रष्टुं च तद्वीर्याहितसामर्थ्यजलप्रवेशं तमेव निमित्तं कृत्वा । परमेश्वरनियोगान्नारायणसंज्ञाभाक्त्वं च प्रतिपाद्यते । एवं च तदनंतरमण्डमध्ये देवादिनामरूपव्याकर्तृत्वं च यथार्हं तेषामेव रुद्रनारायणहिरण्यगर्भाणामिति युक्तम् । अत एव श्रुतावपि 'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी'ति तेजोऽबन्नाभिमानिरुद्रनारायणहिरण्यगर्भात्मकजीवरूपेणैव नामरूपव्याकर्तृत्वं परमेश्वरस्य प्रतिपाद्यते । न च 'व्याकरवाणी'ति उत्तमपुरुषप्रयोगतः परमेश्वरस्य साक्षादेव तत्प्रतिपाद्यते इति वाच्यम् । चारेण परसेनां प्रविश्य संकलयामीति लौकिकवाक्ये चारेणेति विशेषणवशेनेव जीवेनेति विशेषणबलेनोत्तमपुरुस्य गौणत्वावसायात् । एवं च यथासंकल्पं सृष्टिरिति 'नामरूपे व्याकरो'दिति तदनंतरवाक्यमपि गौणमेव । न च जीवेनेत्यस्यानुप्रवशेनैव सम्बंधः सन्निधानादिति वाच्यम् । अभ्यर्हितप्रधानान्वयाकांक्षालक्षणप्रकरणस्य सन्निधानतः स्थानप्रमाणात्प्रबलत्वात् । न च देवादीनां गिरिनदीसमुद्रादीनां च नामरूपव्याकरणे जीवस्य नास्ति योग्यत्वमतः परमेश्वरस्यैव तत्र योग्यत्वात् योग्यतारूपेण लिंगेनाकांक्षालक्षणप्रकरणबाधात् सन्निधानतः प्रवेशेनैवान्वयः स्यादिति वाच्यम् । चैत्रमैत्रघटपटादिनामरूपव्याकरणे अर्वाचीनानामपि सामर्थ्यदर्शनेन परमेश्वरदत्तमहासामर्थ्यानामीश्वराणां तत्रापि सामर्थ्योन्नयनात् प्रवेशान्वये तत्समानकर्तृकव्याकरणान्वयस्याप्यवर्जनीयत्वाच्च । अन्यथा क्त्वाश्रुतिविरोधापत्तेः । न चेयं सहार्थे तृतीया । येन प्रवेशमात्रान्वयेऽपि क्त्वाश्रुतिरुपपाद्येत । किं तु कर्तर्येव । कारकविभक्तेर्बलीयस्त्वादुपपदविभक्तेः पदान्तरसापेक्षत्वेन दुर्बलत्वात् । एतेन 'जीवेनात्मने'त्यस्य जीवशरीरकेण मयेत्यर्थकल्पनं निरस्तम् । तेजःप्रभृत्यमानिनो जीवस्यापि देवादिनामरूपव्याकरणसामर्थ्यसंभवे जीवशब्दस्य प्रसिद्धार्थातिक्रमेणान्तर्यामिपर्यन्तत्वकल्पनायोगात् । न चात्मपदसामानाधिकरण्यात्तस्य तत्पर्यंतत्वं कल्पनीयं परमेश्वराद्भिन्नस्य जीवस्य तदात्मत्वानुपपत्तेरिति शंकनीयम् । प्रथमश्रुतजीवशब्दस्वारस्यानुरोधेनात्मशब्दस्य शरीरपरत्वोपपत्तेः । न च 'नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमेकैकां करवाणी'ति समभिव्याहारेण त्रिवृत्करणनामरूपव्याकरणयोरेककर्तृ-

---

(१) 'शंकनीयम्' इति ख-पाठः । (२) चारेणानुप्रविश्य परसैन्यं संकलयामीति' इति ख-पाठः । (३) 'तथाच' इति क-ग-पाठः ।

निना ॥ तदण्डमभवद्धैमं सहस्रकिरणप्रभम् । विष्णुस्तत्प्राविशत्साक्षान्मम शक्तेस्तु वैभवात् ॥ पुनर्नारायणाख्यां मे नियोगात्प्राप्तवानसौ । इमं चोदाहरत्यत्र श्लोकं नारायणं प्रति ॥ आपः सूक्ष्मो रसो ज्ञेयो रसो नारः प्रकीर्तितः । नरजातस्ततो ब्रह्मा नरः साक्षाच्छिवः स्मृतः ॥ नारमस्यायनं प्रोक्तं तेन नारायणः स्मृतः ॥ ब्रह्मापि नरशार्दूल गन्धमूर्तिं समाविशत् ॥' इत्यादि । एवं च 'वेदेन रूपे व्याकरोत् । सतासती प्रजापतिः' इत्यादिश्रुतेः अण्डान्तर्वर्ती हिरण्यगर्भो वा । 'अद्भ्यः संभूतः पृथिव्यै रसाच्च' इत्यादिश्रुतेर्नारायणो वा देवादीनामण्डान्तर्वर्तिनां नामरूपकर्ता भवितुमर्हति, न ब्रह्माण्डादेरुत्तीर्णः परमेश्वर इति

कत्वावगमात्त्रिवृत्करणस्य परमेश्वरकर्तृकतया नामरूपव्याकरणस्यापि तत्कर्तृकत्वप्रतीतेस्तदुपपत्तये जीवशब्दस्यान्तर्यामिपरत्वं कल्पनीयमिति वाच्यम् । त्रिवृत्करणस्य परमेश्वरकर्तृकत्वासिद्धेः अण्डसृष्ट्यनंतरभाविष्वग्न्यादिषु छांदोग्ये प्रदर्श्यमानस्य त्रिवृत्करणस्याण्डोत्पत्तिकहिरण्यगर्भकर्तृकत्वसंभवात् । तथापि पूर्वकल्पवृत्तांतानभिज्ञस्यैतत्कल्पादावुत्पन्नस्य हिरण्यगर्भादेः पूर्वकल्पगतदेवादिसदृशनामरूपतया देवादिस्रष्टृत्वं न संभवतीति जीवशब्दस्य तत्पर्यंतत्वं कल्पनीयमिति चेत् न । वेदशब्देभ्यस्तदवगत्या तत्सदृशनामरूपस्रष्टृत्वोपपत्तेः 'वेदेन रूपे व्याकरो'दितिश्रुतौ तदुपबृंहणेषु च तथैव प्रतिपादनाच्च । अपि चोदाहृतश्रुतितदुपबृंहणेषु नामरूपव्याकर्तृपरप्रजापत्यादिशब्दानामंतर्यामिपरत्वं कल्पयितुं न युक्तम् । स्वतस्सिद्धसार्वज्ञ्यस्य परमेश्वरस्य पूर्वकल्पवृत्तांतज्ञानाय वेदानपेक्षणात् तस्य प्रजापतिमात्रपरत्वेन प्रसिद्धस्य प्रजापतेर्नामरूपव्याकरणकर्तृत्वसिद्धौ व्यर्थमन्यत्र तद्वाचिशब्दस्यांतर्यामिपर्यन्तत्वकल्पनम् । एवञ्च 'प्रजापतिरकामयत प्रजास्सृजेयेति' 'प्रजापतिः प्रजा असृजत' इत्यादिश्रुतीनामपि हिरण्यगर्भस्य देवमनुष्यादिनामरूपस्रष्टृत्वे प्रामाण्यमव्याहतम् । अपि च । बृहदारण्यकेऽपि 'आत्मैवेदमग्र आसीत्पुरुषविध' इति हिरण्यगर्भं प्रस्तुत्य 'ततो मनुष्या अजायंते' त्यादिना 'यदिदं किं च मिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजते' त्यन्तेन तस्य मनुष्यादिस्रष्टृत्वमुक्त्वा तदनंतरमग्न्यादिस्रष्टृत्वमप्युक्तम् । न च तत्र परब्रह्मणः प्रस्ताव इति शङ्कनीयम् । 'स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान्पाप्मन औषत्तस्मात्पुरुष' इत्यतः पाप्मसंसर्गप्रतीत्या 'सोऽबिभेन्नैव रेमे' इति भयारतिश्रवणेन च तस्य संसारित्वावगमात् । एवं कूर्मपुराणादिषु परमेश्वरनियोगाद्धिरण्यगर्भादीनां स्रष्टृत्वादि प्रतिपादितम् । तदप्यनन्यथासिद्धमत्र प्रमाणं वेदितव्यम् । न हि तस्यांतर्यामिपर्यवसायित्वे तन्नियोगाधीनत्ववचनमन्वेतीति । 'अण्डं हिरण्मय'मिति भाष्योदाहृतश्रुतौ विष्णुरुपेन्द्रः । तोयाभिमानिनो नारायणस्योत्पत्तेरण्डसृष्टितः प्राचीनत्वात् ।(१) 'अप एव ससर्जादा' वित्यादिमानववचनानां 'ततः स्वयंभूर्भगवानव्यक्तो व्यंजयन्निदम् । महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः । योऽसावतींद्रियग्राह्यः सूक्ष्मोऽव्यक्तस्सनातनः । सर्वभूतमयोऽचिंत्यस्स एव स्वयमुद्बभौ । सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजा' इति पूर्वभागः । तत्र 'तमोनुद' इति पंचम्यंतं पदं परमेश्वरात्सदाशिवमहेश्वरक्रमेणोत्पन्नं तेजोऽभिमानिनं रुद्रमाचष्टे । ततः स्वयंभूर्भगवान्नारायणस्तोयाभिमानी प्रादुर्भूत इत्यर्थः । 'सोऽभिध्याये'

(१) 'नारायणस्याण्डसृष्टितः प्रागुत्पन्नत्वात्' इति–क—ग—पाठः ।

पूर्वः पक्षः ॥

सिद्धान्तस्तु—न युक्तः प्रतिपादितसृष्टिक्रमः । किंतु 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' 'तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत' इत्यादि-श्रुतेः सच्छब्दवाच्यं ब्रह्मैव पञ्चभूतकारणम् । तेजःप्राथम्यं परिहृतम् । ततश्चा-काशादि पृथिव्यन्तं सदाशिवादिसंज्ञया पूर्वपूर्वकारणरूपं ब्रह्म उत्तरोत्तरं कार्यं सृजतीति, 'तदैक्षत तत्तेज ऐक्षत ता आप ऐक्षन्त' इति श्रुत्यावगम्यते । 'हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवा-णीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' इति त्रिवृत्कुर्वत एव परमेश्वरस्य

ति तच्छब्दस्तमोनुदं रुद्रं परामृशति । न तु ततः प्रादुर्भूतं नारायणम् । 'रुद्रस्य वीर्या'-दिति श्रुतेरुदाहृतत्वात्तदनुसारिपुराणवचनस्योदाहरिष्यमाणत्वाच्च । 'आपो नारा इति प्रोक्ता' इति नारायणनामनिर्वचनं 'ततः स्वयंभूर्भगवा'नित्युक्तप्रादुर्भवितृविषयं न तु वीर्यक्षेप्तृविषयम् । 'विष्णुस्तत्प्राविशत्साक्षा'दित्युदाहरिष्यमाणपुराणवचने यौगिकार्थस्य तत्रैव प्रतिपादनात् । अत उदाहृतश्रुतिस्मृतिपुराणवचनानामैकार्थ्यमिति भाष्याभिप्रायः । सिद्धान्तस्त्विति । अयमाशयः । 'तदैक्षत बहु स्यां प्रजायेये'ति प्रतिपाद्यमानः परमेश्व-रस्य बहुभवनसंकल्पस्साक्षात्तस्यैव बहुभवनविषयः स्वरसतः प्रतीयते । न तस्यासति बाधके तत्कार्यतत्कार्यपरंपराप्राप्यगौणबहुभवनविषयतया योजनं कर्तुं युक्तम् । न चात्र किञ्चिद्बाधकमस्ति । पुराणेषु पूर्वपूर्वकार्याधिष्ठातॄणामुत्तरोत्तरकार्यस्रष्टृत्वं प्रतिपाद्यत इति चेत् किं ततः । न तेन बहुभवनसंकल्पादिप्राप्तं परमेश्वरस्य सर्वत्र कार्ये साक्षात्कर्तृत्वं बाध्यते । उभयकर्तृकत्वाविरोधात् । अत एव प्रत्यक्षतः कुलालादिकर्तृकत्वेनावगतस्य घटादेः श्रुतिप्राप्तं परमेश्वरकर्तृकत्वमभ्युपगम्यते । ननु तेषां पुराणवचनानां 'तत्तेज ऐक्षते-त्यादिनैव मूलेन भाव्यमिति तस्य परमेश्वरविषयत्वं न संभवतीति चेत्तन्मूलाना 'मण्डं हिरण्मय'मित्यादिवचनांतराणां सत्वात् 'तेन क्षिप्तं रसे वीर्य'मित्यादिपुराणवचनार्थानां 'तत्तेज ऐक्षते'त्यादिष्वप्रतिपादनेन तेषा 'मण्डं हिरण्मय'मित्यादिश्रुत्यन्तरमूलत्वस्यावश्य-वक्तव्यत्वाच्च । ततः 'तेजोऽतस्तथा ह्याहे'त्यधिकरणोक्तरीत्या 'तत्तेज ऐक्षत' 'ता आप' ऐक्षन्ते'ति वाक्ययोः पारमेश्वरबहुभवनसंकल्पप्रपंचनपरतया तस्यैव सर्वेषु भूतेषु साक्षा-त्कर्तृत्वप्रतिपादने पर्यवसानमभ्युपगन्तव्यम् । ततश्च तदनंतरं प्रतिपाद्यमाने नामरूपव्या-करणेऽपि तस्य साक्षादेव कर्तृत्वप्रतिपादनं पर्यवस्यति । प्राचीनसंदर्भैकरूप्यात् त्रिवृत्कु-र्वत एव नामरूपव्याकरणकर्तृत्वोपदेशाच्च । एवं च व्याकरवाणीत्युत्तमपुरुषस्यापि मुख्यत्वं लभ्यते । 'जीवेनात्मनेति' तु तेजोऽबन्नाभिमानिरुद्रनारायणहिरण्यगर्भजीवरूपशरीरेणो-पलक्षित इत्येतदर्थकतयोपपादनीयम् । पूर्वोत्तरसंदर्भानुसारेण व्याकरणस्य परमेश्वरकर्तृ-कत्वावगमात्तथाभूतेन शरीरेण सहेत्येतदर्थकतया वोपपादनीयम् । देवादिनामरूपसृष्टौ हिरण्यगर्भादीनामप्यप्राधान्येन कर्तृत्वस्य पुराणादिषु प्रतिपन्नत्वात् । न तु जीवशरीरकेण मया कर्त्रेत्येतदर्थकतयोपपादनीयम् । व्याकरणकर्तरि तिङाभिहितेऽनभिहिताधिकारविहित-तृतीयानुपपत्तेः । अथ व्याकरणकर्तुरभिधानेऽपि प्रवेशकर्तुरनभिधानात् तृतीयोपपद्यते । न च सोऽपि क्त्वाप्रत्ययेनाभिहित इति शङ्कनीयम् । प्रत्ययान्तरप्रतिपन्ने क्रियाद्वयकर्तरि

वाय्वादिरूपस्य तिस्रो देवतास्तेजोऽबन्नात्मिकाः ब्रह्मविष्णुरुद्ररूपजीवात्मनानुप्रविश्य नामरूपक्लृप्तिरवगम्यते। अतस्त्रिवृत्कुर्वत एव चतुर्मुखाद्यात्मनः सकलनामरूपक्लृप्तिरिति युक्तम्। त्रिवृत्करणं तु केवलं चतुर्मुखस्य न संभवति । त्रिवृत्कृतैर्हि तेजोऽबन्नैरण्डमुत्पद्यते। तत्र पश्चाच्चतुर्मुखसृष्टिः, 'अण्डं हिरण्मयं मध्ये-समुद्रं रुद्रस्य वीर्यात्प्रथमं संबभूव, तत्र ब्रह्मा विष्णुर्जातो जातवेदाः' इति श्रुतेः॥

तदैक्यमात्रमेव हि क्त्वार्थः। यथा प्रातिपदिकद्वयप्रतिपन्ने विशेषणद्वयविशिष्टे तदैक्यमात्रं दण्डी कुण्डलीति समानविभक्त्यर्थ इति चेत् एवं तर्हि 'अहं भुक्त्वा व्रजामी'त्यादिप्रयोगविषये सर्वत्र 'मया भुक्त्वा व्रजामी'त्यादिप्रयोगः प्रसज्येत। न ह्यत्र भोजनक्रियाकर्तुस्तृतीयां विना प्रत्ययान्तरेणाभिधानमस्ति। ननु व्याकरणमर्यादया प्रसज्यमानोऽयं दोषस्तवापि तुल्यः। 'अहं भुक्त्वा व्रजामी'ति प्रयोगे हि यथाहमर्थोऽभिहितव्रजनक्रियाकर्तृशक्त्याश्रयः एवमनभिहितभोजनक्रियाकर्तृशक्त्याश्रयोऽपि। अनभिहितसूत्रेण चानभिहितकारकशक्त्याश्रये यथायथं विभक्तयो विधीयन्ते न त्वभिहिताश्रये प्रतिषिध्यन्ते। पर्युदासपक्षाश्रयणात्। अत एवानभिहितसूत्रे द्वयोः क्रिययोः कारकेऽन्यतरेणाभिहिते विभक्त्यभावप्रसंग इति वार्त्तिकेन 'प्रासाद आस्त' इत्यत्र प्रसीदत्यस्मिन्नित्यधिकरणार्थे निष्पन्नेन सदेर्घञ्प्रत्ययेन प्रासादगताधिकरणकारकशक्तेरभिधानात्सप्तमी न स्यादिति प्रतिषेधपक्षाश्रयणेनाशङ्कामुद्भाव्य 'न वान्यतरेणाभिधाना'दिति वार्त्तिकेनापि क्रियाधिकरणशक्तेरासेरुपरितनाख्यातप्रत्ययेनानभिधानान्नायं दोषः प्रसज्यते इति पर्युदासपक्षाश्रयणेन सप्तम्युपपादिता। इति चेत्। उच्यते। वैयाकरणमर्यादया नायं दोषः प्रसरति। एवं हि वैयाकरणानां मर्यादा। 'अहं भुक्त्वा व्रजामी'त्यत्राहमर्थस्य भोजनव्रजनक्रियाभ्यामुभाभ्यामपि न शाब्दोऽन्वयः किं तु व्रजनक्रिययैव। प्राधान्यात्। आर्थस्तु भोजनक्रिययान्वयः। अतः शब्दव्यापारापेक्षायामभिधानमेव। अनभिधानं न त्वार्थमपीति नाहमर्थे तृतीया प्रसज्यते। अत एव 'पक्त्वा भुज्यत ओदन' इत्यत्र पाककर्मत्वानभिधानमाश्रित्य ओदनमिति द्वितीया न प्रवर्तते। पाके कर्मान्वयस्यार्थत्वात्। 'प्रासाद आस्त' इत्यत्र तु प्रासादस्य प्रसदनासनक्रियाभ्यां शाब्द एवान्वयः। पदार्थदशायां घञन्तप्रातिपदिकेन प्रसदनाधिकरणतयान्वितस्यैव प्रासादद्रव्यस्य वाक्यार्थदशायामासनक्रियाधिकरणत्वेनाप्यन्वयः। अतस्तत्र शब्दव्यापारापेक्षयैवानभिहितासनक्रियाधिकरणकारकशक्त्याश्रयत्वमपि प्रासादस्यास्तीति तत्र सप्तम्युपपद्यते। एवमसंकीर्णा वैयाकरणमर्यादेति तदाश्रयणे 'भुक्त्वा व्रजामी'त्यत्र न मयेति प्रयोगः प्रसज्यते। इतोऽपि तदाश्रयणे तन्न प्रसज्यते। यतो 'मया भुक्त्वा व्रज्यत' इति कर्तृशक्तियुक्तप्रातिपदिकार्थाभिधित्सायां नीलमुत्पलमित्याकारकप्रयोगे च सावकाशयोस्तृतीयाप्रथमयोः 'भुक्त्वा व्रजामी'त्यादिप्रयोगेष्वहमर्थे प्राप्तयोः 'विप्रतिषेधे परं कार्य'मिति परत्वात्प्रथमैव भवति। यदि परत्वात्प्रथमा तर्हि ततोऽपि परत्वात् षष्ठी किमिति न प्राप्नोति। न तावच्छेषषष्ठी प्राप्नोति। प्रातिपदिकार्थस्य प्रथमाविधावुपयुक्तत्वेनाशेषत्वात्। कृद्योगलक्षणापि न प्राप्नोति। क्त्वाप्रत्ययस्याव्ययत्वेन 'न लोकाव्ययनिष्ठाखलर्थतृना' मिति प्रतिषेधात्। एवं वैयाकरण-

(१) 'पर्युदासपक्षेऽपि' इति ख-पाठः। (२) 'न त्वनभिधानमपी' ति -क-ग—पाठः।

ननु त्रिवृत्करणस्य केवलं चतुर्मुखकर्तृत्वं संभवति अण्डसृष्ट्युत्तरकालं चतुर्मुखसृष्टजीवेषु त्रिवृत्करणप्रकार उपदिश्यते 'यथा खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽ-

मर्यादायामप्रसज्यमानापि 'भुक्त्वा व्रजामी' त्यत्राहमर्थे तृतीया 'प्रत्ययान्तराभिहितयोः कर्त्रोरैक्यं क्त्वाप्रत्ययार्थः' इति परिभाषामाश्रित्य कर्तुः क्त्वान्तधातुवाच्योपसर्जनक्रियान्वयमपि शाब्दमभ्युपगच्छतः प्रकृतश्रुतौ 'जीवेने'ति तृतीयां तदर्थां समर्थयमानस्य प्रसज्यमाना न शक्यते निवारयितुम् । न हि क्त्वाप्रयोगे कर्तुरुपसर्जनक्रियान्वयमपि शाब्दमातिष्ठमानेन शब्दव्यापारविषयाश्रयमनभिहितसूत्रं तत्र न प्रवर्तत इति वक्तुं शक्यम् । नापि प्रथमायाः परत्वमिहोदाहर्तुं शक्यम् । 'मया भुक्त्वा व्रज्यत' इति प्रयोग इव भुक्त्वा व्रजामीति प्रयोगेऽप्यहमर्थे कर्तृशक्तियुक्ताभिधित्सासत्वात् । इयांस्तु विशेषः । प्रथमोदाहरणे प्रधानक्रियाकर्तृशक्तियुक्ताभिधित्सा द्वितीयोदाहरणे तूपसर्जनक्रियाकर्तृशक्तियुक्ताभिधित्सेति । स्यादेतत् । यत्र क्त्वाप्रयोगस्थले कस्यचित्कारकस्योपसर्जनक्रिययैवान्वयो न प्रधानक्रियया तत्रोपसर्जनक्रियान्वयः शब्दव्यापारविषय इत्यङ्गीकर्तव्यम् । तस्य प्रधानक्रियान्वयाभावेनार्थात्सिद्ध्यसंभवात् । ततश्च तत्र शब्दव्यापारविषयाश्रयमनभिहितसूत्रं प्रवर्तत इति भाव्यं तत्र कारकविभक्त्या । दृश्यते च तथैव प्रयोगः । 'इष्टकाः पक्त्वा भुंक्त' इति । तत्र खल्विष्टकानां पाकक्रियामात्रेणान्वय इति तदन्वयस्य शब्दव्यापारविषयत्वादनभिहिताधिकारविहिता कर्मणि द्वितीया दृश्यते । एवमिहापि जीवशरीरकस्य कर्तुः प्रवेशमात्रेणान्वयो विवक्षित इति तदन्वयस्य शब्दव्यापारविषयत्वात् कर्तरि तृतीयोपपद्यते । नैतदपि युक्तम् । समानकर्तृकत्ववाचिनः क्त्वाप्रत्ययस्य प्रयोगे कारकान्तराणामुपसर्जनमात्रान्वयेऽपि कर्तुस्तन्मात्रान्वयासंभवात् विशिष्टरूपेण कर्तुरुपसर्जनक्रियामात्रान्वयेऽपि विशेष्यांशेन प्रधानक्रियान्वयस्यापि सत्त्वात् समानकर्तृकत्वस्य न क्षतिरिति चेत् यद्येवं तर्हि विशेष्यसमर्पकं कर्तृवाचिपदम् । प्रधानक्रिययैवान्वयात् । अतस्तत्र प्रथमा प्राप्ता । तस्मिन्नुपसर्जनक्रियामात्रान्वयपरिचायकविशिष्टरूपकारकविशेषणपदेऽपि प्रथमैव भवेत् । 'न हि द्वारपालानभिज्ञातोऽहं सत्रशालां प्रविश्य भोक्ष्य' इति प्रयोगेऽहमर्थस्य प्रधानभोजनक्रियाकर्तृत्वेनान्वये सत्युपसर्जनप्रवेशक्रियामात्रान्वयविशिष्टरूपसमर्पकेऽपि तद्विशेषणपदे तृतीया दृश्यते । किं च जीवशरीरकत्वस्य उपसर्जनक्रियामात्रान्वयोऽप्यसिद्धः । यथा हि परमेश्वरस्य मूर्त्यात्मकशरीरकस्य तेजोऽबन्नानुप्रवेशः तथा देवादिनामरूपस्रष्टृत्वमपि तच्छरीरकस्यैव । न खलु हिरण्यगर्भादिषु देवादीन्सृजत्सु परमेश्वरः स्वतन्त्रं रूपान्तरमधिष्ठाय तान्सृजतीति सिद्धान्तः । तस्माज्जीवेनेति कर्तरि तृतीयेत्येतदनुपपन्नमित्यलमतिप्रपञ्चेन । उत्तरसूत्रमवतारयितुमाशंकते—नन्विति । 'त्रिवृत्कुर्वत उपदेशा'दिति सूत्रेण नामरूपव्याकरणं त्रिवृत्करणैककर्तृकत्वात्परमेश्वरकर्तृकमित्युक्तम् । तन्न युक्तम् । त्रिवृत्करणस्यापि केवलहिरण्यगर्भकर्तृकत्वसंभवात् । न च त्रिवृत्कृतैस्तेजोऽबन्नैरुत्पादितेऽण्डे हिरण्यगर्भसृष्टिरतस्त्रिवृत्करणे तस्य कर्तृत्वं न संभवतीति वाच्यम् ।

(१) 'समर्पक' इति ख-पाठः ।

णिष्ठस्तन्मनः' इत्यादिना इत्याशङ्क्य परिहरति–

॥ सू ॥ मांसादि भौमं यथाशब्दमितरयोश्च ॥ १८ ॥

'अन्नमशितं त्रेधा विधीयते' इत्यादौ प्राङ्निरूपितात् त्रिवृत्करणादर्थान्तरभूत एवाण्डान्तर्वर्तिपुरुषोपभुक्तान्नादीनां परिणामप्रकार उच्यते, न तु त्रिवृत्करणम्। अन्यथा हि मांसमनसोः पुरीषादणीयस्त्वेनाप्यतैजसत्वप्रसङ्गः। तथा सति 'अन्नमशितं त्रेधा' इति भूमेरेव त्रैविध्योपक्रमः 'अन्नमयं हि सोम्य मनः' इति मनसो भौमत्वं च विरुध्येत। तथेतरयोरप्तेजसोस्त्रैविध्यं विरुध्येत। तदिदमाह– 'मांसादि भौमं यथाशब्दमितरयोश्चे'ति। पुरीषवन्मांसमनसी अपि भौमे इष्येते। तथा मूत्रवल्लोहितप्राणावाप्यौ, तथास्थिवत् मज्जावाचौ तैजस्ये ॥

त्रिवृत्करणस्याऽण्डसिद्धिपूर्वभावासिद्धेः[1]। अण्डसृष्ट्युत्तरकालं तदन्तर्वर्त्तिदेवमनुष्यादिनामरूपव्याकरणे च निर्वृत्ते प्राणिभिर्भुज्यमानेषु तेजोऽबन्नेषु हि त्रिवृत्करणप्रकार उपदिश्यते। 'यथा खलु सोम्येमा' इत्यादिना अण्डान्तर्वर्तिषु चाग्न्यादित्यादिषु त्रिवृत्करणप्रकारः प्रदर्श्यते 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्ये'त्यादिना। नामरूपव्याकरणानंतरं च त्रिवृत्करणं पठ्यते। 'सेयं देवतेमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत् तासां त्रिवृतं त्रिवृतमेकैकामकरोत्' इति। अत'स्त्रिवृत्कुर्वत उपदेशा'दिति सौत्रहेतुरयुक्त इत्याशङ्कार्थः। सू ॥ **मांसादि भौमं यथाशब्दमितरयोश्च** ॥ १८ ॥ उपन्यस्तशंकानिराकरणोपयोगि साध्यं तदनंगीकारेऽनिष्टप्रसंगञ्च मनसि निधाय प्रसंगस्य विपर्ययपर्यवसानमात्रं सूत्रे निबद्धं तदवतारयितुं साध्यमनिष्टप्रसंगञ्च दर्शयति–**अन्नमिति**। **अन्यथेति**। अत्रिवृत्कृतानि पृथिव्यप्तेजांसि कार्यकारणभावापन्नानि स्थूलान्यणून्यणीयांसि। अतस्त्रिवृत्कृतेष्वपि तत्तद्भूतांशानां स्वकारणानुगुण्येन स्थूलत्वाणुत्वाणीयस्त्वानि स्युः। तस्मा'दन्नमशित'मित्यादि वाक्यं त्रिवृत्करणप्रदर्शनपरं चेत् स्थविष्ठं पुरीषं पार्थिवमणु मांसमाप्यमणीयो मनश्च तैजसमित्यापद्येत। तथा द्वितीयपर्याये मूत्रं पार्थिवं लोहितमाप्यं प्राणस्तैजस इति भवेत्। तृतीयपर्याये अस्थि पार्थिवमाप्या मज्जा तैजसी वागिति स्यादित्यर्थः। अस्तु को दोष इत्याशंक्य सूत्रलब्धमर्थमाह–**तथा सतीति**। 'अन्नमशितं त्रेधा विधीयत' इति पुरीषमांसमनसां पार्थिवत्वमुक्तम्। 'आपः पीतास्त्रेधा विधीयन्त' इति मूत्रलोहितप्राणानामाप्यत्वमुक्तम्। 'तेजोऽशितं त्रेधा विधीयत' इति अस्थिमज्जावाचां तैजसत्वमुक्तम्। पुनश्चा'न्नमयं हि सोम्य मन आपोमयः प्राण' इति मनःप्राणयोः पार्थिवाप्यत्वमुक्तम्। तत्सर्वं विरुध्येतेत्यर्थः। उपन्यस्तविपर्ययपर्यवसानं सूत्रारूढं करोति–**तदिदमाहेति**। पुरीषस्य पार्थिवत्वं शङ्कावादिनापि समर्थयितुं शक्यमित्याशंक्य सूत्रे मांसादीत्युक्तम्। आदिशब्देन मनो गृह्यते। यथाशब्दमुदाहृतश्रुत्यनुसारेणेतरयोरपि पर्याययोर्विकारा बोद्धव्या इति सूत्रशेषार्थः। लोहितवन्मूत्रप्राणाविति वाग्वदस्थिमज्जानाविति च वक्तव्ये भाष्ये मूत्रवदस्थिवदित्युक्तिराद्यत्रिकस्याप्यत्वेन द्वितीयत्रिकस्य तैजसत्वेन च साम्यमात्रे तात्पर्येण। यत्त्वण्डान्तर्वर्तिष्वग्न्यादित्यादिषु त्रिवृत्करणप्रदर्शनं तद्बोद्धव्यस्य श्वेतकेतोर्बुद्धिसंवादार्थं न तु तत्रैव त्रिवृत्करणमिदं-

---

(१) सृष्टिप्रागभावासिद्धेः' इति ख–पाठः।

ननु पूर्वमेव त्रिवृत्कृतं चेत् त्र्यात्मकं वस्तु कथमन्नमापस्तेज इत्युच्यत इत्यत आह–

॥ सू ॥ वैशेष्यात्तु तद्वादस्तद्वादः ॥ १९ ॥

अन्नादिभूयस्त्वेन वैशेष्यादन्नवाद इति । तस्मात्त्रिवृत्कुर्वतः परमेश्वरस्य चतुर्मुखाद्यात्मना सकलनामरूपसृष्टिरिति युक्तमेव ॥ इति संज्ञामूर्तिक्लृप्त्यधिकरणम् ८

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये द्वितीयस्याध्यायस्य चतुर्थः पादः॥ ॥ समाप्तश्च द्वितीयोऽध्यायः ॥

प्रथमतया प्रवृत्तमिति बोधनार्थम् । नामरूपव्याकरणत्रिवृत्करणयोः पाठक्रमश्चार्थक्रमेण बाध्यते । सर्वोऽपि संकल्पकाले साध्यलाभसंकल्पपूर्वकं तत्साधनानुष्ठानं संकल्पयतीति लोके दृष्टम् । अत्रापि प्रकरणे 'बहु स्या'मिति साध्यलाभसंकल्पपूर्वकं 'प्रजायेये' ति तत्साधनप्रवृत्तिसंकल्पवचनं दृष्टम् । अतस्तदनुसारेण 'हन्ताहमिमा' इति संकल्पवचने फलभूतं नामरूपव्याकरणं प्रथमं पठितमिति तथैवोत्तरवाक्येऽपि नामरूपव्याकरणस्य प्रथमं पाठ आसीदित्येवमन्यानुरोधेन प्रवृत्तत्वादपि पाठक्रमोऽर्थक्रमेण बाध्यते । त्रिवृत्कृतैरेव हि तेजोऽबन्नैरण्डमुत्पादनीयमत्रिवृत्कृतानां तेषां कार्यारंभासामर्थ्यात् । यथाहुः पौराणिकाः— 'नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना । नाशक्नुवन्प्रजाः स्रष्टुमसमागम्य कृत्स्नशः । समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः । महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते ॥' इति । एवञ्च यद्यप्यण्डसृष्ट्युत्तरभाविनो हिरण्यगर्भस्य त्रिवृत्करणकर्तृत्वायोगेऽपि तत्पूर्वभाविनो नारायणस्य रुद्रस्य वा तत्कर्तृत्वमाशङ्कितुं शक्यम् । तथापि 'हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्ये' त्यत्र जीवशब्दस्य तेजोऽबन्नाभिमानिरुद्रनारायणहिरण्यगर्भपरत्वात् तन्मध्ये हिरण्यगर्भस्य त्रिवृत्करणकर्तृत्वासंभवेन नामरूपव्याकरणकर्तृत्वासंभवे स्थिते त्रयसाधारणं जीवशब्दमवलंब्य रुद्रस्य नारायणस्य वा त्रिवृत्करणकर्तृत्वाशङ्कामूलं नामरूपव्याकरणकर्तृत्वचोद्यं न प्रवर्तत इति व्यर्था तयोस्त्रिवृत्करणकर्तृकत्वशङ्का निरालंबना चेति तात्पर्यम् । 'अन्नमशित' मित्यादिना प्रागेव त्रिवृत्कृतानां तेजोऽबन्नानां प्राणिभिर्भुक्तानां परिणामप्रकारमात्रमुच्यते न तु त्रिवृत्करणमिति यदुक्तं तन्न युक्तम्।प्रागेव त्रिवृत्कृतत्वे त्र्यात्मकेषु वस्तुष्वेकैकवाचिशब्दप्रयोगायोगात् इत्याशंकोत्तरत्वेनोत्तरसूत्रमवतारयति–नन्विति। सू ॥ वैशेष्यात्तु तद्वादस्तद्वादः ॥ १९ ॥ अन्नादिति । अर्धमन्नमर्धमितरद्भूतद्वयमित्येवमादिरूपेण भूयस्त्वेन प्रकारेण यद्वैशेष्यं विशेषस्ततो हेतोरित्यर्थः ॥

इति संज्ञामूर्तिक्लृप्त्यधिकरणम् ॥ ८ ॥

इति श्रीशिवातिवादिमूर्धन्यशिवदर्शनस्थापनधुरंधरसकलदेवभूदेवप्रतिष्ठापक-
श्रीमच्चिन्नबोम्मभूपालहृदयकमलकुहरविहरमाणश्रीसांबशिवप्रेरितस्य
श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीविश्वजिद्याजिश्रीरंगराजाध्व-
**रिवरसूनोरप्पयदीक्षितस्य कृतौ श्रीकण्ठाचार्यवि-
रचितब्रह्ममीमांसाभाष्यव्याख्यायां शिवा-
र्कमणिदीपिकाख्यायां द्वितीयस्याध्या-
यस्य चतुर्थः पादः ॥ ४ ॥**

नयमणिमालायाम् अथ संज्ञामूर्तिक्लृप्त्यधिकरणम् ॥ ८ ॥

सू ॥ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ १७ ॥ मांसादि भौमं यथाशब्दमितरयोश्च ॥१८॥ वैशेष्यात्तु तद्वादस्तद्वादः ॥ १९ ॥

द्रुहिणो देवादीनां व्याकरणे नामरूपयोः कर्ता । भूम्यभिमानयतोऽस्य हि सृष्टेस्तदनंतरं भवति ॥ १६६ ॥
व्याकरणकर्तुरेव त्रिवृत्कृतावप्यभाणि कर्तृत्वम् । तच्च त्रिवृत्कृतभ्वाद्यण्डाज्जातस्य नो घटते ॥ १६७ ॥

इति संज्ञामूर्तिक्लृप्त्यधिकरणम् ॥ ८ ॥

इति श्रीमदप्पयदीक्षितकृतौ चतुर्मतसारसंग्रहे नयमणिमालाख्ये तृतीयपरिच्छेदे द्वितीयस्याध्यायस्य तुरीयः पादः ॥ २ ॥ ४ ॥ अध्यायश्च समाप्तः ॥ २ ॥

सूत्रार्थचन्द्रिकायाम् अथ संज्ञामूर्तिक्लृप्त्यधिकरणम् ॥ ८ ॥

सू ॥ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ १७ ॥ मांसादि भौमं यथाशब्दमितरयोश्च ॥१८॥ वैशेष्यात्तु तद्वादस्तद्वादः ॥ १९ ॥

भगवत्पादमते, पूर्वं नामरूपभेदेन प्राणेन्द्रिययोर्भेद इत्युक्तम् । तत्प्रसङ्गेन नामरूपव्याकरणं किंकर्तृकमिति विचार्यते—**संज्ञामूर्तीत्यादिना ।** अत्र 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि'इति जीवकर्तृकत्वश्रुतेः 'आकाशो ह वै नामरूपयोर्निर्वहिता'इति परमेश्वरकर्तृकत्वश्रुतेश्च मिथो विरोधोऽस्ति न वेति **संदेहः ।** अस्तीति **पूर्वपक्षः । सिद्धान्तस्तु,** तुशब्दः पूर्वपक्षनिरासकः । अल्पमेधसो जीवस्य महीमहीधरमहोदधिव्याकरणे सामर्थ्याभावात् 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि'इति त्रिवृत्कुर्वतः परमेश्वरस्यैव नामरूपव्याक्रिया भवितुमर्हति । 'सेयं देवते'त्युपक्रम्य 'व्याकरवाणि' इति व्याकरणस्य परदेवताकर्तृकत्वोपदेशात् 'अनेन जीवेने' त्यस्य संनिहितानुप्रविश्येत्यनेन संबन्धाच्च नानयोर्विरोध इति ॥ सूत्रार्थोऽपि व्याख्यातः ॥

इत्थं बाह्यं त्रिवृत्करणमभिधायाध्यात्मिकमाह—**सू ॥ मांसादि भौमं यथाशब्दमितरयोश्च ॥ २१ ॥** भूमेरन्नात्मिकायाः कार्यं भौमं मांसादि । आदिशब्देन पुरीषमनसी गृह्येते । **इतरयोः**=अप्तेजसोः । यथाशब्दं कार्यमवगन्तव्यम् । मूत्रं लोहितं प्राणश्चापां कार्यम्, अस्थि मज्जा वाक् तेजस इति । तदाह श्रुतिः—'अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः' इत्यादिना ॥

ननु सर्वेषां त्रिवृत्करणाविशेषात् कथं पृथिव्यादिव्यवहारः संगच्छते इति तत्राह—**सू ॥ वैशेष्यात्तु तद्वादस्तद्वादः ॥ २२ ॥** तुशब्दश्शंकानिरासार्थः । सर्वेषां पृथिव्यादीनां त्रिवृत्करणाविशेषेऽपि **वैशेष्यात्**=स्वभागाधिक्यात् । **तद्वादः**=पृथिव्यादिव्यवहारः संगच्छते । तद्वाद इति पदाभ्यासोऽध्यायपरिसमाप्त्यर्थः । तदेवं सर्वासां श्रुतीनामविरोधे प्रामाण्यान्निरवद्याद्द्वितीये ब्रह्मणि समन्वयस्सिद्ध इति ॥ अस्मिन्**पादे द्वाविंशति**स्सूत्राणि अधिकरणानि **नव ॥**

श्रीकण्ठमते, तथा **रामानुजमते च** अत्राधिकरणे संदेहपूर्वपक्षादिषु नास्ति विशेषः पूर्वस्मात् । अत्रापि नामरूपव्याकरणं किं परमेश्वरकर्तृकमुत चतुर्मुखादिजीवकर्तृकमिति संदिह्य त्रिवृत्कुर्वतः परमेश्वरस्यैव चतुर्मुखाद्यात्मना सकलनामरूपसृष्टिरिति तत्तन्मतप्रक्रियानुगुण्येन सिद्धान्तितमिति न पृथक्प्रपञ्चितम् ॥ अत्र **पादे** अनयोर्मतयो**रेकोनविंशति**स्सूत्राणि अधिकरणानि **अष्टौ ॥**

आनन्दतीर्थमते, अत्र आद्यं सूत्रं संज्ञाधिकरणमितरत्सूत्रद्वयं मांसाधिकरणमिति च व्यपदिश्यते । अत्र 'विरिञ्चो वा इदं सर्वं विरेचयति ब्रह्मा वाव विरिञ्च एतस्माद्धीमे रूपनामनी'इति गौपवनश्रुत्या विरिञ्चनामनिर्वचनयुक्त्योपष्टम्भयया द्रुहिणस्य नामरूपकर्तृत्वं प्रतिपादयन्त्या विरोधात् 'परमाद्ध्येते नामरूपे व्याक्रियेते'इति विष्णोर्नामरूपकर्तृत्वं प्रतिपादयन्त्यामिवेश्यश्रुतिरप्रमाणमिति **पूर्वपक्षः ।** 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते'इति श्रुत्या त्रिवृत्क्रियाकर्तुरेव तत्सापेक्षशरीरकर्तृत्वं तदनन्तरं तत्तन्नामकर्तृत्वं च विरिञ्चादिवाक्यानां तदवान्तराधिकारविषयत्वादिति **सिद्धान्तः ।** सूत्रमपि व्याख्यातम् ॥ **इति संज्ञाधिकरणम् ॥ १२ ॥**

अथ मांसाधिकरणम् ॥ १३ ॥

अत्राधिकरणे शरीरकारणश्रुतिविरोधः परिहियते । 'आपो वाव मांसमस्थि च भवन्त्यापश्शरीरम्'इति श्रुत्या 'अम्मयं च यतो मांसं मनस्तृप्तिश्च मांसत'इति स्मृत्युक्ततृप्तिजनकत्वयुक्तिसहितया शरीरस्य केवलाप्यत्वस्य 'पृथिवी शरीर'मिति पृथिव्यां लयश्रुत्या काठिन्यादिना च केवलपार्थिवत्वस्य 'सोऽग्नेर्देवताया आहुतीभ्यस्संभूय हिरण्यशरीर ऊर्ध्वं स्वर्गलोकमेती'ति श्रुत्यौष्ण्यदर्शनेन च केवलतैजसत्वस्य वाङ्गीकर्तव्यत्वेन तस्य त्रिवृत्कृतभूतत्रयप्रकृतिकत्वं वदन्त्या 'इमास्तिस्रो देवताः

पुरुषं प्राप्ये'त्यादिश्रुतेरप्रमाणत्वाद्भूतत्रयप्रकृतिकत्वे विशेषोक्तेरयोगाच्च शरीरस्य त्रिवृत्कृतभूतत्रयप्रकृतित्वं न संभवतीति **पूर्वपक्षः । सिद्धान्तस्तु,** मांसादिकं पार्थिवमप्तेजसोरपि कार्यमङ्गीकर्तव्यम् । श्रुत्यनुसारात् । पार्थिवत्वादिविशेषव्यवहारस्तु तत्तद्भूतप्रचुरसंयोगविशेषेण तत्तच्छरीरविषयः ॥ इति । **सूत्रार्थस्तु,** भौममित्युपलक्षणम् । यच्छरीरे कठिनं मांसादि तदेव भौमं पार्थिवम् । न सर्वशरीरम् । किं तर्हि **यथाशब्दम्**='यत्कठिनं सा पृथिवी'ति श्रुतिमनुसृत्य शरीरे **इतरयोश्च**=अप्तेजसोश्च कार्यं शोणितमज्जादिरूपमङ्गीकार्यम् । यथा मांसादिकं भौमं पृथिवीकार्यम् । न केवलं पृथिवीकार्यं किं तर्हि इतरयोरप्तेजसोश्च कार्यं यथाश्रुत्यङ्गीकार्यमित्यर्थः ॥

सू ॥ वैशेष्यात्तु तद्वादस्तद्वादः ॥ २३ ॥ पार्थिवमाप्यं तैजसमिति विशेषोक्तिस्तु **वैशेष्यात्**=पृथिव्यादिभूतानां तत्तच्छरीरविशेपसंयोगमपेक्ष्य युज्यते । अतो न तद्विरोध इत्यर्थः ॥ एतदध्यायोक्तार्थस्यावधारणार्थाध्यायान्ते द्विरुक्तिः ॥ अस्मिन्पादे अत्र **मते त्रयोविंशतिस्सूत्राणि** अधिकरणानि **त्रयोदश । इत्यानन्दतीर्थमते मांसाधिकरणम् ॥१३॥**

यं प्रसूत विशुद्धशीलमनघं वृद्धांबिकाख्या सती
यं मृत्युञ्जयशर्मणो बुधमणेर्भाग्यं विदुस्साधवः ।
वाधूलान्वयजन्मनोऽस्य सुधियो हालास्यनाथाह्वय-
स्येयं सत्कृतिरेधतामिह चतुर्भाष्यानुगा चन्द्रिका ॥

सूत्रार्थचन्द्रिकायामविरोधाख्ये द्वितीयकेऽध्याये । भौतिकसृष्टिश्रुतिगतमविरोधं स्थापयंस्तथा प्रथितः ॥
आद्ये मतत्रयेऽपि प्रापत्संपूर्तिमेष खलु **तुर्यः** । पादस्स**युक्तिकश्रुत्यविरोधाख्यश्च मध्व**मतरीत्या ॥

इति सूत्रार्थचन्द्रिकायां संज्ञामूर्तिक्लृप्त्यधिकरणम् ॥ ८ ॥

श्रीमद्वाधूलवंशमुक्ताफलपण्डितप्रकाण्ड**गंगाधरसुधीमणेः** पौत्रेण संततसमाचरितगायत्रीसमुपास्तिसंधुक्षितब्रह्मवर्चससंसिद्धनिग्रहानुग्रहशक्तिकान्तमुख**मृत्युञ्जयसंयमीन्द्र**गार्हस्थ्यतपःस्तोमपरिपाकायितमूर्तिना **वृद्धांबिकागर्भ**शुक्तिमुक्ताफलेन अग्निष्टोमसमाराधिताष्टमूर्तिक**श्रीमद्गङ्गाधरमखिवर्य**चरमसोदरेण **गर्गान्वय**महांभोधिकौस्तुभायितभगिनीपति **पिच्चुशास्त्रि**शब्दिते**श्वरशर्म**तपोधनशिष्टाग्रगण्यब्रह्मनिष्ठाधुरंधरान्तमुखनिरुपधिकरुणाशालि**देशिकेन्द्र**परमानुग्रहसंपत्संधुक्षितकाव्यालंकारसाहितीपरिचयेन तदसाधारणपरमानुग्रहपात्रेण **पञ्चनदस्थला**भिजनसाग्निचित्यसर्वतोमुखमहाव्रतविश्वजिद्याजि(ब्रह्मीभूत)**श्रीबालकृष्णमखिराज**करुणापाङ्गसमासादितब्रह्मविद्यापरिचयेन **श्रीहालास्यनाथसूरिणा** विरचितायां **ब्रह्ममीमांसासूत्रार्थचन्द्रिकायां** चतुर्मतभाष्यार्थबोधिन्यां **द्वितीयस्याध्यायस्य तुरीयः पादः ॥**

॥ द्वितीयाध्यायश्च समाप्तः ॥



॥ शिवाभ्यां नमः ॥

श्रीचिक्कबोम्मनरपालहृदब्जवासि**सांबत्रिलोचन**निदेशवशंवदस्य ।
अप्पय्यदीक्षितमणेर्वदनारविन्दमाध्व्या **शिवार्कमणिदीपिकया** समेते ॥
श्रीकण्ठयोगिरचिते तरुणेन्दुचूडनिर्दोषभव्यगुणसंहतिबोधदक्षे ।
भाष्ये पराशरतपःफलतापसेन्द्र**श्रीबादरायण**गभीरगिरां चिरत्ने ॥
युक्तेऽधिकृत्यवसितौ **नयरत्नमाला**भिख्याप्प**याध्वरिकृति**प्रवरान्तरेण ।
हालास्यनाथसुधिया कृतया च **सूत्रवृत्त्या** समं कृतधियामभिनन्दयित्र्या ॥
प्राचीनसन्मतचतुष्टयतारतम्यजिज्ञासुमोदनकृतेऽनतिदैर्घ्यभाजा ।
जीर्णप्रबन्धपुनरुद्धृतिरूपधर्मसाह्यैकतानमनसां सुहृदां निदेशम् ॥
आलंब्य भूरियतनार्जितलुप्यमानद्वित्रातिदुर्लभखिलीकृतमातृकातः ।
मैसूरुवासिपरकालमठाधिपेन्द्रदत्तातिरम्यसुपरिष्कृतमातृकायाः ।
साहाय्यतश्च शिथिलाः परिपूर्य पङ्क्तीरुज्जीविते विधृतभूरिपरिश्रमेण ।
तेनैव मुद्रणपरिष्कृतिमाप्यमाने ह्यध्याय एष परिपूर्तिमगा**द्द्वितीयः** ॥

॥ शुभं भूयादध्येतुरध्यापकस्य च ॥

॥ श्रीः ॥

शिवाभ्यां नमः ।

श्रीकण्ठाचार्यकृतौ

ब्रह्ममीमांसाभाष्ये

अथ तृतीयस्याध्यायस्य प्रथमः पादः ॥

अथ तदन्तरप्रतिपत्त्यधिकरणम् ॥ १ ॥

॥ सू ॥ तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ १ ॥

अतीतेऽध्याये प्रथमाध्यायसिद्धस्य ब्रह्मकारणवादसमन्वयस्य विरोधः परिहृतः । तथा हि–प्रथमे पादे सांख्यादितर्कविरोधः परिहृतः । द्वितीये प्रधानकारणवादादिषु तर्कविरोधः प्रदर्शितः । तृतीये भूतसृष्ट्यवान्तरविरोधपरिहारपूर्वकं जीवश्च नित्यत्वादिधर्मैर्निरूपितः । चतुर्थे प्राणेन्द्रियाणां स्वरूपं ब्रह्मणः सकाशात् तेषामुत्पत्तिमप्यभिधाय सर्वेषां नामरूपव्याकरणं च निरूपितम् । अत्र तृतीये प्रथमपादे नित्यत्वादियुक्तस्य जीवस्य गत्यागतिनिरूपणं क्रियते । द्वितीये तदवस्थानिरूपणपूर्वकमीश्वरस्य स्वरूपलक्षणमुच्यते ।

अथ शिवार्कमणिदीपिकायां

तृतीयस्याध्यायस्य प्रथमःपादः

अथ तदंतरप्रतिपत्त्यधिकरणम् ॥ १ ॥

॥ सू ॥ तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ १ ॥

प्रतिपत्तिसौकर्यायं वृत्तवर्तिष्यमाणाध्यायपादार्थाननुकीर्तयन् [1]संगतिं दर्शयति–अतीतेऽध्याय इति । प्रथमेनाध्यायद्वयेन वेदान्तवेद्यं सिद्धरूपं परं ब्रह्म संभावितसकलविरोधपरिहारेण निरूपितम् । इतः परमध्यायद्वयेन तत्प्राप्तिसाधनतत्प्राप्तिप्रकारात्मकं साध्यरूपं वस्तु निरूप्यते । ब्रह्मप्राप्तिसाधननिरूपणस्य ब्रह्मप्राप्तिनिरूपणस्य च ब्रह्मस्वरूपावधारणाधीनत्वादस्याध्यायद्वयस्य पूर्वाध्यायद्वयानंतर्यमिति [2]पूर्वोत्तराध्यायद्विकयोर्हेतुहेतुमद्भावसंगतिः । तत्र साधनाधीनत्वात्साध्यलाभस्य साधननिरूपणार्थस्य तृतीयाध्यायस्य फलाध्यायात्पूर्वभाव इत्यनयोरध्याययोरवान्तरसंगतिः । ब्रह्मप्राप्तिसाधनं संसारवैराग्यं ब्रह्मप्रेप्सा तदुपासना[3]तदंगाश्रमादिधर्मकलापश्चेति चतुर्विधम् । तत्राधिकारिणो वैराग्यदृढीकरणाय क्षयिष्णुत्वसातिशयित्वादिना संसारस्य दुःखरूपतां ख्यापयितुमिह परत्र [4]तृतीये स्थाने च परिभ्रमणेन तस्य दोषवत्त्वं प्रथमपादे निरूप्यते । तस्य परब्रह्मप्रेप्सादृढीकरणाय परब्रह्मणश्शिवस्य महिमा द्वितीयपादे निरूप्यते । तत्रोभयलिंगाधिकरणमारभ्य निर्दोषकल्याणगुणाकरत्वसमाभ्यधिकरहितत्वसकलकर्मफलप्रदत्वरूपस्तस्य महिमा निरूप्यते इति स्पष्टमेव । स्वप्नाधिकरणेऽपि तस्यैव महिमा निरूप्यते ।

---

(१) संगतिमाविष्करोति' इति ख. पाठः । (२) 'पूर्वोत्तरद्विकयोस्संगतिः' इति ख. पाठः । (३) तदुपासनानुष्ठानमुपासनांगाश्रमादि' इति ख. पाठः । (४) 'तृतीयस्थाने च परिभ्रमणरूपत्वं तस्य' इति ख. पाठः ।

तृतीये तदुपासनाविशेषाणां गुणोपसंहारः। चतुर्थे त्वाश्रमादिधर्म इति विवेकः॥

अत्र प्रथमाधिकरणे जीवः परलोकगतागतेषु देहान्तरप्राप्तये भूतसूक्ष्मैर्वेष्टितो याति उतावेष्टित इति संशयः॥

जीवो देहान्निर्गच्छन् भूतसूक्ष्मैर्भाविशरीरबीजैरपरिष्वक्त एव यातीत्युच्यते, भूतानां सर्वत्र सुलभत्वेनापार्थकत्वादायासस्य॥

इति प्राप्ते ब्रूमः–जीवो देहान्तरप्राप्तये भूतसूक्ष्मैः परिष्वक्तो यातीति पञ्चा-

---

न हि तत्र जीवस्य स्वप्नावस्था कीदृशीति चिंत्यते किं तु तस्याः परमेश्वरकर्तृकत्वं व्यवस्थाप्यते। तद्व्यवस्थापनं चानंतप्राणिगतपरस्परविरुद्धात्याश्चर्यतत्तत्पुरुषमात्रानुभाव्यतत्कालमात्रावसायिस्वाप्नपदार्थजातस्रष्टृत्वादिरूपतन्महिमनिरूपणं पर्यवस्यति। यद्यप्येतेनाधिकरणेन स्वप्नावस्थायाः प्रजापतिविद्योक्तरीत्या भयादिदर्शनकलुषितत्वेन हेयत्वसंसूचनात् पूर्वपादेनैव वैराग्यदृढीकरणमपि लभ्यते। तथापि तदानुषंगिकं प्रयोजनं न त्वनुगतपादार्थरूपम्। तथा सुषुप्तिचिंतापि परमेश्वरस्य सुषुप्तिस्थानत्वेन पापास्पर्शप्रयोजकत्वरूपमहिमनिरूपणात्मिकैव। तत्रत्यातःप्रबोधसूत्राक्षेपसंगत्या प्रवृत्तं स एव तु कर्मानुस्मृत्यधिकरणं तच्छेषभूतमानुषंगिकप्रयोजनार्थसुषुप्त्यवस्थाहेयत्वसंसूचनपर्यवसायि। मूर्छाधिकरणमेकं जीवावस्थानिरूपणप्रसंगागतम्। तदप्यानुषंगिकप्रयोजनार्थे मूर्छावस्थायाः यदर्धसम्पत्तिर्मूर्छा तस्या मरणावस्थायाश्च हेयत्वसंसूचने पर्यवसायि। तृतीयपादे संजातशिवप्राप्ति[1]कुतूहलस्योपासकस्य गुणोपसंहारानुपसंहारादिर्निरूपितः। चतुर्थपादे तदंगकर्मकलापो निरूपित इति विवेकः। अत्र प्रथमाधिकरणे इति॥ वेत्थ यथेत्यादि। पञ्चाग्निविद्यागतप्रश्नप्रतिवचनयोर्भूतवेष्टनगमकत्वसंभवासंभवाभ्यामयं संशयः। 'अपरिष्वक्त एवे' त्यवधारणेन प्रश्नप्रतिवचनयोर्भूतवेष्टनगमकत्वसंभावना व्यवच्छिद्यते। तथाहि–श्वेतकेतुमारुणेयं पाञ्चालराजः प्रवाहणो 'वेत्थयथे' त्यादि पप्रच्छ। तस्मिन्निमं प्रश्नं प्रतिवक्तुमजानति तस्य पितरि चाजानति तत्पित्रा समागत्य पृष्टः प्रवाहणः स्वयमेव प्रश्नविषयं निरूपयन् कास्ताः पञ्चाहुतयो यासामुत्तमायामाहुतावापः पुरुषशब्दाभिलपनीयतां भजंत इत्याकांक्षायाम् 'असौ वाव लोको गौतमाग्नि' रित्यादिना द्युपर्जन्यपृथिवीपुरुषयोषितः पञ्चाग्नित्वेन रूपयित्वा तेषु श्रद्धासोमवृष्ट्यन्नरेतोद्रव्यकाः पंचाहुतीरुपदिश्य तदनंतर 'मिति तु पंचम्यामाहुता' वित्यादिस्वपृष्टार्थनिरूपणोपसंहारः कृतः। नात्र प्रश्ने प्रतिवचने वा भूतानां श्रवणमस्ति। दूरे तत्संपरिष्वक्तस्य जीवस्य। भूतेष्वपां श्रवणमात्रमस्ति। न तु तासां द्युलोकपर्यंतं गमनस्य ततो योषित्पर्यन्तं प्रत्यागमनस्य वा श्रवणमस्ति। यदि त्वापः पञ्चस्वप्यग्निषु होमद्रव्यतया श्रूयेरन् तदा केवलानामपां वा परत्रेह च गतप्रत्यागते प्रश्नप्रतिवचनाभ्यां विवक्षिते इति कल्पनीये। न तु तास्तथा श्रूयंते। श्रद्धादीनि भिन्नभिन्नान्येव ह्याहुतिद्रव्याणि श्रूयन्ते। तस्मान्न[2] भूतसूक्ष्मवेष्टितस्य जीवस्य गमनसिद्धिः। ननु तथापि देहान्तरोत्पत्त्यर्थं तदारंभकभूतसूक्ष्मयुक्तस्य जीवस्य गत्यागती वक्तव्ये इत्याशंक्याह–भूतानामिति। भोग्यभोगोपकरणभोगस्थानवत् भोगायतनानामपि तत्रत्यैरेव भूतैरदृष्टाकृष्टैरारंभस्संभवतीति तदर्थमितो भूतसूक्ष्मनयनापेक्षा नास्तीत्यर्थः। देहान्तरप्राप्तय इति। तच्छब्दस्संज्ञामूर्तिसूत्रगतमूर्तिशब्दोक्तदेहपरामर्शी।

(१) कुतूहलोस्योपासनानुष्ठानाय तद्भेदाभेदगुणोपसंहारा' इति ख. पाठः। (२) 'तस्मान्न प्रश्नप्रतिवचनपर्यालोचनया

ग्निविद्यायां प्रश्नप्रतिवचनाभ्यामवगम्यते । कथम् ? 'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति प्रश्नः 'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति प्रतिवचनम् । तत्र चायमर्थः संपिण्डितः–ब्राह्मणादिदेहस्थो जीवः स्वाहादानादि कर्म कृत्वा तत्फलभोगायास्माद्देहादुत्थाय गच्छन्नेतद्देहस्थाभिरद्भिर्भूतान्तरसंसृष्टाभिः सूक्ष्माभिः परिष्वक्तः अग्नित्वेन निरूपितं द्युलोकं प्राप्य ताभिरेवामृतमयदेहाकारेण परिणताभिरद्भिः परिष्वक्तो देवानां शेषभावमुपगम्य तैः सह तत्र भोगविशेषाननुभूय भुक्तावशिष्टेन ब्राह्मणादिदेहप्रापकेन कर्मणा सह पुनरिमं लोकमागत्य कर्म कर्तुं ताभिरेव परिष्वक्तोऽग्नित्वेन निरूपितं पर्जन्यं प्राप्य वर्षधाराभिः सह अग्नित्वेन निरूपितां पृथिवीमुपगम्य व्रीह्यादिसस्येन अन्नाकारपरिणतेन सह अग्नित्वेन निरूपितं पुरुषं प्राप्य तत्र शुक्लाकारपरिणताभिस्ताभिरद्भिः परिष्वक्तोऽग्नित्वेन निरूपितां योषितं प्राप्य तत्र देहाकारपरिणताभिः पुरुषशब्दाभिलापनीयाभिरद्भिः परिष्वक्तः कर्मानुरूपब्राह्मणादिदेहेन जायत इति । तदेतत्सर्वमुत्तरत्राभिव्यज्यते । तस्मात् पुरुषो भूतसूक्ष्मैर्वेष्टित एव देहान्तरं प्राप्नोतीति ॥

॥ सू ॥ त्र्यात्मकत्वात्तु भूयस्त्वात् ॥ २ ॥

सर्वस्य त्रिवृत्करणेन त्र्यात्मकत्वाद्भूतान्तरसंसृष्टा एवापो भूयस्त्वादप्छब्देनोच्यन्ते । अतः 'पञ्चम्यामाहुतावापः' इति केवलाप्छब्दग्रहणेऽपि न विरोधः ॥

॥ सू ॥ प्राणगतेश्च ॥ ३ ॥

'प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इति जीवेन सहेन्द्रियगतेस्तदा-

---

प्रतिपत्तिशब्दः प्राप्तिवाची । सप्तम्युद्देश्यरूपविषयार्थेति भावः । प्रश्नप्रतिवचनयोः भूतवेष्टितो जीवो यातीत्येतदर्थपर्यवसायित्वं सूत्रकार एवोत्तरसूत्रैः प्रपंचयिष्यति[1] । अत्र श्रोतॄणामाकाङ्क्षाशान्तये तमर्थं सर्वं निष्कृष्य दर्शयति–तत्र चायमर्थ इति । प्रश्नप्रतिवचनयोराप एव केवलाः श्रूयन्ते न भूतान्तरश्रवणमस्तीति शंकानिराकरणार्थं तावदिदं सूत्रम्–सू ॥ त्र्यात्मकत्वात्तु भूयस्त्वात् ॥ २ ॥ सर्वस्येति ॥ प्रश्नप्रतिवचनयोरपां पुरुषशब्दाभिलपनीयत्वं श्रूयमाणं पुरुषाधिष्ठानदेहारंभकत्वेनैवोपपादनीयम् । तदारंभश्च[2] न केवलाभिरद्भिरुपपद्यते । अशितपीतादिपरिपाकस्नेहगंधादिकार्यदर्शनेन देहस्य त्र्यात्मकत्वात् देहाद्यारंभार्थं सर्वस्यापि तेजोऽबन्नस्य सर्गाद्यकाल एव त्रिवृत्कृतत्वेन त्र्यात्मकत्वाच्च । अतस्त्रयाणां देहारंभकत्वेऽपि देहस्य रसलोहितादिभूयस्तया कार्यानुसारेण भूतेष्वपां भूयस्त्वात् अप्शब्देनाभिधानं न तु भूतान्तराभावादिति भावः । न केवलं प्रश्नप्रतिवचनयोः श्रूयमाणानामपां देहारंभकत्वात्त्र्यात्मकतया तयोरप्शब्दस्य त्र्यात्मकभूतसूक्ष्मपरता किं तु तासां सूक्ष्मदेहरूपत्वादपीति पूर्वसूत्रसाध्ये हेत्वन्तरकथनार्थं सूत्रम्–सू ॥ प्राणगतेश्च ॥ ३ ॥ अस्ति तावदिदमिह परत्र च जीवस्य गतागतयोरिंद्रियाणामपि तेन सह गतागते । न चेंद्रियाणां शरीराश्रयणं विना गतागते संभवतः । नापि तेषामवस्था-

---

भूतवेष्टितस्य' इति ख. पाठः । (१) प्रतिपादयिष्यति' इति ख. पाठः ॥ (२) देहारंभश्च इति ख. पाठः ।

श्रयत्वेन देहगमनमपि प्रतीयते। अतोऽपि भूतसूक्ष्मदेहवेष्टित एव यातीति ॥

आशङ्क्य परिहरति—

॥ सू ॥ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ४ ॥

'यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यम्' इत्यादाविन्द्रियाणामग्न्याद्यभिगमः श्रूयते। ततो जीवेनेन्द्रियाणां न सहगमनमिति चेत्–न, वागाद्यभिमानिदेवतासु वागादिशब्दानां भाक्तत्वात्, ओषधीर्लोमानि वनस्पतीन् केशाः' इत्यनपियद्भिर्लोमादिभिः सह पाठात् ॥

॥ सू ॥ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥५॥

प्रथमे द्युलोकाग्नावपामश्रवणात् नापो गच्छन्ति 'एतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति' इति श्रद्धैव श्रूयते इति चेत्–न। आप एव श्रद्धाशब्देनोच्यन्ते। कथम्?

नमात्रं संभवति। जीवद्दशायामेव दर्शनात्। न च तेषां स्वस्वकार्येषु प्रवृत्त्यर्थमेव देहाश्रयणं केवलमवस्थानं गतागतं च स्वस्वोपादानाश्रयाणामेव तेषां संभवतीति वाच्यम्। मार्गे चंद्रसंवादादिश्रवणेन तेषां गतागतयोः स्वस्वकार्येषु प्रवृत्तेरपि सत्त्वात्। अतो मार्गे स्थूलदेहाभावादिंद्रियाश्रयत्वोपपत्त्यर्थमेतासामपामेव त्र्यात्मकतया सूक्ष्मदेहत्वमाश्रयणीयमिति भावः॥ नन्वेवमिंद्रियाणां जीवानुगत्यभ्युपगमे तेषामग्न्याद्यप्ययश्रवणस्य कथं निर्वाह इत्याकांक्षायां तन्निर्वाहप्रदर्शनार्थं सूत्रम्–सू ॥ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ४ ॥ भाक्तत्वादिति। ननु वागिंद्रियाद्यभिमानिष्वग्न्यादिषु तत्तच्छरीरकेषु वागादिशब्दानां मुख्यत्वं संभवति कथं भाक्तत्वं वर्ण्यते? वागादिशब्दानामग्न्यादिपरत्वे च कथं वाक्यार्थनिष्पत्तिः। न ह्यग्न्यादयोऽग्न्यादीनपियन्तीत्युपपद्यते। उत्क्रान्तौ वागादीन्विहाय तदभिमानिदेवतानामन्यत्र गमने च देवतानधिष्ठितानां तेषां कथं मार्गे चन्द्रसंवादादिकार्यनिष्पादकत्वम्?। उच्यते। वागादिशब्दा वागाद्यभिमानिदेवतासु मुख्या एव। यत्तासामग्न्यादिदेवतास्वप्ययवर्णनं तद्भाक्तम्। उत्क्रांतिसमये निर्व्यापारेषु वागादिषु तदभिमानिदेवतानां तद्व्यापारयितृत्वं विहाय केवलमग्न्यादिरूपेणावस्थानं तासामग्न्याद्यप्ययत्वेनोपचरितमिति भाष्याभिप्रायः। स्यादेतत्। प्रश्नप्रतिवचनयोः योषिदग्न्याहुतावपां देहाकारपरिणतिमात्रं श्रूयते। तेन तासां त्र्यात्मकत्वं सिध्यतु नाम। तावता तासामिह परत्र च जीवपरिष्वंजकत्वेन गतागते न सिध्यतः। न च तासां होमपञ्चकेऽप्यनुवृत्तिश्रवणमस्ति। न चाहुतिद्रव्यत्वादनुवृत्तिकल्पनम्। तदश्रवणात्तत्तदाहुतिषु द्रव्यान्तरश्रवणाच्च। सोमादीनामाहुतिद्रव्याणामब्विकारतया प्रश्नप्रतिवचनश्रुतावब्रूपत्वकल्पना संभवतीति चेन्न। प्रथमपर्याये मनोवृत्तिविशेषरूपश्रद्धाद्रव्यके अब्विकारद्रव्याश्रुत्या प्रणव एव वैस्वर्येण तथाकल्पनस्याप्रवृत्तेः। न च तथापि चन्द्रसंवादोपपत्तये सूक्ष्मदेहरूपतयैतासामपां जीवानुगतिः कल्पनीयेति वाच्यम्। पञ्चमाहुतौ श्रुतानामपां तावन्मात्रसम्बन्धेऽपि चन्द्रसंवादोपपत्तये चंद्रलोक एव धूमादिमार्गगतानामिवार्चिरादिमार्गगतानामप्यमृतमयदेहोत्पत्तिकल्पनोपपत्तेः स्थूलदेहकल्पनया चंद्रसंवादार्थापत्तेरक्लिष्टोपपादनसंभवे अन्यत्रान्यार्थश्रुतानामपां सूक्ष्मदेहत्वकल्पनेन क्लिष्टोपपादनायोगादित्याशङ्कानिराकरणार्थं सूत्रम्–सू ॥ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ ५ ॥

अप्सु पृष्टासु तदुत्तरोपपत्तेः । श्रद्धाशब्दश्चाप्सु युज्यते, 'श्रद्धा वा आपः' इति श्रुतेः ॥

पुनराशङ्क्य परिहरति—

॥ सू ॥ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ६ ॥

अत्र प्रश्नप्रतिवचनयोराप एव प्रतीयन्ते, न तत्परिष्वक्तो जीव इति चेत्—न, उत्तरत्र 'अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान् षड्दक्षिणैति मासांस्तान् नैते संवत्सरमभिप्राप्नुवन्ति मासेभ्यः पितृलोकं पितृलोकादादित्यमादित्याचन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति तस्मिन् यावत्संपातमुषित्वाथैतमेवाध्वानं

अप्सु पृष्टास्विति । अयमाशयः । प्रश्नवाक्ये पञ्चस्वप्याहुतिष्वपां संबन्धमभ्यनुज्ञाय पंचमाहुतौ देहाकारपरिणतिप्रकारमात्रं पृष्टम् । न हि तत्र पंचम्यामाहुतावपां सत्त्वं देहाकारपरिणतिप्रकारश्चेत्युभयं पृष्टमिति वक्तुं शक्यम् । वाक्यभेदापत्तेः । एवं च विशिष्य पंचम्यामाहुतावपां देहाकारपरिणतिप्रश्नादाहुत्यन्तरेष्वपि तासां संबंधमात्रमभ्यनुज्ञातमवसीयते । यद्यप्यपां पुरुषवचस्त्वविशेषितभवनक्रियासंबंधमात्रं शाब्दं तथाप्याहुतीनां द्रव्याकांक्षायां सन्निधानात्तद्द्रव्यतयापि तास्सम्बध्यन्ते । तथा च पंचस्वाहुतिषु हूयमानानामपां पञ्चम्यामाहुतौ पुरुषाकारेण परिणामं वेत्थ किमिति प्रश्नवाक्यार्थः पर्यवस्यति । ततश्च कास्ता अब्द्रव्यकाः पंचाहुतयः इत्याकांक्षायां तन्निरूपणार्थं प्रवृत्तेषु पंचसु पर्यायेषु ये होमद्रव्यपराः श्रद्धादिशब्दास्ते तासामपामेवावस्थाविशेषवाचका इति व्याख्यातुं युक्तम् । एवं सत्येव 'इति तु पञ्चम्यामाहुता' विति प्रतिवचनोपसंहारवाक्यमपि संगच्छते । यदि ह्यपां पंचमपर्याये हूयमानानां 'तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भस्संभवती'ति पुरुषाकारपरिणामं वक्तुं 'तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेस्सोमो राजा संभवती' त्यादिषु प्रथमादिपर्यायेष्वपि तासामेव हूयमानानामपां सोमराजादिपरिणाम उक्तः स्यात् । तदानीमितिशब्देन प्रकारवाचिना च पूर्वोक्तसर्वप्रकारपरामर्शस्संगच्छते । प्रथमादिपर्यायेषु एवमेवं भूत्वा पञ्चमपर्याये पुरुषाकारा भवन्त्याप इत्यन्वयात् । यदि तु श्रद्धादिशब्दोक्तानामन्येषामेव होमद्रव्याणां सोमराजादिपरिणाम उक्तो भवेत् तदा पूर्वोक्तः सर्वोऽपि प्रकारोऽपां परिणामक्रमविषयो न भवतीति स न संगच्छते । तस्मादप्स्वेव श्रद्धाशब्दः । वैदिकप्रयोगान्तरदर्शनेन तस्य तासु वृत्त्युपपत्तेः पञ्चस्वप्याहुतिषु अपामेव होमद्रव्यत्वेन सम्बन्धे सिद्धे पंचमाहुतौ तासां पुरुषवचस्त्वमात्रस्य विधेयत्वेनावाक्यभेदोपपत्तेश्चेति ॥ नन्वस्त्वपां त्र्यात्मकानां पञ्चस्वप्याहुतिषु होमद्रव्यत्वेन सोमराजाद्युत्तरोत्तरावस्थाविशेषपरिणामित्वेन चानुवृत्त्या गतागतसिद्धिः । तथापि भूतान्तरसंसृष्टाभिस्ताभिरद्भिस्संपरिष्वक्तो जीवो गच्छतीत्येतन्न सिध्यति । जीवस्याश्रुतत्वादित्येतच्छङ्कानिराकरणार्थं सूत्रम्— अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ६ ॥ पितृयाणवाक्ये तावत्सोमराजशब्दनिर्दिष्टा इष्टापूर्तादिकर्मफलं भोक्तुं द्युलोके चन्द्रमसं प्राप्ता इष्टादिकारिण एव । 'अथ य इमे ग्रामे इष्टापूर्ते' इत्यादिनोपन्यस्तानां तेषामेव कर्मफलभोगपर्यन्तं तत्र स्थित्वा तदवसाने पुनराकाशादिक्रमेण भूमाव-

पुनर्निवर्तन्ते, यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवति अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते अतो वै खलु दुर्निष्प्रपततरं यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवति' इति वाक्ये द्युलोके सोमराजशब्दोक्तामृतमयदेहवैशिष्ट्येन पुण्यफलमनुभूय पुण्यकर्मावसाने पुनरिहागत्य गर्भं प्राप्तवतामिष्टादिकारिणां प्रतीतेस्तेषामेव 'तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा संभवति' इत्यत्र सोमराजशब्देन प्रत्यभिज्ञानात्। तस्मात् प्रश्नप्रतिवचनयोरप्यद्भिः परिष्वक्तस्तच्छरीरको जीव एवाप इत्युच्यन्त इति गम्यते। अतो न विरोधः॥

॥ सू ॥ भाक्तं वानात्मवित्त्वात् तथा हि दर्शयति ॥ ७ ॥

वतीर्य ब्राह्मणादिजन्मने गर्भप्राप्तेः प्रदिपादनात् । त एवात्रापि सोमराजशब्दनिर्दिष्टा भवितुमर्हन्ति सोमराजश्रुतिसाम्यात् द्युलोकस्थितिसाम्याच्चेत्येवमिष्टादिकारिणां प्रतीतेः तदश्रवणमसिद्धमिति भावः । श्रुता 'वेष सोमो राजे' त्येकवचनश्रवणेऽपि 'इष्टादिकारिणा'मिति सूत्रे बहुवचनं शंकान्तरवारणार्थम् । एवमिह शङ्का स्यात् । 'आकाशाच्चंद्रमस' मिति प्रकृतश्चन्द्रमाः 'एष' इति परामृश्यते । एकवचनानुगुण्यात्। सोमराजशब्दयोस्तत्र प्रसिद्धत्वात् तस्य देवभक्ष्यत्वप्रसिद्धेश्च । अतस्तं प्रकृता इष्टादिकारिणो देवा भूत्वा भक्षयन्तीत्येव तेषां द्युलोके भोगप्रकार उच्यते । तस्मात्सोमराजशब्देनेष्टादिकारिणां प्रतीतिरसिद्धेति । तत्रायं परिहारो विवक्षितः । चन्द्रस्य 'एष सोमो राजे' ति सोमराजत्वं न विधातव्यम् । सोमराजशब्दयोश्चंद्रपर्यायत्वस्य प्रसिद्धत्वात् । अत 'एष' इति प्रथमांतनिर्दिष्टानामिष्टादिकारिणामेव परामर्शः । विभक्त्यैकरूप्यात् । एकवचनं तु वाक्यस्य प्रातिपदिकस्य च गुणभूतम् । बहुपत्नीकप्रयोगे 'पत्नीं सन्नह्ये' त्येकवचनवदत्रैव प्रकरणे 'वायुर्भूत्वाभ्रं भवती' त्यादीष्टादिकारिविषयैकवचनवच्च प्रत्येकगतैकत्वाभिप्रायं योजनीयम् । ततश्च 'सोमो राजे' त्यनेन गौणेन प्रसिद्धचन्द्रसादृश्यं दिव्यभोगयोग्यामृतमयदेहत्वं विधीयते । अथवा भोग्यत्वरूपमग्रिमसूत्रेण स्पष्टीकरिष्यमाणं प्रसिद्धचंद्रसादृश्यं विधीयते । तस्यैव विवरणं 'तद्देवानामन्नं तद्देवा भक्षयन्ती' ति । तस्मात्पितृयाणवाक्यगतं 'एष सोमो राजे' त्येतत् बहूनामिष्टादिकारिणामेव परामर्शकं न त्वेकस्य चन्द्रमस इति । अपि च । पितृयाणवाक्ये पर्जन्यावरोहणमिष्टादिकारिणामेव श्रुतं न तु चन्द्रमस इति निर्विवादम् । तच्च पञ्चाग्निविद्यायां सोमराजशब्दनिर्दिष्टस्य 'पर्जन्यो वाव गौतमाग्नि' रित्यारभ्य 'तस्मिन्नेतस्मिन्नग्नौ देवाः सोमं राजानं जुह्वती' ति श्रूयते । अतोऽप्यरत्यत्रेष्टादिकारिणां सोमराजशब्देन प्रतीतिरिति । 'अपरपक्षाद्यानी' त्यादिश्रुतिवाक्यस्यायमर्थः । अपरपक्षात्तान्मासानभिसंभवंति प्राप्नुवंति यान्षण्मासान् दक्षिणां दिशमेति सविता दक्षिणायनमासषट्काभिमानिनीर्देवताः प्राप्नुवन्तीति यावत् । एते इष्टादिकारिणोऽर्चिरादिमार्गगामिनो विद्वांस इव मासेभ्यः संवत्सरं न प्राप्नुवन्तीति ॥ ननु पितृयाणवाक्येऽपि सोमराजशब्दनिर्दिष्टा इष्टादिकारिणो न भवंति देवैर्भक्ष्यमाणत्वश्रवणादिति शंकानिराकरणार्थं सूत्रम्-सू ॥ भाक्तं वानात्मवित्त्वात्तथाहि दर्शयति।

'एष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति' इति सोमराजभावापन्नस्यैव देवैर्भक्ष्यमाणत्वश्रवणान्नासौ जीव इति चेत्—तत् भाक्तमेव भक्ष्यमाणत्वं अनात्मवित्त्वेन देवोपकरणभावाभिप्रायम्। तथा हि 'यथा पशुरेवं स देवानाम्' इति श्रुतिरनात्मविदां पशुवद्देवोपकरणत्वं दर्शयति। तस्मादात्मविदां परमेश्वरोपकरणत्ववत् अनात्मविदां देवोपकरणत्वमिति मन्तव्यम्। अतः सर्वथा जीवो देहान्तरप्राप्तौ भूतसूक्ष्मवेष्टित एव यातीति सिद्धम् ॥

इति तदन्तरप्रतिपत्त्यधिकरणम् ॥ १ ॥

॥ ७ ॥ इष्टादिकारिणः प्रकृत्य श्रुत्यन्तरे 'ते चन्द्रं प्राप्यान्नं भवंति तांस्तत्र देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेत्येवमेनांस्तत्र भक्षयन्ती'ति तेषामेव देवान्नभावश्रवणात्। इहापि पूर्वापरपर्यालोचनालब्धानामिष्टादिकारिणामेव देवैर्भक्ष्यमाणत्वश्रवणात् तेषां व्याघ्रादिभिरिव देवैर्मुख्यतया भक्ष्यमाणत्वे स्वर्गकामादिश्रुतिविरोधप्रसंगात् तेषामिह कर्मभिर्देवाराधकत्वेन परत्र तत्परिचारकत्वेन च देवोपभोग्यत्वाभिप्रायं भाक्तं तदद-दनीयत्वश्रवणं व्याख्येयमिति भावः ॥ इति तदंतरप्रतिपत्त्यधिकरणम् ॥ १ ॥

नयमणिमालायाम्

अथ तृतीयस्याध्यायस्य प्रथमः पादः ॥

अथ तदन्तरप्रतिपत्त्यधिकरणम् ॥ १ ॥

सू० ॥ तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ १ ॥ त्र्यात्मकत्वात्तु भूयस्त्वात् ॥ २ ॥ प्राणगतेश्च ॥ ३ ॥ अग्न्यादिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ४ ॥ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ ५ ॥ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ६ ॥ भाक्तं वानात्मवित्त्वात्तथा हि दर्शयति ॥ ७ ॥

जीवो याति त्रिदिवं न भूतसूक्ष्मैः परिष्वक्तः। देहान्तरहेतूनां तेषां सर्वत्र सुलभत्वात् ॥ १६८ ॥
वेत्थ यथेति श्रुत्या गमनं तद्वेष्टितस्यैव। प्राणानां सहगतिरप्यनाश्रयाणां न संभवति ॥ १६९ ॥

इति तदन्तरप्रतिपत्त्यधिकरणम् ॥ १ ॥

सूत्रार्थचन्द्रिकायाम्

अथ तृतीयस्याध्यायस्य प्रथमः पादः ॥

अथ तदन्तरप्रतिपत्त्यधिकरणम् ॥ १ ॥

सू ॥ तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ १ ॥ त्र्यात्मकात्तु भूयस्त्वात् ॥ २ ॥ प्राणगतेश्च ॥ ३ ॥ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ४ ॥ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ ५ ॥ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ६ ॥ भाक्तं वानात्मवित्त्वात्तथा हि दर्शयति ॥ ७ ॥

भगवत्पादमते, पूर्वं जीवोपकरणभूतभौतिकजन्म निरूपितम्। तदुपजीव्य तदुपहितस्य जीवस्य संसारप्रकारं वैराग्यार्थं निरूपयितुं देहान्तरारंभे भूतसूक्ष्मसंपरिष्वक्तस्यैव परलोकगमनमित्याह—सू ॥ **तदन्तरप्रतिपत्तावित्यादिना।** अत्र स जीवः किं देहान्तरारंभकैरपञ्चीकृतभूतभागैरसंपरिष्वक्तो गच्छति उत संपरिष्वक्त इति **सन्देहः।** मानाभावादसंपरिष्वक्त एव गच्छतीति **पूर्वपक्षः। तदन्तरप्रतिपत्तौ**=देहान्तरप्रतिपत्तौ तदारंभकभूतैः **संपरिष्वक्तः। रंहति**=गच्छति। कुतः। **प्रश्ननिरूपणाभ्याम्**='वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति **प्रश्नः।** द्युपर्जन्यपृथिवीपुरुषयोषित्सु पञ्चस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पञ्चाहुतीर्दर्शयित्वा 'इति तु पंचम्यामाहुतावापः पुरुषवचसो भवन्ती' ति **निरूपणं**=प्रतिवचनं **ताभ्यामि**त्यर्थः। अतस्संपरिष्वक्तो गच्छतीति **सिद्धान्तः** ॥

नन्वेवमद्भिस्संपरिष्वक्तो गच्छतीति गम्यते कथं तदितरभूतपरिष्वङ्गसिद्धिरित्यत आह—**सू ॥ त्र्यात्मकत्वात्तु भूयस्त्वात् ॥ २ ॥** त्रिवृत्करणश्रुत्या अपामितरभूतद्वयमेलनेन त्र्यात्मकत्वात्। कथं तर्हि श्रुतावप्शब्दः। **भूयस्त्वात्**=तेजआद्यपेक्षया अपां देहे भूयस्त्वादित्यर्थः ॥

सू ॥ प्राणगतेश्च ॥ ३ ॥ प्राणानां भूताश्रितानामेव 'तमुत्क्रामन्त' मित्यादिना गतेः श्रवणाच्च तत्परिष्वङ्गसिद्धिः ॥

सू ॥ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ४ ॥ अग्न्यादिगतिश्रुतेरिति चेन्न='मृतस्याग्निं वागप्येति वातं प्राणः'इत्यादिना अग्न्यादिषु **गतिश्रुते**र्लयश्रवणात् न जीवेन वागादयो गच्छन्तीति चेत् न । वागादिलयश्रुतेः 'ओषधीर्लोमानि' इति**वद्भाक्त**त्वादित्यर्थः ॥

सू ॥ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ ५ ॥ प्रथमे=द्युलोकादिषु पञ्चस्वग्निषु प्रथमे द्युलोकाग्नौ । **अश्रवणादिति चेत्**='तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वती' ति श्रद्धाया आहुतित्वश्रवणादपामश्रवणात्कथं **पुरुषव**चस्त्वमिति चेत् । **न । हि**=यतः । **ता एव**='आपो हास्मै श्रद्धां संनमन्ते' इति श्रद्धाशब्देन तद्धेतवस्ता एवापो लक्ष्यन्ते । **उपपत्तेः**=प्रश्ननिरूपणयोरुपपत्तेरित्यर्थः ॥

सू ॥ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ६ ॥ अश्रुतत्वादिति चेत्=अपां श्रवणेऽपि अबादिवज्जीवस्याश्रुतत्वादिति चेत् । **न** । कुतः । **इष्टादिकारिणां प्रतीतेः**='अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ती' त्यादिवाक्यशेषेण इष्टापूर्तकारिणां प्रतीतेरित्यर्थः ॥

ननु तेषां धूमादिमार्गेण चन्द्रलोकं गतानां 'तद्देवानामन्नं तं देवा भक्षयन्ती' ति देवैर्भक्ष्यत्वश्रवणात्कथं तेषां स्वकर्मफलोपभोगस्सिद्ध्येदित्यत आह—**सू ॥ भाक्तं वानात्मवित्त्वात्तथाहि दर्शयति ॥ ७ ॥** वाशब्दश्शंकानिरासार्थः । तेषामिष्टादिकारिणामन्नत्वं **भाक्तमेव** न मुख्यम् । कुतः **अनात्मवित्त्वात्**=आत्मज्ञानशून्यत्वात्तेषां देवोपभोग्यत्वमेवान्नत्वम् । **तथाहि दर्शयति**='अथ योऽन्यां देवतामुपास्ते' इत्यादिश्रुतिर्देवपरिचारकत्वमेव तदन्नत्वमिति दर्शयतीत्यर्थः । तस्मात्परलोकभोगार्थं भूतसूक्ष्मसंपरिष्वक्तस्यैव जीवस्य परलोकगमनमिति सिद्धम् ॥

श्रीकण्ठमते तथा **रामानुजमते** च अस्मिन्पादे षट्स्वप्यधिकरणेषु प्रायस्स**न्देहपूर्वपक्षसिद्धान्तादिषु** विशेषाभावान्न पृथक्प्रपञ्चनावकाश इति वेद्यम् ॥

आनन्दतीर्थमते इदमधिकरणीया सप्तसूत्री प्रतिसूत्रं भिन्नाधिकरणतया सप्तधा संविभज्य व्याख्याता । अत्र तृतीयाध्याये साधननिरूपणं प्रस्तूयते । तत्रास्मिन्प्रथमे पादे साधनेषु प्रथमापेक्षितस्य वैराग्यस्य सिद्धये जीवस्य गत्यागतिनिरूपणं क्रियते—**सू । तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ १ ॥** बन्धनिवृत्त्यर्थं हि वैराग्यादिसाधनापेक्षा । बन्धश्च भूतबन्ध एव । तद्विमोक्ष एव च मोक्षः । स च स्वमरणे भवति । मरणं च स्वत एव नियमेन भवति किं वैराग्यादिसाधनापेक्षयेति **पूर्वपक्षः** । **सिद्धान्तस्तु** सत्यं भूतबन्धनिवृत्तिरेव मोक्षः । सा तु मृतौ न संभवति । पूर्वशरीरं परित्यज्य शरीरान्तरप्राप्तौ तदारंभाय भूतसंपरिष्वक्तस्यैव जीवस्य गतेः 'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' 'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती' ति प्रश्नप्रतिवचाभ्यामवगमादिति । सूत्रार्थोऽपि व्याख्यातः ॥ **इति तदन्तराधिकरणम् ॥ १ ॥**

अथ त्र्यात्मकाधिकरणम् ॥ २ ॥

सू ॥ त्र्यात्मकत्वात्तु भूयस्त्वात् ॥ २ ॥ प्रश्नप्रतिवचनयोरपामेव गतेः श्रूयमाणत्वात्केवलाभिरद्भिश्शरीरान्तरारंभान्मरण एव भूतबन्धनिवृत्तिरूपमोक्षसंभवान्न वैराग्यापेक्षेति **पूर्वपक्षः** । **सिद्धान्तस्तु,** प्रागेव भूतानां त्रिवृत्कृततयापां ग्रहणेन भूतेजसोरपि प्राप्तेः सर्वशरीरेषु त्रिचतुर्भागिनीनामपां भूयस्त्वेन त्रिवृत्कृतत्वेऽप्यप्शब्दप्रयोगोपपत्तेश्च भूतसंपरिष्वक्तस्यैव गतिः सिद्धा । तस्मान्न मरणे मोक्षसिद्धिः । इति ॥ **इति त्र्यात्मकाधिकरणम् ॥ ३ ॥**

अथ प्राणगत्यधिकरणम् ॥ ३ ॥

सू ॥ प्राणगतेश्च ॥ ३ ॥ ननु प्रश्नोत्तरयोः श्रुता'वापः पुरुषवचस' इति श्रवणाद्भूतानां सहगमनं कण्ठतो नोक्तमतो न भूतसंपरिष्वक्तस्य गतिस्सिद्ध्येत् । तस्मान्मरण एव मोक्षसिद्धेर्वैराग्याद्यनपेक्षा युक्ता इति **पूर्वपक्षः** । **सिद्धान्तस्तु** 'प्राणैर्वाव न वियुज्यन्त ' इति श्रुतेः 'यत्र वाव भूतानि तत्र करणानि नित्यानि ह्वा एतानि भूतानि करणानि न चैतानि कदाचिद्वियुज्यन्ते न च विलीयन्त' इति भाल्लवेयश्रुतेश्च प्राणानां भूतानां चाविनाभावावगमाद्भूतान्यपि जीवेन सह गच्छन्तीति सिद्धम् । तस्मान्मरणे मोक्षासिद्धेरस्ति वैराग्यादिसाधनापेक्षा जीवस्येति ॥ **इति प्राणगत्यधिकरणम् ॥ ३ ॥**

सू ॥ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ४ ॥ ननु यत्रास्य 'मृतस्याग्निं वागप्येती' त्यादिश्रवणादिन्द्रियाणामेव जीवेन सहगतिरसिद्धेति **पूर्वपक्षः** । **सिद्धान्तस्तु** 'पुरुषस्य मृतौ ब्रह्मन्प्राणा भागत एव तु । अधिदैवं प्राप्नुवन्ति भागतोऽनुव्रजन्ति तम् ॥ पुनश्शरीरसंप्राप्तौ तमेवानुविशन्ति च ॥' 'मृतिकाले जहत्येनं प्राणा भूतानि पंच च । भागतो भागतस्त्वेनमनुगच्छन्ति सर्वशः ॥' इति ब्रह्मब्रह्माण्डवचनाभ्यां प्राणानां भागतोऽग्न्यादिप्राप्तेर्भागतो जीवानुव्रजनस्य पुनश्शरीरप्राप्तौ भूताविनाभूतानामग्न्यादिगतभागानामपि तदनुप्रवेशस्य च प्रतिपादितत्वात्प्राणानां जीवेन सहगतिस्सिद्ध्यत्येवेति ॥ **भाक्तत्वात्**=भागविषयत्वादित्यर्थः ॥ **इति अग्न्याद्यधिकरणम् ॥ ४ ॥**

अथ कृतात्ययाधिकरणम् ॥ २ ॥

॥ सू ॥ कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ ८ ॥

पूर्वत्र भूतसूक्ष्मशरीरयुक्त एव जीवः स्वर्गादिकमुपेत्य देवादिशरीरे निजकर्मानुगुणं भोगं प्राप्नोतीति सिद्धम् । तदिह भोगानन्तरं स जीवः पुनरिमं लोकं सकर्मशेषोऽवतरति, निःशेषभुक्तकर्मा वेति संशयः ॥

तथा सति पुरुषो निरनुशय एव स्वर्गादिमं लोकमवरोहतीति युक्तम् । अनुशयो नाम कर्मशेषो जीवमनुशेत इति । न स्वर्गादवरोहतोऽनुशयः संभवति । अनुशयफलस्य तत्र भुक्तत्वात् । 'यावत्संपातमुषित्वा अथैतमेवाध्वानं पुनर्निवर्तन्ते' इति श्रुतिस्तद्विषया । अत्र संपातः कर्मसमूहः । संपातमनतिक्रम्येति यावत्संपातमित्युच्यते । ततो निःशेषं कर्मफलं भुक्त्वा कर्मरहित एव स्वर्गा-

---

अथ कृतात्ययाधिकरणम् ॥ २ ॥

एवं सकलसांसारिकदुःखहेतुर्देहारंभकभूतबन्धो मरणेऽपि न मुञ्चतीत्याब्रह्मज्ञानं तेषामनुवृत्तिरुक्ता । अथ 'भाक्तं वानात्मवित्त्वा' दित्यव्यवहितसूत्रे क्षयिष्णुसातिशयफलकतया दुःखप्रायफलकत्वेन प्रदर्शितस्य कर्मबन्धस्याप्येवमाब्रह्मज्ञानमनुवृत्तिप्रतिपादनार्थमधिकरणम्—सू ॥ कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ ८ ॥ 'यावत्संपातमुषित्वे'ति श्रवणात् 'रमणीयचरणा' इत्यादिश्रवणाच्च संशयमाह—स जीव इति । संपातः कर्मसमूह इति । संपतत्यनेन परलोकमिति करणार्थे घञ्प्रत्ययः । अतो निश्शेषमिति । उपक्रमगतत्वा 'द्यावत्संपात' मिति श्रवणं प्रबलमिति तदनुसारेण चरणशब्दः स्वर्गार्थेष्टापूर्त्तदानादिरूपकर्मव्यतिरिक्तसन्ध्यावन्दनाद्याचारपरो नेतव्य इति

अथ प्रथमाधिकरणम् ॥ ५ ॥

सू ॥ **प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः** ॥ ५ ॥ 'तस्मिन्नेतस्मिन्नग्नौ देवाश्श्रद्धां जुह्वतीति शरीरादुत्क्रान्तस्य श्रद्धयेष्टवतः पुंसश्श्रद्धासहितस्यैव द्युशब्दोक्ते प्रथमाग्नौ होमश्रवणाद्भूतसहितस्य तदश्रवणाच्च नास्ति भूतानां सहगतिस्तत्सत्त्वे प्रथमं तदुक्त्यवश्यंभावाच्चेति **पूर्वपक्षः** । **सिद्धान्तस्तु** तदश्रवणासिद्धेः । ता एव ह्यापस्त्रिवृत्कृताः श्रद्धाशब्देनात्रोच्यन्ते । यतः श्रद्धाशब्दो लक्षणया अद्भिस्सहितं पुरुषमाह । तथा सत्येव 'इति तु पञ्चम्यामाहुतावापः **पुरुषवचसो भवन्ती**' त्युपसंहारोपपत्तेर्भूतानां जीवेन सहगतिरुपपन्नैवेति ॥ **इति प्रथमाधिकरणम् ॥ ५ ॥**

अथ अश्रुतत्वाधिकरणम् ॥ ६ ॥

सू ॥ **अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः** ॥ ६ ॥ अग्न्यादिगतिश्रुतिवद्भूतानां जीवेन सहगमनस्य प्रत्यक्षश्रुतावश्रवणाद्भूतानां जीवेन सहगमनं न सिद्ध्यतीति **पूर्वपक्षः** । **सिद्धान्तस्तु**, 'अथैनं यजमानं किं न जहाति भूतान्येव भूतैरेव गच्छति भूतैर्भुङ्क्ते भूतैरुत्पद्यते भूतैश्चरति भूतैर्विचरति' इति कौण्डिन्यश्रुतौ **प्रत्यक्षत एव** यागहोमकृतां भूतवियोगसहयोगयोरवगमादस्ति भूतानां जीवेन सहगतिरिति ॥ ॥ **इत्यश्रुतत्वाधिकरणम् ॥ ६ ॥**

अथ भाक्ताधिकरणम् ॥ ७ ॥

सू ॥ **भाक्तं वानात्मवित्त्वात्तथाहि दर्शयति** ॥ ७ ॥ एवमधिकरणषट्कोक्तारीत्या मरणमात्रेण मोक्षाभावात्तदर्थं मुमुक्षुणा यद्यवश्यमनुष्ठेयं वैराग्यादिसाधनं तर्हि इष्टशेषश्रुतसोमपानान्मुक्ता अभूमेति विना वैराग्यादिकं कर्मणैव मोक्षं ब्रुवाणा श्रुतिर्विरुद्ध्येतेति **पूर्वपक्षः** । **सिद्धान्तस्तु** तदमृतत्वं **भाक्तममुख्यम्** । कुतः । **अनात्मवित्त्वात्** । 'नान्यः पन्था' इत्यादिश्रुत्या आत्मविद एव मुख्यममृतत्वम् । अतो न श्रुतिविरोधः । **तथाहि दर्शयति**= 'अमृतो वावे'ति 'स एन'मिति 'कर्मणे' ति 'आत्मान' मिति च श्रुतिस्तथोक्तार्थान्दर्शयति प्रतिपादयतीत्यर्थः ॥

इति भाक्ताधिकरणम् ॥ ७ ॥

इति सूत्रार्थचन्द्रिकायां तदन्तरप्रतिपत्त्यधिकरणम् ॥ १ ॥

दवरोहति जीव इति पूर्वः पक्षः ॥

सिद्धान्तस्तु–स्वर्गात् सुकृतक्षये पुनरिमं लोकमवरोहन् सकर्मशेष एवागच्छति । कथमवगम्यते ? श्रुतिस्मृतिभ्यामेव । यथा 'रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा अथ य इह कपूयचरणाः अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं सूकरयोनिं वा चण्डालयोनिं वा' इति श्रुतिः। 'जायन्ते पुण्यकर्मणा' इत्यादिका स्मृतिः । अन्यथा सद्यः समुत्पन्नस्य बालस्य धर्माधर्माद्यभावात् सुखदुःखभोगो न स्यात् । तस्मादनुशयवानेव यथेतमनेवं च समागच्छति । आकाशावरोहणाद्दारोहप्रकारेण वाय्वादिप्राप्तेः पितृलोकाद्यप्राप्तेश्च प्रकारान्तरेण च पुनर्निवर्तन्त इत्यर्थः ॥

पुनराशङ्क्य मतान्तरेण परिहरति—

॥ सू ॥ चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः ॥ ९ ॥

रमणीयचरणाः, कपूयचरणाः इति चरणशब्दान्नानुशयसिद्धिः । चरणशब्दस्य

भावः । श्रुतिस्मृतिभ्यामिति । यावानस्य कर्मसमूहस्स सर्वोऽपि कदाचिच्चंद्रमसमारूढेन भोक्तुं न शक्यते । अनादिजन्ममरणप्रवाहे केषाञ्चित्कर्मणां ततः प्रागेव भुक्तत्वान्नानाविधदेवमनुष्यपशुपक्षिसरीसृपादिदेहभोग्यत्वेन श्रुतानां कर्मणामेकेन स्वर्गशरीरेण भोक्तुमशक्यत्वाच्च । तस्मादुपक्रमगतस्यापि यावच्छब्दस्य स्वत एव संकोचाकांक्षायां स्मृत्यनुगृहीतोपसंहारगतरमणीयचरणादिश्रवणानुसारेण तदानींतनस्वर्गशरीरभोग्यकर्मसाकल्यविषयत्वेन सङ्कोचः कर्तुं युक्त इति भावः। 'तद्य इहे' त्यादिश्रुतेरयमर्थः । ये रमणीयचरणाश्शुभकर्माणस्ते रमणीयां योनिमापद्येरन्निति यत्तदभ्याशो ह सविध एव नातिचिरेण भवतीति । 'यथेतमनेवं' चेति सूत्रशेषस्यारोहणप्रकारेण प्रकारांतरेण चावरोहन्तीत्यर्थः । तदेव प्रकारद्वयं विशदयति–आकाशावरोहणादिति । चन्द्रारोहणं धूमरात्र्यपरपक्षदक्षिणायनषण्मासपितृलोकाकाशक्रमेण ततोऽवरोहणं त्वाकाशवायुधूमाभ्रमेघक्रमेणेत्येवमारोहणक्रमेण प्रकारान्तरेण चावरोहन्तीत्यर्थः । ननु यथेतमनेवं चावरोहणमिति श्रुतिवाक्यतः स्पष्टं प्रतीयते । न च तत्र निवर्तनीया काचन शङ्कास्ति । किमर्थं न्यायसूत्रे तन्निबंधनम् । दृष्टान्तार्थम् । 'अथैतमेवाध्वानं पुनर्निवर्तंते यथेतमाकाश'मित्युपक्रमश्रुताद्यथेतमिति शब्दादारोहपर्वणामेवावरोहेऽपि वैपरीत्येन क्रम इति प्रतीतावपि 'आकाशाद्वायु' रित्याद्यौपसंहारिकबहुवाक्यानुरोधाद्यथेतमनेवं चावरोहणमित्यभ्युपगम्यते । तथैवोपक्रमश्रुतया यावदिति श्रुत्या निरवशेषकर्मभोगप्रतीतावपि 'रमणीयचरणा रमणीयां ब्राह्मणादियोनिं कपूयचरणाः कपूयां श्वादियोनिमापद्यन्त'इत्यौपसंहारिकबहुवाक्यानुरोधात्सावशेष एव तत्कर्मभोगोऽभ्युपगन्तव्य इति । ननूदाहृतदृष्टान्तावष्टंभेनौपसंहारिकबहुवाक्यानुरोधादुपक्रमगतैका यावच्छ्रुतिस्सङ्कोचनीयेत्येतदयुक्तम् । उपसंहारे चरणशब्दयोः स्मार्ताचारपरत्वेनोपक्रमावगतस्य कर्मणां निरवशेषभोगस्याभ्युपगमे विरोधाभावादिति शङ्कानिराकरणार्थत्वेनोत्तरसूत्रमवतारयन्ति– पुनराशंक्येति । सू ॥ चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः ॥ ९ ॥ तस्यैव सुखादिसाधन-

स्मार्ताचरणविषयत्वादिति चेत्-न, अनुशयोपलक्षणार्था हि चरणश्रुतिः। तस्यैव सुखादिसाधनत्वात् ॥

॥ सू ॥ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ १० ॥

एवं सति स्मार्ताचरणस्यानुपयोगादानर्थक्यं स्यादिति चेत्-न । तदपेक्षत्वादेव सर्वस्य पुण्यकर्मणः, 'संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु । यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत् ॥' इत्यादिवचनात् । इति कार्ष्णाजिनिमतम् ॥

॥ सू ॥ सुकृतदुष्कृते एवेति तु बादरिः ॥ ११ ॥

बादरिस्तु 'रमणीयचरणाः, कपूयचरणाः' इति चरणशब्देन सुकृतदुष्कृते एवोच्येते, पुण्यं कर्माचरतीति प्रसिद्धेः इति मन्यते । एतदेव सूत्रकारस्य मतम् । यदा चरणशब्दः सुकृतदुष्कृतयोर्वाचकः, न तु लक्षकः, इति बादरेर्मतम्, स्मार्ताचारापेक्षं कर्मेति तु स्वीकृतमेव । अतः सुकृतदुष्कृतानुशयवानेव स्वर्गादवरोहति जीव इति सिद्धम् ॥ इति कृतात्ययाधिकरणम् ॥ २ ॥

त्वादिति । इष्टापूर्तादिरूपस्य कर्मण एव स्वर्गादिसाधनत्वेन विहितस्य सुखादिजनकत्वात् स्मार्ताचारस्यातथात्वादित्यर्थः । एवं तर्हि संध्यावन्दनादेर्वैयर्थ्यं प्राप्तमिति शङ्कानिराकरणार्थं सूत्रम्—सू ॥ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ १० ॥ स्मार्ताचारवतैवानुष्ठितानि यागादिकर्माणि स्वर्गादिफलजनकानि यतो दिवा रात्रौ च कर्माधिकारविरोध्यशुचित्वापादकानि यानि पापान्यवर्जनीयानि तानि स्नानसंध्यावन्दनादिभिर्निरस्यंते। 'आपः शुंधन्तु मैनसः' 'यदुच्छिष्टमभोज्यं' 'यदह्ना पापमकार्षम्' इत्यादिमन्त्रलिंगात् । अतो न तेषां वैयर्थ्यमित्यर्थः । सू ॥ सुकृतदुष्कृते एवेति तु बादरिः ॥ ११ ॥ चरणशब्देनेति । 'यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि। यान्यस्माकं सुचरितानि । तानि त्वयोपास्यानि ।' इति वेदे कर्मचरणयोर्भेदव्यपदेशस्तु प्रत्यक्षाचारानुमितश्रुतिसिद्धविषयत्वेनोपपादनीय इति भावः । कार्ष्णाजिनिमताद्बादरिमते सूत्रकाराभिमते चरणशब्दस्य कर्मवाचकत्वमेव विशेषः । आनर्थक्यसूत्रोक्तार्थस्तु समान एवेत्याह—स्मार्तेति। सुकृतदुष्कृतानुशयवानेवेति । एषां कर्मणां स्वर्गनरकमात्रफलकत्वं श्रुतं तत्फलान्यनुभूयावरोहतां कर्मान्तरबृन्दमेवानुशयः । येषां तु कर्मणां स्वर्गनरकभोगानंतरमिह योनिविशेषप्राप्त्यादिकमपि फलान्तरं श्रुतं तत्फलान्यनुभूयावरोहतामैहिकफलप्रदायी तत्कर्मशक्त्यवशेषोऽप्यनुशयः । एवञ्च स्वर्गादवरोहत्सु केषाञ्चित्कपूयचरणत्वेन श्वसूकरादियोनिप्राप्तिमपि प्रतिपादयन्त्याः श्रुतेः 'वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततश्शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवित्तवृत्तसुखमेधसो जन्म प्रतिपद्यन्ते विष्वञ्चो विपरीता विनश्यंति ततः परिवृत्तौ कर्मफलशेषेण जातिं रूपं वर्णं बलं मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रतिपद्यन्ते तच्च क्रमादुभयोर्लोकयोः सुख एव वर्तन्ते'। 'शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते' इत्यादिस्मृतिवचनजातस्य च न विरोधः । विषयभेदात् ।

इति कृतात्ययाधिकरणम् ॥ २ ॥

नयमणिमालायाम्

अथ कृतात्ययाधिकरणम् ॥ २ ॥

सू० ॥ कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ ८ ॥ चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः ॥ ९ ॥ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ १० ॥ सुकृतदुष्कृते एवेति तु बादरिः ॥ ११ ॥

पुनरागच्छति जीवः स्मृतिमान्निश्शेषभुक्तकर्मासौ । यत्किंचेति श्रुत्या समस्तकर्मक्षयाम्नानात् ॥ १७० ॥

इह रमणीयचरणश्रवणात्कर्मशेषयुत एव । चरणं चरित्रमिति तु न तस्य तदधिकारमात्रहेतुत्वात् ॥ १७१ ॥

सूत्रार्थचन्द्रिकायाम्

अथ कृतात्ययाधिकरणम् ॥ २ ॥

सू ॥ कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ ८ ॥ चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः ॥ ९ ॥ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ १० ॥ सुकृतदुष्कृते एवेति तु बादरिः॥ ११ ॥

भगवत्पादमते, स्वर्गिणामवरोहणमधिकृत्य श्रूयते–'तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते'इत्यादि । अत्र किं स्वर्गादवरोहन्तस्सानुशयाः उत निरनुशया इति **संदेहः** । निरनुशया इति **पूर्वपक्षः । सिद्धान्तस्तु, कृतात्यये**=स्वर्गप्रापककर्मजातस्य भोगेन नाशे । **अनुशयवान्**=आमुष्मिकफलप्रापककर्मातिरिक्तकर्मवानेवावरोहति । कुतः । **दृष्टस्मृतिभ्याम्**='तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्' इत्याद्या दृष्टा प्रत्यक्षा श्रुतिः, 'प्रेत्य कर्मफलमनुभूय ततश्शेषेण विशिष्टदेशकालकुलरूपायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते' इति स्मृतिः ताभ्यामनुशयवन्त एवावरोहन्तीति गम्यते । इति ॥ ते च येन मार्गेण चन्द्रलोकमारूढास्तेनैव मार्गेणावरोहन्ति किमुत तद्विपरीतेनेत्याकांक्षायामाह–**यथेतमनेवं च**=यथेतं यथागतं धूमादिमार्गेण । **अनेवं च**=वक्ष्यमाणाभ्रादिमार्गेण चावरोहन्तीत्यर्थः ॥ सूत्रमपि व्याख्यातम् ॥

सू ॥ चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः ॥ ९ ॥ चरणादिति चेत्=ननु 'रमणीयचरणाः इति श्रुतिः चरणाद्योन्यापत्तिं दर्शयति नानुशयात् । अतो नानुशयवत्त्वसिद्धिरिति चेत् । **न** । यतः **कार्ष्णाजिनिराचार्यः** इयं चरणश्रुतिरनुशयोपलक्षणार्थेति मन्यते ॥

सू ॥ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ १० ॥ ननु चरणश्रुतेर्मुख्याचारार्थपरित्यागेनानुशयार्थकत्वे आनर्थक्यमिति चेत् **न** । इष्टादिकर्मणामाचारनिर्वर्त्यत्वेन चरणापेक्षत्वाच्चरणश्रुतेरर्थवत्त्वमित्यर्थः ॥

वस्तुतः कर्मचरणयोर्न भेद इत्याह—**सू ॥ सुकृतदुष्कृते एवेति तु बादरिः ॥ ११ ॥ बादरिस्त्वाचार्यः सुकृतदुष्कृते एव चरणशब्देनोच्येते** इति मन्यते । लोके इष्टादिकारिणि 'धर्मं चरती' ति कर्मचरणयोरभेदेन प्रयोगदर्शनात् । अत इष्टादिकारिणां चन्द्रलोकं गतानां पुनरवरोहार्थमनुशयोऽस्तीति सिद्धम् ॥

श्रीकण्ठमते, तथा रामानुजमते च पूर्वाधिकरणवत्संदेहपूर्वपक्षादिषु नास्ति वैलक्षण्यं शांकरमतादिति विरम्यते तद्विवरणतः ॥

आनन्दतीर्थमते, तु इदमधिकरणं त्रेधा विभक्तम् । तत्र 'यथेतमनेवं च' इति योगविभागश्च विशिष्टः । **कृतात्ययाधिकरणं यथेताधिकरणं चरणाधिकरणमिति** चाधिकरणानि त्रीणि विभक्तानि । **सू ॥ कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्याम् ॥ ८ ॥** कृतस्य कर्मणः स्वर्गादिषु भोगेन निःशेषक्षयात्तत्र च कर्मान्तरामार्जनात् शरीरान्तरानारंभेण कर्मबन्धमूलः संसारः स्वत एवोच्छिद्येत किं वैराग्यादिनेति **पूर्वपक्षः । सिद्धान्तस्तु,** न तथा 'तच्छेषेणेमं लोकमायाति पुनः कर्म कुरुते पुनर्गच्छति ।' 'भुक्तशेषानुशयवानिमां प्राप्य भुवं पुनः । कर्म कृत्वा पुनर्गच्छेत्पुनरायाति नित्यशः ॥' इत्यादिश्रुतिस्मृतिभ्यां कर्मानुशयवानेवावरुह्य शरीरं लब्ध्वा पुनरपि कर्म कुर्वन्परिवर्तेत इत्यवगमेन कर्मबन्धस्य तन्मूलसंसारस्य च स्वत एवोच्छित्त्यसंभवाद्वैराग्याद्यपेक्षावश्यिकी इति ॥ ॥ **इति कृतात्ययाधिकरणम् ॥ ८ ॥**

अथ यथेताधिकरणम् ॥ ९ ॥

सू ॥ यथेतमनेवं च ॥ ९ ॥ अत्र जीवस्य स्वर्गादागतिप्रकारो विचार्यते । जीवस्य गतिप्रकारेणैवागतिर्युक्तेति 'यथेतमेव गच्छति यथेतमागच्छती'त्यादिश्रुत्या प्रतीयत इति **पूर्वपक्षः** । 'धूमादभ्रमभ्रादाकाश' मित्यादिकाषायणश्रुत्या गतिप्रकारेणान्यथा चागतिःसिद्धेति **सिद्धान्तः । यथेतम्**=जीवेन यथा येन मार्गेण स्वर्गादिकमितं प्राप्तं तथा तेन । **अनेवं च**=अन्येन मार्गेण च जीव इमं लोकमागच्छतीत्यर्थः ॥ **इति यथेताधिकरणम् ॥ ९ ॥**

अथ अनिष्टादिकार्यधिकरणम् ॥ ३ ॥

॥ सू ॥ अनिष्टादिकारिणामपि च श्रुतम् ॥ १२ ॥

इह यथेष्टापूर्तादिकारिणां चन्द्रगमनम्, तथान्येषामप्यस्ति न वेति संशयः ।

तथा सतीष्टापूर्ताद्यकुर्वतामपि चन्द्रगमनमस्त्येव, 'य एवैके चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति' इत्यविशेषेण सर्वेषां चन्द्रगमनश्रवणात् । यद्यपि तत्र पापिनां भोगो नास्ति, तथापि पुनरागत्य शरीरग्रहणार्थं पञ्चमाहुतिलाभाय स्वर्गगतिरपेक्ष्या । तस्मादिष्टापूर्ताद्यकुर्वतामपि चन्द्रगमनं युक्तम् ॥

अथानिष्टादिकार्यधिकरणम् ॥ ३ ॥

सू ॥ अनिष्टादिकारिणामपि च श्रुतम् ॥ १२ ॥ संगतिसूचनपूर्वकं संशयं दर्शयति–इहेति । 'अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीते' (ब्र० ३-१-६) रिति सूत्रे 'इष्टादिकारिणा' मिति विशेषग्रहणं कृतं तद्व्यर्थम् । 'ये के चास्मा' दितिश्रुताविष्टानिष्टादिकारिसाधारण्येन सर्वेषामपि चन्द्रप्राप्तिश्रवणादित्याक्षेपिकी व्यवहिताधिकरणसंगतिः । यावच्छ्रुतेरिव 'ये केचे ' त्यविशेषश्रुते 'श्चंद्रमसमेव ते सर्वे गच्छंती ' ति सर्वश्रुतेश्च न स्वयं संकोचापेक्षेति प्रत्युदाहरणरूपा समनंतराधिकरणसंगतिश्चात्र विवक्षिता । 'ये केचे' त्यादिश्रवण 'मथैतयोः पथो' रित्यादिश्रवणञ्च संशयबीजम् । ननु ये विहितमिष्टादिकं न कुर्वंति ये[1] निषिद्धमपि कुर्वन्ति ते खल्वनिष्टादिकारिणः । तेषामपि चन्द्रप्राप्तौ पुण्यकर्मणां पापिनाञ्च गतिरविशिष्टा स्यादित्याशंक्याह–यद्यपीति । चन्द्रलोके स्वर्गभोगाभावः पुण्यकृद्भ्यः पापिनां विशेषः । भोगाभावेऽपि चन्द्रलोकगमनं न व्यर्थं शरीरकारणपञ्चमाहुतिलाभार्थत्वात् । न च 'अथैतयोः पथोर्न कतरेण चे' ति श्रुतिविरोधः । न हि सा पापिनां पथिद्वयमपि निषेधति । स्वयंपथ्यन्तरानुपदेशात् । तेषां संयमनप्राप्तेरप्यभावप्रसङ्गेन[2] पथिशब्दयोः प्रकृतविद्याकर्मपरत्वस्य वक्तव्यत्वात् 'एतत्तृतीयं स्थान' मिति तृतीयस्थानांतरमात्रोपदेशात् । न च पापिनामपि चन्द्रलोकप्राप्तौ 'तेनासौ लोको न संपूर्यत' इत्युक्तस्यासंपूरणस्यानुपपत्तिः ।

अथ चरणाधिकरणम् ॥ १० ॥

सू ॥ चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः ॥ १० ॥ अत्र जीवस्य गमनागमनं चरणफलं वा यज्ञादिकर्मफलं वेति **संदेहः** । 'तद्य इह रमणीयचरणा' इत्यादिश्रुत्या जीवस्य गमनागमनं चरणफलमेवेति **पूर्वपक्षः** । चरणादिश्रुतेरजहल्लक्षणया यज्ञादिकर्मप्रतिपादकतया कर्मफलमेव तदीयं गमनागमनमिति **सिद्धान्तः** । **चरणादिति चेत्**=गतागतं न यज्ञादेर्भवति किं तु **चरणात्**=यज्ञाङ्गभूताचारादेव । **इतिचेन्न** । कुतः । यतः श्रुतिः तदुपलक्षणार्था अजहत्स्वार्थलक्षणया यज्ञाचारोभयप्रतिपादिकेति कार्ष्णाजिनिराचार्यो मन्यतेऽत इत्यर्थः ॥

सू ॥ आनर्थक्यमितिचेन्न तदपेक्षत्वात् ॥ ११ ॥ उपलक्षणार्थत्वे रमणीयकपूयपदाभ्यामेव कर्मोपलक्षणसंभवाच्चरणशब्दस्यानर्थक्यमिति **चेन्न** । कुतः । **तदपेक्षत्वात्**=तस्य साध्वसाधुयज्ञादिमत्त्वस्य आचारादिसापेक्षत्वात् । तथा च तद्बोधार्थं तत्पदसार्थक्यं भवतीत्यर्थः ॥

सू ॥ सुकृतदुष्कृते एवेति तु बादरिः ॥ १२ ॥ सुकृतदुष्कृते=साध्वसाधुकर्मणी एव श्रुतिस्थचरणशब्दवाच्ये न तु तदंगाचरणमिति बादरिराचार्यो मन्यत इत्यर्थः । तुशब्दस्यापिशब्दार्थकतया बादरिरपीत्यन्वयेन सूत्रकारस्य सिद्धान्तोऽपि स एवेति सूच्यते ॥ ॥ इति चरणाधिकरणम् ॥ १० ॥

इति सूत्रार्थचन्द्रिकायां कृतात्ययाधिकरणम् ॥ २ ॥

---

(१) 'निषिद्धं वा कुर्वन्ति ' इति ख. पाठः । (२) ' संभवप्रसंगेन ' इति ख. पाठः ।

इति प्राप्तेऽभिधीयते—

॥ सू ॥ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ १३ ॥

इष्टापूर्तादयकुर्वतां चन्द्रगमनं नास्ति, किंतु यमसदने कर्मफलमनुभूय प्रत्यवरोहणम्। एवंभूतावेव तेषामारोहावरोहौ, 'वैवस्वतं संगमनं जनानाम्' इति तद्गतिदर्शनात्। भोगार्थमेव हि स्वर्गगमनम्, न पञ्चमाहुतिलाभाय, द्रोणादीनां योषिदाहुतेरभावेन व्यभिचारात्। अतो यमलोकप्राप्तिरेव पापिनामिति युक्तम् ॥

॥ सू ॥ स्मरन्ति च ॥ १४ ॥

अस्मिन्नर्थे स्मरन्ति च, 'सर्वे चैते वशं यान्ति यमस्य भगवन् किल' इत्यादि॥१४॥

॥ सू ॥ अपि च सप्त ॥ १५ ॥

सप्त रौरवादीनपि पापिनो महानरकान् स्मरन्ति ॥

॥ सू ॥ तत्रापि च तद्व्यापारादविरोधः॥ १६ ॥

तेषां यमसदनप्राप्तौ चन्द्रलोकस्य मार्गमात्रत्वेन तत्र तेषां संघीभूयावस्थानाभावादसंपूरणोपपत्तेः । अतस्सा श्रुतिर्देवयानपितृयाणमार्गप्राप्ययोर्ब्रह्मचन्द्रलोकयोर्भोगाभावमात्रपरा न पापिनां मार्गद्वयस्यापि निषेधपरेति भावः ॥ सू ॥ **संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्** ॥ १३ ॥ अनुभूयेत्यस्य शेषमध्याहरति—**प्रत्यवरोहणमिति** । **एवंभूताविति** । संयमनारोहस्ततोऽवरोहश्चेत्येवंभूतावेवेत्यर्थः । **वैवस्वतमिति** । यदि 'ये केचे' त्यविशेषणश्रवणात्सर्वेषां चन्द्रप्राप्तिः कल्प्येत तदा 'वैवस्वतं संगमनं जनाना' मित्यविशेषश्रवणात्सर्वेषां यमप्राप्तिरपि कल्प्येत । अतो यथा 'अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे' इत्यादिविशेषवचनाद्यथा यमप्राप्तिवचनमनिष्टादिकारिविषयम् एवं 'अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते' इत्यादिविशेषवचनात् चन्द्रप्राप्तिवचनमपीष्टादिकारिविषयमित्याशयः । पञ्चमाहुतिलाभार्थं चन्द्रप्राप्तिगमनं सर्वेषां वाच्यमित्याशंकापरिहारं सूत्रकारेण वक्ष्यमाणमाकांक्षाशान्तये स्मारयति—**भोगार्थमिति** । सू० ॥ **स्मरन्ति च** ॥१४॥ **सर्वे चेति** । पापिन इत्यर्थः । अत उपबृंहणस्मृत्यनुसारेणापि सामान्यवचनस्य विशेषविषयतेत्यर्थः॥सू०॥ **अपि च सप्त** ॥ १५ ॥ स्मरन्तीत्यनुवर्तते । पापिनामेव हि पापफलानुभवार्थान् सप्त नरकानपि स्मरन्ति । अतोऽपि हेतोर्यमप्राप्तिवचनानां विशेषविषयत्वात्तद्वत् चन्द्रप्राप्तिवचनमपि विशेषवचनानुसारेण विशेषविषयमिति भावः । यमसदन एव केषांचिद्यातनानुभवः । तदभिप्रायं 'संयमने त्वनुभूये' ति सूत्रम् । केषाञ्चिद्यमसदनप्राप्त्यनंतरं यमाज्ञया पातालानामधोभागं प्राप्य तत्रत्येषु रौरवादिषु यातनानुभवः । तदभिप्राय' मपि च सप्ते' ति सूत्रम् । संयमनसप्तनरकरूपयातनानुभवस्थानद्वैविध्यसूचनार्थमेव 'अपि च सप्ते' त्येतस्मिन्सूत्रे समुच्चयार्थोऽपिशब्दः । ननु रौरवादयश्चित्रगुप्ताद्यधिष्ठिताः श्रूयन्ते । अतो यमप्राप्तिवचनस्य पापिविषयत्वकल्पनायां रौरवादिस्मरणस्य प्रमाणत्वेनोपन्यासो विरुद्ध इत्याशंकानिराकरणार्थं सूत्रम्—**तत्रापि च तद्व्यापारादविरोधः** ॥ १६ ॥

---

(१) 'सर्वे चैते पापिन इत्यर्थः' इति ख. पाठः ।

तत्रापि चित्रगुप्ताद्यधिष्ठितेषु नरकेष्वपि तेषां प्रेरकस्य यमस्य तदधिष्ठातृत्वव्यापारसत्त्वात् यमवश्यताया विरोधाभावः ॥

॥ सू ॥ विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १७ ॥

विद्याकर्मणोः फलभोगाद्यर्थं ब्रह्मगमनं चन्द्रगमनं च कथम्? 'तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ति अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति' इति ब्रह्मगमने चन्द्रगमने च विद्याकर्मणोरेव प्रकृतत्वात् । अतो न पापिनां तद्गतिप्रसङ्गः ॥

॥ सू ॥ न तृतीये तथोपलब्धेः ॥ १८ ॥

न च पापिनामपि पञ्चमाहुतिप्राप्तिमूलत्वाद्देहारम्भस्य तदर्थं द्युलोकापेक्षा, तेषां द्युलोकगमनाभावोपलब्धेः 'अथैतयोः पथोर्न कतरेण च तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत् तृतीयं स्थानं तेनासौ

चित्रगुप्तादीनामप्यधिष्ठातुर्यमस्य समीपं प्राप्य तदाज्ञया तद्भृत्याधिष्ठितान्नरकान्पापिनः पश्चात्प्राप्नुवन्तीति न विरोध इति भावः । पञ्चमाहुतिलाभार्थं पापिनामपि चन्द्रप्राप्तिर्वक्तव्येति शङ्कां निराकर्तुं चन्द्रप्राप्तिस्तदर्था न भवति किं तु कर्मफलभोगार्था यथा ब्रह्मप्राप्तिर्विद्याफलभोगार्थेति प्रतिपादनार्थं सूत्रम्—विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १७ ॥ देवयानपितृयाणे इति शेषः । 'विद्याकर्मणो' रिति सबन्धसामान्ये षष्ठी तादर्थ्यपर्यवसायिनी । तादर्थ्यं च तत्फलप्राप्त्युपायतया । इतिर्हेतौ । तथा च देवयानपितृयाणेविद्याकर्मफलप्राप्त्यर्थे इति हेतोरित्यर्थः । तुशब्दः पञ्चमाहुत्यर्थत्वव्यवच्छेदार्थः । कथं तयोस्तादर्थ्यमित्याकांक्षायां तत्साधको हेतुरुक्तः प्रकृतत्वादिति । चन्द्रप्राप्तेः फलभोगार्थत्ववद्देहारंभार्थपंचमाहुतिलाभार्थत्वमपि स्यादिति शङ्कानिराकरणार्थं सूत्रम्—न तृतीये तथोपलब्धेः ॥ १८ ॥ 'अथैतयो' रिति 'वेत्थ यथासौ लोको न संपूर्यते' इत्यपि श्वेतकेतुं प्रति प्रवाहणस्य प्रश्नः । अयं लोक इव स्वर्गलोकोऽपि बहुषु प्रयत्सु येन कारणेन सम्पूर्णो न भवति तत्कारणं वेत्थ किमिति प्रश्नः । श्वेतकेतौ प्रतिवचनाशक्ते प्रवाहणस्यैवेदं प्रतिवचन 'मथैतयो' रित्यादि । एतयोर्देवयानपितृयाणयोर्मध्ये येषामन्यतरेण मार्गेण गमनं नास्ति तानीमानि क्षुद्राणि यूकालिक्षमशकादीनि भूतान्यसकृदावृत्तीनि भवंति । असकृदावृत्तिर्जननमरणपौनःपुन्यरूपेति 'जायस्व म्रियस्वे' त्यनेनोच्यते । 'क्रियासमभिहारे लोड्लोटो हि स्वौ वा च तध्वमो' रिति पाणिनि (३-४-२) सूत्रे क्रियापौनःपुन्यविवक्षायां सर्वलकारापवादो लोण्मध्यमपुरुषो विहितः । तत्र द्विर्भावस्तस्यैव धातोरनुप्रयोगश्च नियतः । यथा लुनीहि लुनीहीति लुनाति पुनः पुनर्लुनातीत्यर्थः। तदनंतरं 'समुच्चयेऽन्यतरस्या' मिति (पा० ३-४-३) सूत्रेण अनेकक्रियासमभिहारे विकल्पेन लोण्मध्यमपुरुषो विहितः । तत्र न द्विर्भावः । तावत्क्रियासामान्यवचनस्य तु धातोरनुप्रयोगो नियतः । यथा 'ओदनं भुङ्क्ष्व सक्तून्पिब धानाः खादे त्ययमभ्यवहरती' ति । अत्र जननमरणक्रिययोः प्रत्येकं पौनःपुन्यं तयोस्समुच्चयश्चेत्युभयं विवक्षितम् । उभयविवक्षायां 'विप्रतिषेधे परं कार्य' मिति समुच्चयविवक्षाप्रयुक्तो वैकल्पिको लोण्मध्यमपुरुषः । असकृदावर्तीनि भवंतीति जननमरणक्रि-

लोको न संपूर्यत' इति । तृतीयं स्थानमिति पापकर्माण उच्यन्ते । अतः पापिनां न स्वर्गगमनम् ॥

॥ सू ॥ स्मर्यतेऽपि च लोके ॥ १९ ॥

लोके द्रौपद्यादीनां पुण्यकर्मणामपि पञ्चमाहुत्यनपेक्षा देहारम्भाय स्मर्यते ॥

॥ सू ॥ दर्शनाच्च ॥ २० ॥

किंच श्रुतिदर्शनं च भवति 'तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति अण्डजं जीवजमुद्भिज्जमिति' । तत्र स्वेदजोद्भिज्जयोस्तदनपेक्षत्वं दृश्यते ॥

यासामान्यवाचिनो भवतेरनुप्रयोगश्च । एतदसकृदावृत्तिरूपं तृतीयं स्थानं प्रकृतदेवयानपितृयाणमार्गद्वयापेक्षया । क्षुद्रजंतूनामयं तृतीयो मार्गः । तेन क्षुद्रजंतूनामनंतानां मार्गांतरसत्त्वात् देवयानपितृयाणप्राप्यचन्द्रप्राप्त्यभावेन हेतुना क्षुद्रजंतुभिरप्याक्रान्तोऽयं लोक इवासौ लोको न सम्पूर्यते इति प्रतिवचनार्थः । एवञ्च 'तृतीयं स्थानमिति पापकर्माण उच्यन्त' इति भाष्ये पापकर्मशब्दस्तन्मार्गोपलक्षकत्वेन योजनीयः । न चैतत्प्रकृतं क्षुद्रप्राणिजातं विद्वद्दिष्टादिकार्यपेक्षया तृतीयं कर्मफलानुभवस्थानमिति श्रुत्यर्थप्रदर्शकतया यथाश्रुतार्थमेव भाष्यमस्त्विति शङ्कनीयम् । 'अथैतयोः पथोरिति' प्रकृतमार्गद्वयापेक्षया तृतीयस्य मार्गान्तर एवान्वयात् 'अस्य गोर्द्वितीयोऽन्वेष्टव्य' इत्यादाविव संख्यायाः सजातीयनिवेशित्वात् स्थानशब्दस्य कर्मफलानुभवाश्रयपरत्वे विद्येष्टादिफलानुभवाश्रयब्रह्मचन्द्रप्राप्तापेक्षया ब्राह्मणादियोनिप्राप्तानामपि तृतीयराशित्वेन[1] भेदनिर्देशापत्तेश्च । अत एव 'अथैतयोः पथोरि' त्यस्य विद्याकर्मपरत्वमपि प्रत्युक्तम् । विद्याकर्मापेक्षयापि स्थानस्य तृतीयत्वासंभवेन पथोरिति मुख्यार्थमार्गद्वयपरं तृतीयं स्थानमिति मार्गांतरपरमित्येव व्याख्यातुमुचितत्वात् । अनिष्टादिकारिणां मार्गान्तरविवक्षायां च मार्गद्वयनिषेधेऽनुपपत्त्यभावात् । 'पंचम्यामाहुता' विति वचनं तु पञ्चमाहुतौ सत्यां शरीरसंभवमात्रं प्रतिपादयति न तु पंचमाहुत्यभावे तदसंभवमपि प्रतिपादयति । वाक्यभेदापत्तेः । न चार्थात्तत्कल्पनम् । 'एतत्तृतीयं स्थान' मिति विशेषवचनविरोधादिति भावः । तर्हि पंचमाहुतिमन्तरेणाऽपि शरीरोत्पत्त्यंगीकारे तस्यास्तत्कारणत्वं न स्यात् व्यतिरेकव्यभिचारादिति शङ्कानिराकरणार्थं सूत्रम्—**स्मर्यतेऽपि च लोके॥१९॥ पंचमाहुत्यनपेक्षेति** । तथा च शरीरविशेष एव पंचमाहुतेः कारणत्वमिति कल्पनमावश्यकमिति भावः ॥ ननु तपोविशेषप्रभवेषु शरीरेषु कायव्यूहरीत्या पंचमाहुत्यनपेक्षायामप्यन्यत्र सर्वत्रापि तदपेक्षा स्यात् । न च पञ्चमाहुतिवाक्ये 'पुरुषवचस' इति श्रवणात्पुरुषशब्दस्य 'पुरुषावात्ममानवा' विति नानार्थकोशानुसारेण मनुष्यमात्रविषयत्वोपपत्तेः क्षुद्रजन्तुषु पंचमाहुत्यपेक्षा न प्राप्नोतीति शंकनीयम् । कपूयचरणानां श्वसूकरयोनिप्राप्तावपि तदपेक्षाप्रतिपादनादिति शंकानिराकरणार्थं सूत्रम्—**दर्शनाच्च ॥ २० ॥ स्वेदजोद्भिज्जयोरिति** । स्वेदजस्य पंचमाहुत्यनपेक्षायाः लौकिकप्रमाणेन दर्शनात् उद्भिज्जानां तदपेक्षायाः श्रुत्यापि दर्शनादित्युभयसंग्राहकं 'दर्शनाच्चे' ति सूत्रमिति भावः ॥ ननु स्वेदजस्यापि कस्यचित्प्राणिजातस्य सत्त्वे कथं 'त्रीण्येव बीजानी'ति

---

(१) 'राशित्वेन तेषामपि तृतीयस्थानतया निर्देशापत्तेश्च' इति ख. पाठः ।

ननु 'जीवजमुद्भिज्जमिति' श्रुतौ स्वेदजग्रहणं नास्तीत्यत आह—

॥ सू ॥ तृतीयशब्दावरोधः संशोकजस्य ॥ २१ ॥

संशोकजस्य स्वेदजस्यापि तृतीयेनोद्भिज्जशब्देन संग्रहोऽस्तीत्यर्थः । ततः पापिनां न स्वर्गगमनमिति निर्णयः ॥

इत्यनिष्टादिकार्यधिकरणम् ॥ ३ ॥

श्रुतावधारणमिति शंकानिराकरणार्थं सूत्रम्—सू० ॥ **तृतीयशब्दावरोधस्संशोकजस्य ॥ २१ ॥** उद्भिज्जशब्देनेति । स्वेदजमपि प्राणिजातं लौकिकप्रमाणसिद्धमवश्यं क्वचिदिहान्तर्भावनीयम् । अन्यथावधारणश्रुत्यप्रामाण्यापत्तेः । अतः पार्थिवत्वोष्मप्रभवत्वायोनिजत्वाविशेषादुद्भिज्जमध्ये तदन्तर्भावोऽपि विवक्षितः कल्प्यत इति भावः ॥

इत्यनिष्टादिकार्यधिकरणम् ॥ ३ ॥

नयमणिमालायाम्

अथ अनिष्टादिकार्यधिकरणम् ॥ ३ ॥

सू० ॥ अनिष्टादिकारिणामपि च श्रुतम् ॥ १२ ॥ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ १३ ॥ स्मरन्ति च ॥ १४ ॥ अपि च सप्त ॥ १५ ॥ तत्रापि च तद्व्यापारादविरोधः ॥ १६ ॥ विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १७ ॥ न तृतीये तथोपलब्धेः ॥ १८ ॥ स्मर्यतेऽपि च लोके ॥ १९ ॥ दर्शनाच्च ॥ २० ॥ तृतीयशब्दावरोधस्संशोकजस्य ॥ २१ ॥

ये वै के चेत्यविशेषश्रवणात्पञ्चमाहुतेर्लब्ध्यै । पापाचारवतामपि वक्तव्या चन्द्रमःप्राप्तिः ॥ १७२ ॥
गन्तव्यान्तरमुक्तं तेषां धूमादिमार्गस्तु । पुण्यफलत्वेनोक्तो नाहुतिसंख्याप्यपेक्ष्यते लोके ॥ १७३ ॥

इति अनिष्टादिकार्यधिकरणम् ॥ ३ ॥

सूत्रार्थचन्द्रिकायाम्

अथ अनिष्टादिकार्यधिकरणम् ॥ ३ ॥

सू ॥ अनिष्टादिकारिणामपि च श्रुतम् ॥ १२ ॥ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ १३ ॥ स्मरन्ति च ॥ १४ ॥ अपि च सप्त ॥ १५ ॥ तत्रापि च तद्व्यापारादविरोधः ॥ १६ ॥ विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १७ ॥ न तृतीये तथोपलब्धेः ॥ १८ ॥ स्मर्यतेऽपि च लोके ॥ १९ ॥ दर्शनाच्च ॥ २० ॥ तृतीयशब्दावरोधस्संशोकजस्य ॥ २१ ॥

भगवत्पादमते, अत्र पापिनां चन्द्रलोकगतिरस्ति वा न वेति **संदेहः । अनिष्टादिकारिणामपि**=पापिनामपि । **श्रुतम्**='ये वै केचास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति' इति श्रुतम् । अतः धर्मिण एव चन्द्रलोकं गच्छन्तीत्येतदसंगतम् । पापिनामप्यस्ति चन्द्रलोकगतिरिति **पूर्वपक्षः । सिद्धान्तस्तु, सू ॥ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ १३ ॥** तुशब्दः पूर्वपक्षनिरासार्थः । **संयमने**=यमालये । **अनुभूय**=स्वपापानुरूपा यामीर्यातना अनुभूय प्रत्यवरोहन्ति पापिनः । अतः **इतरेषां**=पापिनाम् । एवंभूतावेव आरोहावरोहौ भवतः । कुतः । **तद्गतिदर्शनात्**='अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे' इति श्रुतौ यमवशत्वलक्षणायास्तेषां पापिनां गतेर्दर्शनात् ॥ इति ॥ द्वे सूत्रे अपि व्याख्याते ॥

सू ॥ स्मरन्ति च ॥ १४ ॥ मन्वादयः शिष्टाः पापिनां नरकभोगं स्मरन्ति । अतश्च धर्मिणामेव चन्द्रलोकगमनं नान्येषामित्यर्थः ॥

सू ॥ अपि च सप्त ॥ १५ ॥ अपि च सप्त रौरवादयो नरकाः पापिनां पापफलभूमित्वेन स्मर्यन्ते पौराणिकैः । पापिनस्तान्प्राप्नुवन्ति न चन्द्रलोकमित्यर्थः ॥

ननु पापिनो यमयातना अनुभवन्तीत्येतन्न युक्तं रौरवादौ चित्रगुप्तादीनामधिष्ठातृत्वस्मरणादित्यत आह—**सू ॥ तत्रापि च तद्व्यापारादविरोधः ॥ १६ ॥ तत्रापि च**=रौरवादिनरकेषु च । **तद्व्यापारात्**=तस्यैव यमस्याधिष्ठातृत्वव्यापारात् । **अविरोधः**=विरोधो नास्ति । चित्रगुप्तादीनां यमप्रयुक्तत्वादिति भावः ॥

उपासकानामर्चिरादिमार्गः केवलकर्मिणां धूमादिमार्ग इति श्रुतिस्मृत्यादिषु व्यवस्थापितत्वादेतन्मार्गद्वयभ्रष्टानां पापिनां

तृतीयमार्गोक्तेश्च न तेषां चन्द्रलोकप्राप्तिरित्याह—**सू ॥ विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १७ ॥** 'अथैतयोः पथोर्न कतरेण च न तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ती' त्यादौ 'एतयो' रिति पदस्य विद्याकर्मणोरित्यर्थोऽभ्युपेयः । कुतः । **प्रकृतत्वात्**=विद्याकर्मणोरेव देवयानपितृयानात्मकमार्गद्वयसाधनत्वेन प्रकृतत्वात्प्रकृतवाचकत्वमेतच्छब्दस्य युक्तमित्यर्थः । सूत्रे तुशब्देन 'चन्द्रमसमेव ते सर्वे गच्छन्ती' ति श्रुतिप्रयुक्तशंका व्यावर्त्यते । कुतः । सर्वशब्दस्य पुण्यपुरुषमात्रपरत्वात् इति भावः ॥

ननु 'पञ्चम्यामाहुतौ' इत्यादिना संख्यानियमेन देहप्राप्त्यभिधानात्तदर्थं पापिनामपि चन्द्रलोकप्राप्तिरङ्गीकार्येत्यत आह—**सू ॥ न तृतीये तथोपलब्धेः ॥ १८ ॥** तृतीये मार्गे प्रविष्टानां पापिनाम् । **न**=देहप्राप्त्यर्थमाहुतिसंख्यानियमो नादर्तव्यः । कुतः । **तथोपलब्धेः**=संख्यानियमं विनैव 'जायस्व म्रियस्वेत्येतत्तृतीयं स्थान' मिति श्रुतौ तृतीये मार्गे देहप्राप्तेरुपलब्धेरित्यर्थः ॥

सू ॥ स्मर्यतेऽपि च लोके ॥ १९ ॥ अपि च लोके भारतादौ द्रोणधृष्टद्युम्नादीनामयोनिजत्वं स्मर्यते । आहुतिसंख्यायां नियमाभावः सिद्धः ॥

सू ॥ दर्शनाच्च ॥ २० ॥ किं च । लोके जरायुजाण्डजस्वेदजोद्भिज्जादिषु चतुर्विधदेहेषु स्वेदजोद्भिज्जयोः स्त्रीपुंव्यक्तिसंयोगं विनैवोत्पत्तिदर्शनान्नाहुतिसंख्यानियम इत्यर्थः ॥

ननु 'त्रीण्येव बीजानि भवन्ति अण्डजं जीवजमुद्भिज्ज' मिति शरीरत्रैविध्यश्रवणात्कथं चातुर्विध्यमित्यत आह—**सू ॥ तृतीयशब्दावरोधस्संशोकजस्य ॥ २१ ॥** श्रुतौ **संशोकजस्य**=स्वेदजस्य । **तृतीयशब्दावरोधः**=तृतीयेनोद्भिज्जशब्देन संग्रहोऽभिप्रेतः । अतोऽनिष्टादिकारिणां न चन्द्रलोकप्राप्तिरपि तु इष्टादिकारिणामेवेति सिद्धम् ॥

श्रीकण्ठमते, रामानुजमते च संदेहपूर्वपक्षादिषु यद्यपि नास्ति वैशिष्ट्यं पूर्वमतात् । **रामानुजमते** परं, माद्यस्य सूत्रपञ्चकस्य पूर्वपक्षोपपादकतारूपविशेषसत्त्वेऽपि अनिष्टादिकारिणामपि यमलोके यातनाद्यनुभवानन्तरं चन्द्रलोकप्राप्तिरस्तीति पूर्वपक्षशरीरप्रतिपादनानुगुण्येन पूर्वपक्षसूत्राणां व्याख्यानान्नास्त्यतिवैलक्षण्यं तेषामर्थवर्णन इतीयानेव विशेषोऽत्र श्रीकण्ठमतादित्यवधेयम् । अन्यदविशिष्टं पूर्वस्माच्छ्रीकण्ठमतवत् ॥

आनन्दतीर्थमते, इदमधिकरणम् 'अनिष्टाधिकरणम्' 'अपिसप्ताधिकरणम्' 'तत्राप्यधिकरणम्' 'विद्याधिकरणं' 'न तृतीयाधिकरण' मिति पञ्चधा विभक्तम् । तत्राद्ये अनिष्टाधिकरणे पूर्वोक्तो गमनागमनक्लेशः इष्टादिपुण्यकृतामेव वा उत पापकर्मकारिणामपीति **संदेहे** इष्टादिकारिणां पुण्यकृतामेव गमनागमनक्लेशो नान्येषां तेषां प्रत्यवायभयरहितत्वात्फलकामनाराहित्याच्चेति **पूर्वपक्षः । सिद्धान्तस्तु,** यागादिकर्म अकुर्वतां तद्विरुद्धपापकर्मकारिणां चास्त्येवायं गतागतक्लेश इति । कुतः । 'तत्र इहे' त्यादिभाल्लवेयश्रुतौ तथाश्रुतत्वादित्यर्थः ॥

संयमने त्वनुभूयेतरेषामित्यादि । तुशब्दोऽवधारणे । सप्तमी द्वितीयार्थे । **संयमने** नरके सम्यग्यमशासनमनुभूयैव स्थितानामितरेषामिष्टादिकारिभ्योऽन्येषां मध्ये । **आरोहावरोहौ**=केषां चिदारोहो नरकादुत्थानं केषांचिदवरोहः ततोऽपि नीचस्थाने नित्यनरके पातो भवति । कुतः । **तद्गतिदर्शनात्**=तेषामनिष्टादिकारिणामेवंविधगतेर्दर्शनात् । 'सर्वे वा एते' इत्यादिश्रुतौ दर्शनादित्यर्थः ॥

सू ॥ स्मरन्ति च ॥ १६ ॥ स्मृतिकर्तारः उक्तमर्थं 'गच्छन्ति पापिनस्सर्वे' इत्यादिना प्रतिपादयन्तीत्यर्थः ॥

इत्यनिष्टाधिकरणम् ॥ ११ ॥

अथ अपि सप्ताधिकरणम् ॥ १२ ॥

सू ॥ अपिसप्त ॥ १६ ॥ अत्र 'चकार नरकं शून्य' मित्यादिस्मृतिवचनान्नित्यनरको नोपपद्यत इति **पूर्वपक्षः । सिद्धान्तस्तु,** 'रौरवोऽथ महांश्चैव वह्निर्वैतरणी तथा । कुंभीपाक इति प्रोक्तान्यनित्यनरकाणि च । तामिस्रश्चान्धतामिस्रौ द्वौ नित्यौ संप्रकीर्तितौ ॥'' इत्यादिना सप्तानां नरकाणां स्मरणात् 'चकार नरकं शून्य' मिति वचनस्य रौरवादिपञ्चनरकीविषयत्वाच्च नित्यनरकोऽभ्युपगन्तव्य एवेति ॥ **इत्यपिसप्ताधिकरणम् ॥ १२ ॥**

अथ तत्राप्यधिकरणम् ॥ १३ ॥

सू ॥ तत्रापि च तद्व्यापारादविरोधः ॥ १७ ॥ अत्र ईश्वरस्य नारकिजनप्रेरकत्वाङ्गीकारे तस्यापि दुःखभावत्वं स्यादिति **पूर्वपक्षः । सिद्धान्तस्तु, तत्रापि च**=नरकेऽपि च । **तद्व्यापारात्**=दुःखानुभवं विनैव तस्येश्वरस्य प्रेरणाख्यव्यापारसत्वात् । **अविरोधः**=ईश्वरस्य नरके स्थित्वा तन्नियन्तृत्वे दुःखाभोक्तृत्वप्रतिपादनाच्च न श्रुतिविरोधः इत्यर्थः ॥ **॥ इति तत्राप्यधिकरणम् ॥ १३ ॥**

अथ विद्याधिकरणम् ॥ १४ ॥

सू ॥ विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १८ ॥ अत्र 'अथैतयोः पथो' रित्यादिना देवयानपितृयाणमार्गयोर्भूतैः स्वातन्त्र्येण गन्तुं शक्यत्वावगमात्किं वैराग्यादिसाधनकलापानुष्ठानक्लेशेनेति **पूर्वपक्षः । सिद्धान्तस्तु,** 'एतयोः

अथ तत्स्वाभाव्यापत्त्यधिकरणम् ॥ ४ ॥

॥ सू ॥ तत्स्वाभाव्यापत्तिरुपपत्तेः ॥ २२ ॥

पूर्वत्र फलभोगानन्तरं स्वर्गात् सानुशय एव जीवोऽवतरतीति निरूपितम् । तस्यावरोहत आकाशादिभावः श्रूयते 'अथैतमेवाध्वानं पुनर्निवर्तन्ते यथैतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवति अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति' इति । तत्र जीवस्याकाशादिरूपताऽऽपत्तिः तत्सादृश्यापत्तिर्वेति संशयः ॥

अथ तत्स्वाभाव्यापत्त्यधिकरणम् ॥ ४ ॥

सू० तत्स्वाभाव्यापत्तिरुपपत्तेः ॥ २२ ॥ आपादपरिसमाप्तेरवरोहप्रकारविषयां चिंतां प्रवर्तयितुं प्राक्सिद्धमर्थमनुवदति–पूर्वत्रेति । 'वायुर्भूत्वा धूमो भवती' त्यादिसामानाधिकरण्यस्य मुख्यत्वापवादकाभावसद्भावाभ्यां संशयमाह–तत्र जीवस्येति । भूत्वेति शब्दादिति । वायोः कर्मत्वनिर्देशेऽपि तद्भावापत्तिपरामर्शात्तथैव कर्मत्वे निर्दिष्टेऽपि आकाशेऽवरोहतां तद्भावापत्तिरवसीयते । आकाशवाय्वोः कर्मत्वनिर्देशश्शरीरभूतयोस्तयोरनुप्रवेशार्थत्वेन मुख्यतयोपपद्यते । 'वायुर्भूत्वा धूमो भवती' त्यादिसामानाधिकरण्यं तु शरीरशरीरिभावाभावे मुख्यतया नोपपद्यते । न चास्य मुख्यत्वे स्थानशब्दस्य मुख्यत्वे तृतीयशब्दसमभिव्याहारवत् किञ्चिद्बाधकमस्ति । अतः प्रथमचरमाहुत्योर्देवमनुष्यादिभाववदध्वन्याकाशादिभावस्यापि शरीरशरीरिभावत्वं युक्तम् । भूस्वर्गयोरिवाध्वनि भोगाभावात् शरीरग्रहणस्य निष्प्रयोजनत्वं सामानाधिकरण्यस्य मुख्यत्वे बाधकमिति चेत् । न । प्रयोजनाभावेन श्रुतपरित्यागायोगात् । न हि भूतानां सर्वत्र सुलभतया शरीरारंभकभूतसूक्ष्मसहितस्य गमनं निष्प्रयोजनमिति श्रुतं तत्परि-

पथो' रित्यनेन मार्गद्वयप्राप्तिसाधनभूतयोर्विद्याकर्मणोः परामर्शात् तयोरपि 'तद्य इत्थं विदुः' 'अथ य इमे ग्रामे' इति प्रकृतत्वात् । अतो नास्ति स्वातन्त्र्येण गतिर्भूतानामिति युज्यत एव तत्साधनकलापानुष्ठानप्रवृत्तिरिति ॥

इति विद्याधिकरणम् ॥ १४ ॥

सू ॥ न तृतीये तथोपलब्धेः ॥ १९ ॥ अत्र तिर्यग्यातनातमोभेदेन त्रिविधायामधोगतौ तृतीयेऽपि तमःस्थाने पूर्वयोरिव कदाचित्सुखं स्यादिति **पूर्वपक्षः** । 'नान्धे तमसि मग्नानां सुखलेशोऽपि कश्चने' त्यादिस्मृत्या स्वतन्त्रः परमेश्वरः स्वद्वेषिणां सुखं नेच्छेत्तदिच्छां विना च किमपि न भवेदिति युक्त्या च तत्रेतरस्थानदृष्टान्तेन सुखोन्नयनस्य बाधितत्वात्तृतीये तमःस्थाने सुखलेशोऽपि नास्तीत्यर्थः ॥ इति **सिद्धान्तः** ॥ **सूत्रार्थस्तु तृतीये**=तमःस्थाने । **न**=न सुखमस्ति । कुतः । **तथोपलब्धेः**=तथाप्रतीतेरित्यर्थः ॥ **सू ॥ स्मर्यतेऽपि च लोके ॥ २० ॥** अंधे तमसि सुखराहित्यं 'नान्धे तमसी' तिस्मृतिकर्त्रा **स्मर्यते च**=स्मृत्या च प्रतिपाद्यते । किंचैतत् लोकेऽपि लोकदृष्टव्याप्तिकानुमानेनापि सिद्धमित्यर्थः ॥

सू ॥ दर्शनाच्च ॥ २१ ॥ 'अपश्यत्त्रिविधान्ब्रह्मा साक्षादेव चतुर्मुखः' इति पाद्मे त्रिविधप्राणिवर्गस्य हिरण्यगर्भकर्तृकदर्शनविषयत्वप्रतिपादनाच्चेत्यर्थः । इदं सूत्रं न भाष्यान्तरेषु दृश्यते ॥

सू ॥ तृतीये शब्दावरोधस्संशोकजस्य ॥ २२ ॥ 'तृतीये' इत्यावर्तते । तृतीये तमसि स्थाने तत्रापि तृतीयेऽन्धे तमसि तद्विषये यः शब्दः तृतीयतमःस्वरूपप्रतिपादकशब्दः तेन अवरोधः प्राप्तिः । कस्य । **संशोकजस्य**=सम्यक्शोकजस्य मोहस्येति यावत् ॥ अतश्च तृतीये न सुखमित्यर्थः ॥

सू ॥ स्मरणाच्च ॥ २३ ॥ 'महातमस्त्रिधा प्रोक्त' मित्यादिना कौर्मे श्रवणादेव मूर्च्छादिप्रदत्वस्मरणाच्चेत्यर्थः । अतो न तृतीये तमसि स्थाने सुखलेशप्रसक्तिरिति सिद्धम् ॥ **॥ इति न तृतीयाधिकरणम् ॥ १५ ॥**

इति सूत्रार्थचन्द्रिकायामनिष्टादिकार्यधिकरणम् ॥ ३ ॥

तत्र भूत्वेति शब्दादाकाशादिरूपत्वं जीवस्य ॥

इति प्राप्ते ब्रूमः–नावरोहतो जीवस्याकाशादिरूपताऽऽपत्तिः; किंतु तत्सादृश्यापत्तिः, तत्र सुखदुःखानुभवाभावात् । तदनुभवार्थं हि तत्तच्छरीरसंबन्धः । अन्यस्यान्यत्वानुपपत्तेश्च । तस्मात् तत्सादृश्यापत्तिरवरोहत इत्येवोपपद्यत इति निर्णयः ॥

इति तत्स्वाभाव्यापत्त्यधिकरणम् ॥ ४ ॥

त्यज्यते । भोगाभावोऽप्यसिद्धः । भूस्वर्गयोरिवाऽध्वन्यऽपि भोगोपपत्तेः । न च वृक्षाग्रादिव स्वर्गात्पततां संमूर्छितकरणानां भोगो न संभवतीति वाच्यम् । न हीष्टापूर्तादिकारिणः स्वर्गे कर्मफलं भुक्त्वा पुनर्भूलोके ब्राह्मणादियोनिं प्राप्य कर्मार्जनाय प्राचीनकर्मशेषेणावरोहन्तो वृक्षाग्रादिव स्वर्गान्मूर्छिताः पतन्तीति कल्पयितुं युक्तम् । तथा सति यागादीनामनर्थफलत्वापत्तेः । ‘ सविज्ञानो भवति स विज्ञानमेवान्ववक्रामती ’ ति श्रुत्यन्तरे गतागतयोर्ज्ञानवत्त्वप्रतिपादनेन मूर्छितत्वकल्पनानुपपत्तेश्च । न च तत्तदभिमानिशरीरत्वेन स्थितानामाकाशादीनामवरोहतः प्रत्यपि शरीरत्वमनुपपन्नमिति वाच्यम् । परमेश्वरं प्रति शरीरभूतानामेव तेषामभिमानिदेवताः प्रतीव एतान्प्रत्यपि शरीरत्वोपपत्तेरिति भावः । तत्र सुखदुःखेति । अभिमानिदेवताः प्रति भोगाश्रयाणामनुशयिनः प्रत्यपि भोगाश्रयत्वमनुपपन्नम् । युगपद्भोक्तृद्वयसमावेशे तयोः परस्परविरुद्धभोगार्थितायां शरीरोन्मथनप्रसंगादिति भावः । ननु भोगाभावेऽपि परमेश्वरं प्रतीव शरीरत्वं स्यादित्याशंक्याह–तदनुभवार्थं हीति । न तावदन्यभोगाश्रयनियमनार्थं तान्प्रति शरीरत्वम् । परमेश्वरस्येव तेषामन्तर्यामित्वाभावात् । तद्भोगार्थमपि न भवति चेत् स्वार्थतया परार्थतया वा तन्नियम्यत्वरहितानां तच्छरीरत्वं न संभवति । शरीरलक्षणाभावादिति भावः । नन्ववरोहतामाकाशादिशरीरत्वं तत्तदभिमानिदेवताभावेनैवास्त्वित्याशंक्याह–अन्यस्येति । सर्गाद्यकालमारभ्य आप्रलयमाकाशाभिमानिदेवताः तत्तत्कालविशेषेषु अवरोहद्भ्योऽन्या एव क्लृप्तास्सन्ति । ततोऽन्येषामवरोहतां तत्तादात्म्यं नोपपद्यत इति भावः । चकारेण बहूनामवरोहतामाकाशाद्यभिमानिदेवताभावानुपपत्तिस्समुच्चीयते । तत्सादृश्यापत्तिरिति । स्वर्गार्थकर्मक्षयानंतरममृतमयदेहे विलीने सूक्ष्मदेहमात्रदेहवेष्टितत्वेनावरोहतामाकाशादिभ्यः पृथगभिधानानर्हत्वं तत्सादृश्यमिति भावः । तस्मात्पितृमातृप्रवेशे पितृमातृभ्यामिवाकाशादिभिरप्यवरोहतां देहान्तरप्राप्तिनिमित्तकर्मोद्बोधितवासनामूलस्वाप्नज्ञानसदृशानभिव्यक्तज्ञानमात्रवतां स्वयं भोगरहितानां संश्लेषमात्रमिति स्थितम् ॥ इति तत्स्वाभाव्यापत्त्यधिकरणम् ॥ ४ ॥

नयमणिमालायाम्

अथ तत्स्वाभाव्यापत्त्यधिकरणम् ॥ ४ ॥

सू० ॥ तत्स्वाभाव्यापत्तिरुपपत्तेः ॥ २२ ॥

व्योमादिरूपतास्य श्रवणादवरोहतो माया । दिवि भुवि च रूपमयतो रूपौचित्याच्च मध्येऽपि ॥ १७४ ॥

मध्ये भोगाभावाद्रूपापेक्षा च नास्त्यस्य । अन्यस्य नान्यरूप्यं न युज्यते सदृशतास्य तदभावः ॥ १७५ ॥

इति तत्स्वाभाव्यापत्त्यधिकरणम् ॥ ४ ॥

अथ नातिचिराधिकरणम् ॥ ५ ॥

॥ सू ॥ नातिचिरेण विशेषात् ॥ २३ ॥

अत्रावरोहन् जीवो विलम्बते न वेत्यनियमः, उत न विलम्बत एव इति संशयः ॥

तत्र प्रवर्षणानन्तरं व्रीह्यादिभावः श्रूयते 'त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा जायन्ते' इति । प्रागेतस्मात् व्रीहियवादिभावादाकाशादौ विलम्बत्वरयोर्न नियमः ॥

अथ नातिचिराधिकरणम् ॥ ५ ॥

सू० ॥ नातिचिरेण विशेषात् ॥ २३ ॥ अनतिचिरावस्थाननियामकसत्त्वासत्त्वाभ्यां संशयमाह—अत्रेति । प्रागेतस्मादिति । यथा व्रीहियवादिष्ववस्थानमतिचिरमित्य 'तो वै खलु दुर्निष्प्रपतर' मिति वाक्यादवगम्यते एवमाकाशादिषु मेघान्तेषु नातिचिरमवस्थानमिति कुतश्चिन्नावगम्यते । अतस्तेषु चिरमचिरं वेत्यनियमः । न च व्रीह्यादिषु चिरावस्थानप्रतिपादनादेवाकाशादिष्वचिरावस्थानमवगम्यत इति वाच्यम् । व्रीह्यादिषु हि चिरावस्थाननियमो विधित्सितः । न तत्सत्तामात्रम् । चिरमचिरं वेत्यनियतस्यावस्थानस्य व्रीह्यादिभावोक्त्यैव[1] लब्धस्याविधेयत्वात् । तथा च विशिष्य व्रीह्यादिषु चिरावस्थाननियमप्रतिपादनसामर्थ्यादाकाशादिभ्यश्चिरावस्थाननियम एव व्यावर्तते । न त्वनियतं चिरावस्थानमपि । यथा 'वैखानसं पूर्वेऽहन्साम भवति षोडश्युत्तर' इति विशिष्यांगिरसां द्विरात्रस्योत्तरेऽहनि षोडशिग्रहनियमविधानसामर्थ्या 'दुत्तरेऽहन्द्विरात्रस्य गृह्यत' इति सामान्यवचनप्राप्तः षोडशिग्रहनियम एव द्विरात्रान्तरेभ्यो व्यावर्तते । न तु प्रकृतेरतिरात्रादनियतप्राप्तः षोडशिग्रहोऽपि । अत एव 'अर्धमन्तर्वेद्यर्धं बहिर्वेदी' ति

सूत्रार्थचन्द्रिकायाम्

अथ तत्साभाव्यापत्त्यधिकरणम् ॥ ४ ॥

सू ॥ तत्साभाव्यापत्तिरुपपत्तेः ॥ २२ ॥

भगवत्पादमते, पूर्वमिष्टादिकारिणोऽवरोहन्तीत्युक्तम् । अत्र तेषामवरोहप्रकारश्चिन्त्यते । श्रूयते ह्यवरोहश्रुतिः—'अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवति अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति' इति । तत्र किं स्वर्गादवरोहन्तो जीवा आकाशादिस्वरूपं प्रतिपद्यन्ते उत तत्साम्यमिति **संदेहः ।** आकाशादिस्वरूपमिति **पूर्वपक्षः । सिद्धान्तस्तु, तत्साभाव्यापत्तिः**=जीवानां तैराकाशादिभिस्साम्यप्राप्तिः । समानो भावो रूपं येषां तेषां भावस्साभाव्यं सादृश्यमिति विग्रहः । कुतः । **उपपत्तेः**=चन्द्रलोकं गतानामनुशयिनां प्रवृत्तफलकर्मक्षयदर्शनजनितशोकाग्निना दह्यमानमिदं शरीरं करकादिवद्विलीयमानमाकाशसमं भवतीत्येतदुपपद्यते । न ह्यन्यस्यान्यभावो मुख्य उपपद्यते । तस्मात्सादृश्यमेव प्रतिपद्यन्त इति सिद्धम् ॥ इति ॥ सूत्रमपि व्याख्यातम् ॥

श्रीकण्ठमते तथा **रामानुजमते** च नास्ति विशेषः पूर्वस्मात् ॥

आनन्दतीर्थमते, अत्र धूमादिभावः कर्मिणो धूमादिदेवतैक्यं वा तत्पदप्राप्तिर्वेति **संदेहः ।** 'धूमो भूत्वाभ्रं भवती' त्यादिश्रुत्या धूमादिदेवतैक्यं धूमादिभाव इति **पूर्वपक्षः ।** धूमादिषु प्रविश्य तद्गतौ गतिस्तत्स्थितौ स्थितिरित्यादिरेव तद्भावापत्तिः । अन्यस्यान्यभावायोगादिति **सिद्धान्तः । सूत्रार्थस्तु,** । कर्मिणः **तत्स्वाभाव्यापत्तिः**=तस्य धूमादिदेवस्य स्वाभाव्यस्य स्वभावसदृशस्वभावस्य प्राप्तिरेव । न तदैक्यं तत्पदप्राप्तिर्वा । कुतः । **उपपत्तेः**=अन्यस्यान्यैक्यादृष्टथास्यैवार्थस्य युक्तत्वादित्यर्थः ॥ १६ ॥ **॥ इति तत्स्वाभाव्यापत्त्यधिकरणम् ॥ ४ ॥**

(१) 'दिष्ववस्थानोक्त्यैव लब्धत्वेन तस्याविधेयत्वात्' इति ख. पाठः ।

इति प्राप्ते ब्रूमः—व्रीह्यादिप्राप्तेः प्रागाकाशादिषु नातिचिरं तिष्ठति जीवः। कथम्? व्रीह्यादिभावानन्तरं 'अतो वै खलु दुर्निष्प्रपतरम्' इति व्रीह्यादिभावान्निर्गमनं दुःशकमिति हि श्रूयते । अतो व्रीह्यादौ विलम्बात् अन्यत्र त्वरेत्य-

यूपावटमानदेशविधाने अन्तराळलक्षणां परित्यज्या 'र्धमन्तर्वेदी' त्येतावन्मात्रमन्तर्वेद्येकदेशं यूपार्धांगत्वेन विधत्ते । अर्धे तत्र मीयमाने अर्धांतरं बहिरिति लभ्यते । अतो'ऽर्धं-बहिर्वेदी' त्यनुवाद इति न वाक्यभेद इति पूर्वपक्षे 'अर्धमन्तर्वेदी' ति नियमविधानादर्धान्तरादन्तर्वेदिनियम एव व्यावर्तते न त्वनियतोऽप्यन्तर्वेदिदेशः । अतोऽर्धान्तरस्यान्तर्बहिर्वा मानं स्यादिति तत्परिहाराय 'अर्धं बहिर्वेदी' त्यस्यापि विधायकत्वं स्यादिति वाक्यभेदः 'तथा यूपस्य वेदि' रित्यधिकरणे प्रसंजितः । न च 'अतो दुर्निष्प्रपतरमेवे' ति माभून्नियमः, अत एव 'दुर्निष्प्रपतर' मिति परिसंख्यास्तु, तथा चाकाशादिभ्यश्चिरावस्थानं व्यावर्तत इति वाच्यम् । आकाशादिषु व्रीह्यादिषु चिरावस्थानस्य नियतप्राप्तौ हि परिसंख्या युज्यते । न तस्य कुतश्चित्प्रसक्तिरस्ति । चिरमचिरं वेति नियमाभावस्यावस्थानोक्त्या प्रसक्तिरस्तीत्यनियमप्राप्तौ नियम एवायम् । न च तथापि 'दुर्निष्प्रपतर' मिति तरप्प्रत्ययार्थस्यातिशयस्य प्रतियोग्याकांक्षायां प्रागनुक्रांतानामाकाशादीनां बुद्धिसन्निधानात्तत्प्रतियोगित्वेनान्वयः स्यात् । तथा च व्रीह्यादिष्वाकाशापेक्षया चिरमवस्थानोक्त्याकाशादिष्ववस्थानस्य तदपेक्षयाल्पकालत्वं पर्यवस्यतीति वाच्यम्। यतो दुर्निष्प्रपतशब्दात्तरप्प्रत्ययो न दृश्यते । छांदसेनैकस्य तकारस्य लोपेन तत्र तरप्प्रत्ययसमर्थने छांदसेन रेफोपजननेन तदभावोऽपि समर्थयितुं शक्यते । 'छंदसि गत्यर्थेभ्य' इति (पा० ३-३-१२९) सूत्रेण खलर्थे छांदसे युचि प्रत्यये सति दुर्निष्प्रपतनमिति रूपसिद्धौ नकारस्य छांदसेन वर्णव्यत्ययेनापि तदभावः समर्थयितुं शक्यते । तस्माद्यथा योषायामनुशयिनां गर्भरूपेणावस्थानमनियतकालं चिरमचिरं वेति विशेषाम्नानाभावात्स्रावपातावप्रसवकालप्रसवभेददर्शनाच्च एवमाकाशादिष्वप्यवस्थानमनियतकालम् । नियमकारिणश्शास्त्रस्याभावादित्यभिप्रायः। अन्यत्र त्वरेत्यवगमादिति । अयमाशयः । दुरुपपदादुपसृष्टात्पत्लृधातोः खलर्थे डप्रत्यये सति दुर्निष्प्रपमिति रूपसिद्धौ तस्मात्तरप्प्रत्यये[१] दुर्निष्प्रपतरमिति रूपसिद्धिः । 'अन्येष्वपि दृश्यत' इति जनेरुपपदान्तरेषु डप्रत्ययविधायकसूत्रे 'अन्येभ्योऽपि दृश्यत इति वक्तव्य' मिति वार्तिककृता धात्वन्तरेभ्योऽपि डप्रत्ययस्यानुशिष्टत्वात् । तत्र दृशिग्रहणं सर्वोपाधिव्यभिचारार्थमिति वृत्तिकारेणोक्ततया 'कृत्यल्युटो बहुल' मिति (पा० ३-३-११३.) सूत्रे बहुलग्रहणादन्येऽपि कृतः प्राप्तमभिधेयं व्यभिचरन्तीति तेनैवोक्ततया च तस्य डप्रत्ययस्य खलर्थवृत्तित्वोपपत्तेश्च । एवं वर्णव्यत्यय[२]वर्णलोपवर्णोपजनवर्णविकारानन्तरेण शब्दस्वरूपनिष्पत्तिसंभवे तेषामन्यतमो न कल्पनीयः । तथा चातिशायनिकप्रत्ययसामर्थ्यादाकाशादिष्ववस्थानमतिचिरमित्यवगम्यत इति । एतेन 'अतो वै खलु दुर्निष्प्रपतर' मित्यत्रातश्शब्देन सर्वनाम्ना संकोचाभावादाकाशादिसर्वपरामर्शादाकाशादिष्वप्यतिचिरमवस्थानमित्यपि शंका निरस्ता । आतिशयिनिकप्रत्ययार्थप्रतियोगितयाकाशादीनामन्वयितयातश्शब्दस्याव्यवहितैकवाक्योपात्तव्रीह्यादिमात्रपरामर्शित्वस्य वक्तव्यत्वात् व्रीह्यादिभ्यो दुर्निष्प्रपतरत्वोक्तिसाम-

(१) 'तत उपरि तरप्प्रत्ययेन दुर्निष्प्रपतरमिति शब्दनिष्पत्तिः' इति ख. पाठः । (२) 'वर्णव्यत्यये' ति पदं. ख. पुस्तके न दृश्यते ।

वगमादाकाशादौ न विलम्बते जीव इति ॥

इति नातिचिराधिकरणम् ॥ ५ ॥

अथ अन्याधिष्ठिताधिकरणम् ॥ ६ ॥

॥ सू ॥ अन्याधिष्ठिते पूर्ववदभिलापात् ॥ २४ ॥

इह व्रीह्यादावपि जीवस्य संश्लेषमात्रम्, उत जन्म ?

इति संशये व्रीह्यादिरूपेण 'जायन्ते' इति श्रवणात् तस्य व्रीह्यादिजन्म ॥

ह्यादाकाशादिभ्योऽपि दुर्निष्प्रपतरत्वमस्तीति तेष्वपि चिरावस्थानावगमात् सूत्रे 'नातिचिरेणे' त्युक्तम् । व्रीह्यादिषु यावान्विलंबस्तावानाकाशादिषु नास्तीत्येतावन्मात्रमिह सूत्रकृतोक्तम् । उभयत्राऽपि कालेयत्तायां व्यवस्थापकानि श्रुतिस्मृत्यादिवचनानि सन्ति चेत्तेभ्य एव सावगन्तव्या ॥ इति नातिचिराधिकरणम् ॥ ५ ॥

अथ अन्याधिष्ठिताधिकरणम् ॥ ६ ॥

सू । अन्याधिष्ठिते पूर्ववदभिलापात् ॥ २४ ॥ अवरोहतामाकाशादिभावस्तत्संश्लेषमात्रं न तु ताद्रूप्यं तच्च नातिचिरमित्याकाशादिमेघांतेषूभयं सिद्धम् । तदनन्तरपठितव्रीह्यादिभावस्त्वतिचिरमित्यपि विशेषस्सिद्धः । तर्हि तथैव व्रीह्यादिभावस्ताद्रूप्यमित्यपि विशेषोऽस्त्विति दृष्टान्तसंगत्या प्रत्यवस्थानमभिप्रेत्य जायंत इति जन्मसंकीर्तनात् जन्मनिमित्तकर्मासंकीर्तनाच्च संशयमाह-इहेति । जायन्त इति श्रवणादिति । ननु 'मेघो भूत्वा प्रवर्षती'ति प्रवर्षणकर्तृत्वश्रवणेऽपि यथा न मेघताद्रूप्यं तद्वदिहापि व्रीह्यादयो जायंत इति श्रवणेऽपि व्रीह्यादिताद्रूप्यमिति किं न स्यात् । मैवम् । प्रवर्षतीत्येतदाचारार्थक्विबन्ततया योजयितुं शक्यम् । अस्ति च वृष्टितः पृथगभिधानान-

---

नयमणिमालायाम् अथ नातिचिराधिकरणम् ॥ ५ ॥

सू० ॥ नातिचिरेण विशेषात् ॥ २३ ॥

आकाशादावस्य स्थितिरनियतकालभाक्तु स्यात् । आम्नायते हि कश्चिच्चिरमचिरं वेति न विशेषः ॥ १७६ ॥

व्रीह्यादिभ्यो दुर्निष्प्रपततरत्वोक्तिसामर्थ्यात् । अवसीयते ततः प्रागचिरं व्योमाद्यवस्थानम् ॥ १७७ ॥

इति नातिचिराधिकरणम् ॥ ५ ॥

सूत्रार्थचन्द्रिकायाम्

अथ नातिचिराधिकरणम् ॥ ५ ॥

सू ॥ नातिचिरेण विशेषात् ॥ २३ ॥

भगवत्पादमते, पूर्वमाकाशादिषु वर्षान्तेषु पूर्वपूर्वसादृश्यानन्तरमुत्तरोत्तरसादृश्यमित्युक्तम् । तत्र किं जीवः चिरकालमेव सादृश्येनावस्थाय अपरसादृश्यं गच्छति उताल्पमल्पमिति **संदेहः** । नियामकाभावादनियम इति **पूर्वपक्षः** । **सिद्धान्तस्तु,** जीवो **नातिचिरेण**=अल्पमल्पं कालमेवाकाशादिवर्षान्तैः सादृश्येनावस्थाय वर्षधाराद्वारा पृथिवीं प्रविशति । कुतः । व्रीह्यादिभावापत्त्यनन्तरं 'अतो वै खलु दुर्निष्प्रपतरम्' इति विशेषात् ततः पूर्वं सुनिष्प्रतरत्वं प्रतीयते । जीवस्य व्रीह्याकाशभावे विना स्थूलशरीरं लिंगशरीरमात्रेण सुखदुःखोपभोगासंभवात्तदानीं प्रतीयमाने सुखे चिरकालावस्थानरूपे एव भवतः । न मुख्ये । अतो व्रीह्यादिप्रवेशात्पूर्वमल्पमल्पमेव कालं तत्सादृश्येनावस्थानमिति सिद्धमिति ॥

श्रीकण्ठमते, तथा **रामानुजमते** च अत्रापि नास्ति वैलक्षण्यं शांकरमतादिति वेद्यम् ॥

आनन्दतीर्थमते, अत्र स्वर्गान्निर्गतस्य कर्मिणः चिरेण देहप्राप्तिर्वा उताचिरेणेति **संदेहे** चिरेणैव देहं प्राप्नोतीति**पूर्वपक्षः** ॥ 'तद्य इह रमणीयचरणा' इति विशेषवचनादचिरेणैव कर्मी स्वर्गादवरूढो देहं प्राप्नोतीति **सिद्धान्तः** ॥ सूत्रार्थोऽपि व्याख्यातः ॥ १७ ॥ ॥ इति नातिचिराधिकरणम् ॥ ५ ॥

इति प्राप्ते ब्रूमः—अन्यजीवाधिष्ठिते व्रीह्यादौ जीवस्य संश्लेषमात्रम् । आकाशादाविवावरोहतस्तत्र जननहेतुसंकीर्तनविरहिताभिलापात् 'जायन्ते' इति श्रुतिर्गौणी । यत्र ब्राह्मणादिजन्मास्ति तत्र 'रमणीयचरणाः कपूयचरणाः' इति हेतुरभिलप्यते । अतो ब्राह्मणादावेवास्य जन्माभिलापादन्यत्रास्य संबन्धमात्रमिति निर्णयः ॥

॥ सू ॥ अशुद्धमिति चेन्न शब्दात् ॥ २५ ॥

अवरोहतः पुरुषस्य पूर्वानुष्ठितयागादिष्वग्नीषोमीयादिहिंसामिश्रत्वादशुद्धं कर्मेति तत्फलभोगाय व्रीह्यादिष्वप्युत्पत्तिरस्त्विति चेत्—न,

हि वृष्टिसंश्लिष्टे भूतसूक्ष्मवेष्टितेऽनुशयिनि वृष्टिशब्दप्रयोगः । 'तस्या आहुतेर्वर्षं संभवति' इति । जायन्त इति शब्दस्तु व्रीह्याद्यात्मना जननमेवाभिधत्ते इति वैषम्यात् । न च स्वर्गादवरोहतां पापफलस्थावरजन्मानुपपत्तिः । श्वसूकरादिजन्मवत् स्थावरजन्मनोऽप्युपपत्तेः । न च स्थावरजन्मनिमित्तकर्मश्रवणात्तज्जन्मश्रवणमन्यथा नेयमिति वाच्यम् । श्रुतोपपत्त्यर्थमश्रुतकर्मकल्पनौचित्येन तदश्रवणमात्रेण श्रुतपरित्यागायोगात् । एतेन व्रीह्यादिभावो न ताद्रूप्येण जन्म जन्मनिमित्तकर्मसंकीर्तनरहितत्वान्मेघादिभाववदिति सामान्यतो दृष्टानुमानमपि निरस्तम् । जननहेतुसंकीर्तनेनेति । कपूयचरणाभिव्यक्तेरग्रे संकीर्तनात् श्वादियोनिप्राप्तिवत् व्रीह्यादिजन्मप्राप्तेस्तन्निमित्तत्वं वक्तुं न शक्यते । न च प्राक्संकीर्तितस्येष्टादिकर्मणोऽभिव्यक्तस्य स्वर्गे दत्तफलस्य शेषानुवृत्तिसद्भावेऽपि तस्योत्तमजन्मप्राप्तिहेतोः पापफलस्थावरजन्मनिमित्तत्वमस्ति । न चात्र स्थावरजन्मनिमित्तस्य कस्यचित्कर्मणस्संकीर्तनमस्ति । तस्मात्स्थावरजन्मनिमित्तकर्माभिव्यक्तिव्यतिरेकावगमादाकाशादिष्विव व्रीह्यादिष्वपि संश्लेषमात्रमिति भावः । ननु यागादिकर्मशेषफलमेवास्तु स्थावरजन्म यागादिकर्मणो हिंसादियुक्तत्वेन पापमिश्रितत्वादिति शंकानिराकरणार्थं सूत्रम्—अशुद्धमिति चेन्न शब्दात् ॥ २५ ॥ हिंसामिश्रत्वादिति । नात्र पदाहवनीयादिवदुत्सर्गापवादन्यायः प्रवर्तते । अविरोधात् । पशुहिंसाविधिर्हि तस्याः क्रतूपकारकत्वं बोधयति । 'न हिंस्या'दिति निषेधस्तु प्रत्यवायफलकत्वम् । न चैकस्येष्टानिष्टफलकत्वं नोपपद्यते । येन यागीयहिंसाशास्त्रस्य हिंसानिषेधशास्त्रस्य चाविरोधाय विषयव्यवस्था कल्प्येत । दृश्यते हि घृतपानादेः पुष्ट्यादिरूपेष्टहेतुत्वं मेहादिरूपानिष्टहेतुत्वं च । किमन्यत्रोदाहरणगवेषणया । यागादावेव श्रुतिप्राप्तस्वर्गादीष्टहेतुत्वं प्रत्यक्षादिप्राप्ततात्कालिकक्लेशरूपानिष्टहेतुत्वं च सर्वसम्प्रतिपन्नम् । तद्वद्यागीयहिंसादिषु श्रुतिद्वयप्राप्तेष्टानिष्टहेतुत्वसमावेशः स्यात् । को विरोधः । अथोच्येत यागीयहिंसायां विधितः प्रवृत्तेर्न सा निषेधशास्त्रस्य विषयः । तस्य रागप्राप्तविषयत्वादिति । नैतद्युक्तम् । यागीयहिंसायामपि रागत एव प्रवृत्तेः । न हि विधिसहस्रमपीष्टसाधनताबोधजननद्वारा रागमनुत्पाद्य पुरुषं प्रवर्तयितुमीष्टे । जैमिनिना च तृतीयाध्याये 'षट्त्रिंशत्प्रक्रमा प्राचि चतुर्विंशतिरग्रेण त्रिंशज्जघनेने' ति विहिता सौमिकी महावेदिः केवलप्रधानार्था । 'इयति शक्ष्यामह' इति तद्वाक्यशेषे इयति एतावति भागे कर्तुं शक्ष्याम इत्यर्थके तुमुन्प्रत्ययार्थचिकीर्षासंयोगात् न[1] चिकीर्षागप्रधानार्था अंगानामीप्सितफलसाधनत्वाभावेनाचिकीर्षितत्वादिति

(१) 'न लङ्गप्रधानार्था' इति. ख. पाठः ।

श्रूयते हि 'हिरण्यशरीर ऊर्ध्वं स्वर्गं लोकमेति' 'न वा उ वेतन्म्रियसे न रिष्यसि' इति पशुहिंसाया अहिंसात्वम् । ततो न तत्प्राप्तिरस्ति ॥

पूर्वपक्षं कृत्वा 'तद्युक्ते तु फलश्रुतिस्तस्मात्सर्वचिकीर्षा स्या' दिति सूत्रेण सकलांगयुक्ते फलश्रुतेः सर्वत्र प्रधानेऽगकलापे च चिकीर्षास्तीत्यंगानामपि चिकीर्षितत्वाविशेषादंगप्रधानार्थो महावेदिरिति सिद्धांतयता अङ्गेष्वपि रागत एव प्रवृत्तिरिति स्थापिता । तस्माद्धिंसादिपापमिश्रयागादिकर्मशेषतः स्थावरजन्म संभवतीत्याशयः । 'हिरण्यशरीर' इत्यादिः क्रतौ संज्ञप्तस्य पशोः स्वर्गप्राप्तिप्रतिपादकोऽर्थवादः । 'न वा उ वेत' दित्यादिः तस्य मृतिहिंसाभाववोधको मंत्रः । तत्र वै इति प्रसिद्धौ । उ इत्यवधारणे । एतदिदानीमित्यर्थः । हे पशो त्वं खलु इदानीं नैव म्रियसे नापि हिंस्यसे इत्यर्थः । अहिंसात्वमिति । क्रतौ पशुसंज्ञपनस्य पापयोनिविमोचनपूर्वकं स्वर्गप्रापकत्वेन तद्रक्षणरूपत्वाच्चिकित्सककृतव्रणदाहच्छेदादिवन्न हिंसात्वमिति न तत्र 'न हिंस्या' दिति निषेधस्पर्शः । अतो न यागस्य पापमिश्रत्वमिति भावः । इदमत्र चिंत्यते । 'हिरण्यशरीर' इत्याद्यर्थवादार्थे बाधकाभावात् क्रतौ संज्ञप्तस्य पशोः स्वर्गप्राप्तिरस्तु नाम । संज्ञपनस्य स्वर्गप्राप्तिसाधनत्वात्तदहिंसात्वेन मंत्रोऽपि स्तौतु नाम । तावता कथं पशुप्राणवियोजनरूपं तन्मरणोद्देश्यकमरणानुकूलव्यापारत्वे हिंसालक्षणे सत्यपि अहिंसा स्यात् । न च तद्रक्षणरूपत्वादहिंसा । व्रणदाहच्छेदयोर्दाहच्छेदरूपत्वेऽपि व्रणिरक्षणत्ववत्पशुप्राणविमोचनरूपस्य संज्ञपनस्य हिंसात्वेऽपि तद्रक्षणत्वोपपत्तेः 'अहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्य' इतिश्रुतौ तीर्थशब्दोक्तयज्ञाद्यर्थसंज्ञपनेऽपि हिंसात्वमभ्युपगम्यैव तत्पर्युदासाच्च । असार्वत्रिकश्चायं परिहारः । न खलु सौत्रामण्यां वर्णत्रयेऽपि निषिद्धस्पर्शाघ्राणादिकायाः पैष्ट्यास्सुरायाः ग्रहणं न ग्रहणमिति वा पानं न पानमिति वा वक्तुं शक्यम् । नाप्यश्वमेधे राजानुज्ञयाश्वसंरक्षकैः क्रियमाणमश्वमेधविषयमन्त्रब्राह्मणकल्पादिवेदिनां ब्राह्मणानामब्राह्मणानाञ्चाभ्यवहार्यस्याच्छिद्यहरणं परस्वहरणं न भवतीति वक्तुं शक्यम् । नापि वामदेव्योपासकस्य प्रार्थयमानसर्वयोषिदपरिहरणं तत्संगतिर्न भवतीति वक्तुं शक्यम् । नापि संस्थिते षडहे 'मध्वाशयेद्घृतं वे' ति द्वादशाहांगत्वेन विहितं 'मधु न दीक्षितो ब्रह्मचारित्वात् ।' (जै० १०-६-३२) 'प्राश्येत वा यज्ञार्थत्वात्' (जै० १०-६-३३) इति दाशमिकाधिकरणे यजमानतया ब्रह्मचर्ये सत्यपि सत्रात्मकद्वादशाहे ऋत्विक्कर्तव्यत्वेन स्थापितं मध्वशनं ब्रह्मचारिणां निषिद्धं मध्वशनं न भवतीति वक्तुं शक्यम् । अतो 'न शब्दा' दिति सूत्रांशेनान्य एव शंकायाः परिहारो विवक्षितः । स इत्थम् । 'न हिंस्या' दिति निषेधवाक्ये पुरुषार्थैव हिंसा धातुनानूद्यते न क्रत्वर्थापि । कर्तुराख्यातवाच्यत्वपक्षे समानपदश्रुत्या (समानपदोपात्त) हिंसायास्तच्छेषत्वप्रतीतेः तस्याख्यातार्थभावनाक्षेप्यत्वपक्षेऽपि तदाक्षिप्तकर्तृशेषत्वप्रतीतेः । नात्र क्रतोर्वाचकं किञ्चिदस्ति । येन 'अथातोऽग्निमग्निष्टोमेनानुयजन्ती'त्यनारभ्याधीते वाक्ये चित्याग्नेर्यजिशब्दोक्तयागशेषत्ववदस्याः क्रतुशेषत्वमवगम्येत । नापि क्रतोराक्षेपकं किंचिदस्ति । येन पर्णताया जुह्वाक्षिप्तक्रतुशेषत्ववदस्याः क्रतुशेषत्वमवगम्येत । न च प्रकरणे पाठोऽस्ति । येन 'नानृतं-

(१) 'भावत्वप्रतिषेधको' इति ख. पाठः । (२) 'एतद्रेखांकितं वाक्यं ख. पुस्तके नास्ति । (३) प्रकरणेन क्रतोर्विपरिवृत्तिरस्ति । येन इति ख. पाठः ।

वदे' दिति दर्शपूर्णमासप्रकरणाम्नातवाक्येऽनूद्यमानस्यानृतवदनस्येव क्रत्वर्थप्रतीतिर्भवेत् । तस्मादिह हिंसिधातुनानुवादः पुरुषार्थहिंसाया इति तस्या एव निषेधो न क्रत्वर्थायाः । ननु तथापि हिंसिधातोः क्रत्वर्थपुरुषार्थहिंसाद्वयसाधारण्येन शब्दशक्तिबलादुपस्थितं हिंसाद्वयमप्यनूद्य निषिद्ध्यतामिति चेन्नैतन्न्याय्यम् । आख्यातवाच्यत्वेन वा तद्वाच्यभावनाक्षेप्यत्वेन वोपस्थितस्य पुरुषस्य शेषभूताया हिंसायाश्शीघ्रोपस्थितिकतया तन्निषेधेन चरितार्थस्याहिंसावाक्यस्य कल्पनीयविलंबोपस्थितिकक्रतुशेषहिंसानिषेधकत्वस्यापि कल्पनायोगात् । ननु शब्दशक्तिसाम्येऽपि शीघ्रोपस्थितिकस्यैव शक्यस्य वाक्यार्थान्वयो न विलंबितोपस्थितिकस्येति वैषम्याभ्युपगमे 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते'...त्यत्र पूर्णमासपदेनोत्पत्तिवाक्यश्रुतपौर्णमासीकालिकत्वयोराग्नेयाग्नीषोमीययागयोरेव झटिति प्रवृत्तिनिमित्तावगत्या शीघ्रोपस्थितिकयोः फलसम्बन्धः स्यात् । उपांशुयाजस्य तु पौर्णमासीकर्तव्याग्नेयाग्नीषोमीययागद्वयान्तराले विधानादर्थसिद्धपौर्णमासीकालस्य झटिति प्रवृत्तिनिमित्तानवगत्या विलंबितोपस्थितिकस्य फलान्वयो न स्यादिति चेत्सत्यम् । आग्नेयाग्नीषोमीयवदुपांशुयाजस्यापि श्रुतपौर्णमासीकालत्वेन झटिति प्रवृत्तिनिमित्तावगत्या शीघ्रोपस्थितिकत्वाविशेषेण फलान्वयसिद्ध्यर्थमेव 'तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यज' न्नित्याहत्य पौर्णमासीकालविधानमन्यदाद्रियते । एतदेवास्य विधानस्य प्रयोजनमुपांशुयाजाधिकरणे 'प्रायेवचनाच्चे' ति सूत्रेण वार्तिकेन च स्पष्टीकृतम् । तत्र ह्यधिकरणे विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्योऽजामित्वायाग्नीषोमावुपांशु यष्टव्यावजामित्वाये' ति त्रयाणां यागानां विधयः । अन्तराळवाक्यं तु तत्समुदायानुवादः विद्वद्वाक्यवदिति पूर्वपक्षनिराकरणार्थं गुणसूत्रं 'प्रायेवचनादि' ति । 'शिरो वा एतद्यज्ञस्य यदाग्नेयो हृदयमुपांशुयाजः पादावग्नीषोमीया' वित्युपांशुयाजस्य प्रधानप्रायपाठात्प्राधान्यावगतेः विष्णवादिवाक्यैस्त्रयाणां यागानामुपांशुयाजशब्दपरामृष्टानां विधावुपांशुयाजमात्रप्राधान्यावगतिबाधप्रसंगात् अन्तरावाक्यविधेय एक एवोपांशुयाजः तत्तदर्थवादा विष्णवादिवाक्यानीति सूत्रस्यास्य भाष्ये तात्पर्यमुक्तम् । कथं यागत्रयविधिपक्षे तत्प्राधान्यबाधः स्यादित्याशंक्योपपादितं वार्तिके-'विष्णुप्रजापत्यग्नीषोमदेवत्ययागत्रयविधिपक्षे 'तावब्रूतामग्नीषोमा' वित्यादिनाग्नीषोमदैवत्यस्यैव यागस्य पौर्णमासीविधिरिति स्यात् । तथा च तस्यैव विद्वद्वाक्यफलवाक्यस्थपौर्णमासीपदगृहीतस्य फलसंबंधेन प्राधान्यं सिद्ध्येत् । न तु तदगृहीतयोः विष्णुप्रजापतिदेवत्ययागयोरन्तरावाक्येनैकस्यैव यागस्य विधिः तत्रैव शाखाभेदेनाम्नातैर्याज्यानुवाक्यायुगलैः प्रापिता विष्णवादिदेवता विकल्प्यन्त' इति । सिद्धान्तपक्षे तु 'विष्णुप्रजापतिदेवत्यस्याप्येकत्वेनाग्नीषोमोपलक्षितत्वानपायात् उपांशुयाजसामान्यस्य पौर्णमासीकालसम्बन्धलाभेन सिद्ध्यति प्राधान्य' मिति । अनेन पौर्णमासीविधिनैव लभ्यः फलसंबंधो नान्तरालविधिलभ्य इत्याशयः स्पष्ट एव । अन्यथा विष्णुप्रजापतिदेवत्ययोराहत्य पौर्णमासीविध्यभावेऽपि अन्तरालकालतयार्थप्राप्तपौर्णमासीसंबंधेनैव फलविधिगृहीतयोः प्राधान्यं सिद्ध्येदिति तत्प्राधान्यावगतिबाधप्रसंगदूषणमसमञ्जसं स्यात् । न त्वन्तरावाक्यं यत्त्रयागसमुदायानुवादकमिति पूर्वपक्षे अन्तराले यागविधायकं किञ्चि-

(१) ' फलान्वयात् ' इति. ख. पाठः ।

द्वाक्यं नास्तीति विष्णुप्रजापतिदेवत्ययागयोः फलसंबन्धार्थं पौर्णमासीविधिरेव शरणीकरणीयः । अतो यागभेदे तस्याग्नीषोमीयमात्रविषयत्वेन तयोः फलसंबन्धो न सिध्येदिति तद्दूषणसामञ्जस्यमिति चेन्न । अन्तरावाक्यमनुवाद इति पक्षेऽपि जामितादोषनिराकरणार्थमन्तराश्रुतेरनालंबनत्वपरिहारार्थं च त्रिष्वऽपि यागेष्वन्तरालप्राप्तेरवश्यवक्तव्यत्वात् । अत एव भवदेवेन उपांशुयाजाधिकरणपूर्वपक्षे 'कथमन्तरालवाक्यस्य सर्वात्मनानुवादकत्वमन्तरालस्यैवाप्राप्तस्य विधेयत्वा'दित्याशंक्य जामितादोषोपक्रमेण विष्ण्वादिवाक्येषु प्रत्येकमजामित्वानुवादेन च तेष्वन्तरालप्राप्तिमुक्त्वैव भवति चानुवादतोऽपि स्थाननियमः यथा 'न गिरा गिरेति ब्रूया' दिति गिरापदनिषेधानुवादबलादिरापदस्य गिरापदस्थाननिवेशित्व' मिति सदृष्टान्तमुपपादितम् । केचित्तु 'विष्ण्वादिवाक्यानि यागविधय' इति पक्षे प्राधान्यबाधमन्यथा समर्थयन्ते । विष्ण्वादिवाक्येषु तव्यप्रत्ययात्प्रथमं गुणकर्मत्वधीर्भवति कर्मान्तरानुपयोगानुसंधानेन त्वर्थकर्मतावगन्तव्या । अतश्शीघ्रावगतार्थकर्मणामेवाधिकारानुप्रवेशादुपांशुयाजस्य तदनुप्रवेशेन प्राधान्यावगतिर्विहन्येत । अन्तरावाक्यं यागविधायकमिति पक्षे तु तत्र तव्यप्रत्ययाभावेन गुणकर्मत्वधीकृतविलंबाप्रसक्तेराग्नेयादिवदेवाधिकारानुप्रवेशात्प्राधान्यावगतिर्न विहन्यत इति तेषामपि पदार्थप्रतीतिशैघ्र्यमान्द्यकृतवाक्यार्थानुप्रवेशतदननुप्रवेशन्याय एवोपजीव्यः इति प्रकृतोपयुक्ते तस्मिन्न्याये न विवादः । अपि च । यदर्थतया यत्प्रसक्तं तस्य निषेधोऽपि तदर्थः इति न्यायमर्यादा । अन्यथाप्रसक्तप्रतिषेधत्वानांजस्यात् । अत एव दर्शपूर्णमासप्रकरणाम्नातो 'नानृतं वदे' दिति निषेधः प्रकरणात्क्रत्वर्थो भवन् क्रत्वर्थस्यैवानृतवदनस्य निषेधः । तेन क्रतूपयोगिद्रव्यादिसंपादनार्थानृतवदने क्रत्वर्थनिषेधातिक्रमणात् क्रतोर्वैगुण्यं क्रतुमध्येऽपि पुरुषार्थानृतवदने न क्रतोर्वैगुण्यम् । 'यो नाम क्रतुमध्यस्थः कलंजादीनि भक्षयेत् । न क्रतोस्तस्य वैगुण्यं यथा चोदितसिद्धित' इति न्यायात् । किं तु पुरुषस्य प्रत्यवायमात्रम् । क्रतुप्रकरणाम्नातोऽपि यो निषेधः क्रत्वर्थस्य निषेधो भवितुं नार्हति नासौ क्रत्वर्थः । यथा दर्शपूर्णमासप्रकरणाम्नातो 'मलवद्वाससा न संवदेत न सहासीत नास्या अन्नमद्या' दिति निषेधः । यद्यपि पत्न्या सह संवादस्सहासनञ्चेत्युभयं क्रत्वर्थतया अर्थतः प्राप्नोति तथाऽपि मलवद्वाससा तया न प्राप्नोति । 'यस्य व्रत्येहन्पत्न्यनालंभुका स्यात्तामवरुध्य यजेते' ति मलवद्वाससः क्रतौ सर्वात्मना दासीकरणरूपस्यावरोधस्य विहितत्वात् । तदन्नादनं तु 'अथो खल्वाहुरभ्यंजनं वाव स्त्रिया अन्नमभ्यंजनमेव न प्रतिगृह्य' मित्यभ्यंजनशब्दोक्ततत्संगतिरूपतया व्याख्यातं क्रत्वर्थत्वेन कथमपि न प्राप्नोति । एवं सति 'न हिंस्या' दिति निषेधः क्रत्वर्थपुरुषार्थोभयविधहिंसानिषेधरूपत्वे स्वयमपि क्रत्वर्थपुरुषार्थोभयरूपो भवन् स्वस्य क्रतुपुरुषसंबन्धबोधनार्थं वाक्यं भिन्द्यात् । एवं 'लौकिके पुरुषार्थत्वं वैदिके क्रतुशेषते' ति क्रतुपुरुषोभयसम्बन्धबोधने वाक्यभेदः स्यादिति तत्परिहारार्थमेवाश्वप्रतिग्रहेष्टिसोमवमनेष्ट्यादिवाक्येषु 'योऽश्वं प्रतिगृह्णाति' 'यस्सोमं वमती' ति निमित्तसमर्पकशब्दानां लौकिकवैदिकसाधारण्येनाश्वप्रतिग्रहसोमवमनादिसामान्यपरत्वं त्यक्तम् । एवं हिंसानिषेधरीत्यैव सुरादिनिषेधानामपि पुरुषार्थनिषेधरूपत्वेन क्रत्वर्थसुराग्रहणाद्यस्पर्शित्वं व्याख्यातम् । इत्थमहिंसादिवाक्यानां वैधहिंसाद्यस्पर्शित्वं मीमांसान्यायपरिशीलनशालिनामतिस्पष्टमिति तदप्रदर्श्य वैधहिंसामात्रे नेयं हिंसेति भाष्य-

उपपत्त्यन्तरमाह–

॥ सू ॥ रेतस्सिग्योगोऽथ ॥ २६ ॥

'यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवति' इत्यनेन रेतस्सिचा योगमात्रमस्यानन्तरमुच्यते । अतः पूर्वमपि व्रीह्यादिषु योगमात्रमेव ॥

॥ सू ॥ योनेः शरीरम् ॥ २७ ॥

यदा योनिप्राप्तिस्तस्य तदैव शरीरमुत्पद्यते । अतः पूर्वं तु संश्लेषमात्रमिति भावः ॥

इत्यन्याधिष्ठिताधिकरणम् ॥ ६ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये तृतीयस्याध्यायस्य प्रथमः पादः ॥

कृता काचिदभ्युच्चययुक्तिः प्रदर्शिता-श्रूयते हीत्यादिना । अभ्युच्चययुक्तित्वं च 'पशुहिंसाया अहिंसात्व'मित्यनेन सूचितम् । तत्र हि हिंसाया इति हिंसात्वमभ्युपगम्यैवाहिंसात्वमौपचारिकमुपन्यस्तम् । तस्माद्यागादिकर्मणां पापमिश्रितत्वाभावेन तत्फलं व्रीह्यादिजन्मेति स्थितम् । कथं तर्हि जायन्त इत्युक्तिरित्याकांक्षायां तदुपपत्तिप्रदर्शनपरं सूत्रमवतारयति–उपपत्त्यन्तरमिति । सू॥ रेतस्सिग्योगोऽथ ॥२६॥ 'तद्भूय एव भवती' ति रेतस्सिग्भाव आम्नायते । न च पूर्वसिद्धपितृभावः पुत्रस्य संभवति । अतस्तत्रावश्यं तद्योग एव तद्भाव उपचरित इत्युपपादनीयम् । एवमत्रापि जायमानव्रीह्यादिसंश्लेष एवानुशयिनां जननमित्युपचरित इति भावः । सू० ॥ योनेश्शरीरम् ॥ २७ ॥ योनेः प्राप्त्यनन्तरमेव शरीरमुत्पद्यते । तदनंतरमेव सुखदुःखादिभोगसत्वात् श्रुतौ ब्राह्मणादिशरीरप्रतिपादनाच्च । अतो योनिप्राप्तेः प्रागाकाशादिपितृवीर्यान्तेषु संश्लेषमात्रमिति भावः ।

इति श्रीशिवातिवादिमूर्धन्यशिवदर्शनस्थापनधुरंधरसकलदेवभूदेवप्रतिष्ठापकश्रीमच्चिन्नबोम्मभूपालहृदयकमलकुहरविहरमाणश्रीसांबशिवप्रेरितस्य श्रीमद्भरद्वाजकुलजलधिकौस्तुभविश्वजिद्याजिश्रीरंगराजाध्वरिवरसूनोरप्पय्यदीक्षितस्य कृतौ श्रीकण्ठाचार्यविरचितब्रह्ममीमांसाभाष्यव्याख्यायां शिवार्कमणिदीपिकाख्यायां तृतीयस्याध्यायस्य प्रथमः पादः ॥ ३ ॥

नयमणिमालायाम्

अथ अन्याधिष्ठिताधिकरणम् ॥ ६ ॥

सू ॥ अन्याधिष्ठिते पूर्ववदभिलापात् ॥ २४ ॥ अशुद्धमिति चेन्न शब्दात् ॥ २५ ॥ रेतस्सिग्योगोऽथ ॥ २६ ॥ योनेश्शरीरम् ॥ २७ ॥

जायत इति श्रुतेः स्याद्व्रीहियवाद्यात्मनास्य जन्मैव । कर्म हि हिंसायुक्तं स्थावरताप्यस्य फलमुचितम् ॥ १७८ ॥

व्योमादाविव रेतस्सिचि व च संश्लेषमात्रमत्रापि । पशुहिततया श्रुतस्य हि तत्संज्ञपनस्य नास्ति हिंसात्वम् ॥ १७९ ॥

इत्यन्याधिष्ठिताधिकरणम् ॥ ६ ॥

इति श्रीमदप्पय्यदीक्षितकृतौ चतुर्मतसारसंग्रहे नयमणिमालिकाख्ये तृतीयपरिच्छेदे तृतीयस्याध्यायस्य प्रथमः पादः ॥ १ ॥

सूत्रार्थचन्द्रिकायामथ अन्याधिष्ठिताधिकरणम् ॥ ६ ॥

सू ॥ अन्याधिष्ठिते पूर्ववदभिलापात् ॥ २४ ॥ अशुद्धमिति चेन्न शब्दात् ॥ २५ ॥ रेतस्सिग्योगोऽथ ॥ २६ ॥ योनेश्शरीरम् ॥ २७ ॥

भगवत्पादमते, तस्मिन्नेवावरोहे 'त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते' इति श्रूयते । तत्र किं व्रीह्यादिभावेन जीवानां जनिश्रुतिर्मुख्या उत जीवान्तरेणाधिष्ठिते व्रीह्यादौ संसर्गमात्रमिति **संशयः** । मुख्येति **पूर्वपक्षः** । **सिद्धान्तस्तु, अन्याधिष्ठिते** अन्यैर्जीवैरधिष्ठिते व्रीह्यादौ संसर्गमात्रमनुशयिनां भवति । कुतः । **पूर्ववदभिलापात्**= यथाकाशादिवर्षान्तेषु कर्मपरामर्शमन्तरेणैव प्रवेश उक्तः एवं व्रीह्यादिष्वपि कर्मपरामर्शं विनैव प्रवेशाभिलापात् । तस्माज्जनिश्रुतिस्संसर्गमात्राभिप्राया न मुख्येति सिद्धम् ॥ इति ॥

सू ॥ अशुद्धमिति चेन्न शब्दात् ॥२५॥ अशुद्धमिति चेत्=ननु ज्योतिष्टोमादिकं कर्म पशुहिंसादियोगादशुद्धम् । तत्कारिणामनुशयिनां व्रीह्यादिस्थावरेषु दुःखानुभवार्थं मुख्यमेव जन्मास्त्विति चेत् **न** । **शब्दात्**=विधिशास्त्रादग्निष्टोमादेर्धर्मत्वेनावगतत्वान्न दुःखहेतुत्वमित्यर्थः ॥

सू ॥ रेतस्सिग्योगोऽथ ॥ २६ ॥ अथ=व्रीह्यादिभावानन्तरम् । अनुशयिनां **रेतस्सिग्योगः**=रेतस्सिञ्चतीति रेतस्सिक् तद्योगः तद्भावः । 'यो रेतस्सिञ्चति तद्भूय एव भवति' इति श्रुतावाम्नायते । रेतस्सिग्भावो मुख्यो न संभवति । अतस्तद्भावः तत्संसर्गो वाच्यः । तथा व्रीह्यादावपि संसर्ग एव ॥

ननु अनुशयिनां सर्वत्र संसर्गस्यैवाङ्गीकारे मुख्यं जन्म क्वापि न स्यादित्याह—**सू ॥ योनेश्शरीरम् ॥२७॥** योनौ रेतांसि निषिक्ते ततस्सुखदुःखोपभोगयोग्यं शरीरं कर्मोपार्जितमनुशयिनां जायत इति 'रमणीयचरणाः' इत्यादि शास्त्रमाह । तस्माद्ब्राह्मणादियोनावेवानुशयिनां मुख्यं जन्म न व्रीह्यादाविति गत्यागतिविवेककृतं वैराग्यं ज्ञानसाधनमिति सिद्धम् ॥ अत्र **पादे** अस्मिन्मते **षडधिकरणानि** । सूत्राणि **सप्तविंशतिः** ॥

श्रीकण्ठमते, तथा **रामानुजमते,** च अत्राप्यधिकरणे नास्ति वैलक्षण्यं पूर्वस्मात् । अत्र पादे अनयोर्मतयोस्सूत्रसंख्याधिकरणसंख्यादिष्वपि नास्ति वैलक्षण्यं पूर्वस्मादित्यवधेयम् ॥

आनन्दतीर्थमते,अत्राधिकरणे कर्मिणां व्रीह्यादिभावनिमित्तकं दुःखं भवति वा न वेति **संदेहे** दुःखं भवत्येवेति **पूर्वपक्षः** । **सिद्धान्तस्तु,** अन्याधिष्ठिते व्रीह्यादिशरीरे प्रवेशमात्रमभिप्रेतम् । न तु भोगः । अतो न तत्कृतं दुःखमिति । **सूत्रार्थस्तु,** कर्मिणः **अन्याधिष्ठिते**=अन्यजीवाभिमन्यमानव्रीह्यादिशरीरे प्रवेश एव । न तु तदभिमानित्वम् । येन दुःखं स्यात् । तर्हि व्रीहियवा इत्यभेदोक्तिः कथमित्यत उक्तम्– । यथा **पूर्ववदिति** 'धूमो भूत्वे' त्यादौ धूमादिभावोक्तिस्तथा । कुत एतत् । **अभिलापात्**='सोऽवाग्गत' इति श्रुतौ तथाभिधानादित्यर्थः ॥

सू ॥ अशुद्धमिति चेन्न शब्दात् ॥ २७ ॥ हिंसारूपत्वाद्यज्ञस्य कर्माशुद्धं दुःखसाधनमिति **चेन्न** । कुतः । **शब्दात्**=श्रुतिवाक्यविहितत्वादित्यर्थः ॥ **॥ इत्यन्याधिकरणम् ॥ १८ ॥**

अथ रेतोऽधिकरणम् ॥ १९ ॥

सू ॥ रेतस्सिग्योगोऽथ ॥२८॥ अत्र 'स्वर्गादवागतश्चापि मातुरेवोदरं व्रजे' दिति श्रवणात् स्वर्गादवतीर्णस्य जीवस्य साक्षान्मातृप्रवेश एव युक्तः । 'स एव गृही भवती' त्यादिना श्रुतः पितृप्रवेशः प्रयोजनाभावान्नादर्तव्य इति **पूर्वपक्षः** । 'रेतस्सिचमेवानुप्रविशत्यथ मातर' मिति कौण्डरव्यश्रुतेः अस्त्येव पितृप्रवेशः । पितृवीर्यस्याप्यपेक्षितत्वेन मातुरेवोदरमित्येवकारस्यायोगव्यवच्छेदकत्वात् पितरं प्रविश्य शरीरोत्पादकवीर्येण सह मातृप्रवेशस्येश्वरकल्पितत्वाच्च । इति **सिद्धान्तः** । **सूत्रार्थस्तु,** कर्मिणः प्रथमं रेतस्सिचा पित्रा योगः संबन्धः । तत्प्रवेश इति यावत् । **अथ**=अनन्तरं मातृप्रवेशः न तु प्रथममेवेत्यर्थः ॥ **॥ इति रेतोऽधिकरणम् ॥ १९ ॥**

अथ योन्यधिकरणम् ॥ २० ॥

सू ॥ योनेश्शरीरम् ॥ २९ ॥ अत्राधिकरणे कर्मी रेतोरक्तसंयोगात्पश्चाद्देहाकारेण परिणामानन्तरमेव मातृगर्भस्थं देहमन्नादिद्वारेण प्रविशतीति **पूर्वपक्षः** । **सिद्धान्तस्तु,** पितृशरीरान्मातृशरीरमनुप्रविश्य तत एव शरीरमाप्नोतीति ॥ **सूत्रार्थस्तु, योनेः** ल्यब्लोपे पञ्चमी । कर्मी पितृद्वारा मातृयोनिं प्रविश्य । अथ तत्र **शरीरं** लभते न तु तद्विनेत्यर्थः ॥ **॥ इति योन्यधिकरणम् ॥ २० ॥**

अत्र मते 'कृतात्यय' इति सूत्रे 'यथेतमनेवं चे' ति योगविभागतः 'तत्स्वाभाव्यापत्तिरुपपत्ते' रिति सूत्रतः पूर्वं 'स्मरणाच्चे' त्यधिकसूत्रपाठाच्चात्र पादे **एकोनत्रिंशत्**सूत्राण्यधिकरणानि तु **विंशति**रिति वेद्यम् ॥

यं प्रासूत विशुद्धशीलमनघं वृद्धांबिकाख्या सती
यं मृत्युञ्जयशर्मणो बुधमणेर्भाग्यं विदुस्साधवः ॥
वाधूलान्वयजन्मनोऽस्य सुधियो हालास्यनाथाह्वय-
स्येयं सत्कृतिरेधतामिह चतुर्भाष्यानुगा **चन्द्रिका** ॥

सूत्रार्थचन्द्रिकायां तार्तीयीकेऽत्र साधनाध्याये । **वैराग्यपाद**नाम्ना प्रथितस्संपूर्ण **आदिमः** पादः ॥

इति **हालास्यनाथकृतौ सूत्रार्थचन्द्रिकायां तृतीयस्याध्यायस्य प्रथमः पादः ॥**

॥ श्रीः ॥
शिवाभ्यां नमः ।
श्रीकण्ठाचार्यकृतौ

ब्रह्ममीमांसाभाष्ये

अथ तृतीयस्याध्यायस्य

द्वितीयः पादः ॥

अथ सन्ध्याधिकरणम् ॥ १ ॥

॥ सू ॥ संध्ये सृष्टिराह हि ॥ १ ॥

पूर्वत्र जीवस्य गत्यागतिनिरूपणं कृतम् । इह तदवस्था विचार्यते । सन्ध्ये

शिवार्कमणिदीपिकायाम्

अथ तृतीयस्याध्यायस्य द्वितीयः पादः ॥

अथ संध्याधिकरणम् ॥ १ ॥

सू–संध्ये सृष्टिराह हि ॥ १ ॥ पादयोस्संगतिमाह–पूर्वत्रेति । पूर्वस्मिन्पादेऽधिकारिणां वैराग्यदृढीकरणाय जीवस्य गत्यागतिनिरूपणं कृतम् । तथा हि–प्रथमे तावदधिकरणे संसारदुःखायतनस्य भूतेन्द्रियसंघातरूपस्य सूक्ष्मदेहस्य विरक्ताधिकारिकश्रवणमननोपासनासाध्यब्रह्मसाक्षात्काररूपतन्निवृत्तिसाधनलाभपर्यन्तमिह परत्र च गतागतयोरप्यनुवृत्तिरस्तीति निरूपितम् । तत्रैव 'भाक्तं वानात्मवित्वा' दिति (ब्र० ३–१–७.) सूत्रेण देवभृत्यभावमवलंब्य तत्प्रयुक्तक्लेशकरंबितस्य स्वर्गभोगानुभवस्य प्रहीणत्वं सातिशयत्वं चाविष्कृतम् । द्वितीये सूक्ष्मदेहस्यापि कारणतया सकलसंसारक्लेशनिदानस्य कर्मबन्धस्य तावत्पर्यंतमनुवृत्तिर्निरूपिता । तत्रैव स्वर्गभोगस्य क्षयिष्णुत्वदोषोऽपि 'कृतात्यय' इति सूत्रभागेन दर्शितः । एवमनेकदोषदुष्टस्यापि स्वर्गभोगस्य जनकं यागादिकमपि प्रतिजन्म यावज्जीवकर्तव्यस्नानसंध्यावंदनादिविहितानुष्ठाननिषिद्धपरिहाररूपबहुविधक्लेशसाध्यस्मार्ताचारसापेक्षत्वादतिदुष्करमिति 'चरणादिति चे'दित्यादिसूत्रैः प्रकटितम् । अनिष्टादिकारिणां तु 'ग्रामं गच्छन्वृक्षमूलमुपसर्पती'तिन्यायेनापि स्वर्गप्राप्तिर्नास्ति । यमसदने रौरवादिषु च भूयान्यातनानुभवः कीटादिजन्मप्राप्तिश्चेति तृतीये वर्णितम् । चतुर्थे तु स्वर्गादवरोहतामाकाशादिभावश्रवणात्तदभिमानिदेवतानामिवाकाशादिशरीरकत्वप्रयुक्तः कियान्दिव्यभोगानुभवोऽस्तीति शङ्कावारणायाकाशादिषु संश्लेषमात्रमिति वर्णितम् । पञ्चमे तेषु चिरमचिरं वावस्थानमित्यनियमनिरासव्याजेन व्रीह्यादिषु सुखभोगरहितमचिरावस्थानं दृढीकृतम् । षष्ठे तेष्ववस्थानं सुखलेशरहितं तदभिमानिजीवात्मना चेत्तलवनपर्यन्तमेव भवेदित्यनतिहेयत्वशङ्कानिरासाय तेषु संश्लेषमात्रमिति प्रदर्श्य स संश्लेषस्तेषां शोषणकुसूलावस्थापनावहननफलीकरणपाकभक्षणादिदशास्वनुवर्तमानः पितृवीर्यात्मना परिणामपर्यन्तः । पुरुषभक्षणविषयत्वमनापन्नेषु व्रीह्यादिषु संश्लिष्टानामनुशयिनां तेषु संश्लेषः तत्तद्व्रीह्यादिपरिणामान्तरपरंपराक्रमेण यथाकथञ्चित्पुरुषभक्षणविषयत्वप्राप्त्यनंतरं तेषां तद्वीर्यात्मना परिणामपर्यन्त इति रेतस्सिक्सूत्रेण संसूच्य पुरुषवीर्यानुप्रवेशेऽपि योषितमप्राप्य तेषां न शरीरलाभः । यद्यदि वीर्यमपरिग्रहाणां वन्ध्यादिषु प्रवृत्तानां वा स्यात् तदा तद्वीर्यपरिणामान्तरक्रमेण पुनरपि पुरुषभक्षणविषयत्वं प्राप्य तद्वीर्यसंसक्त-

स्वप्ने 'न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान्रथयोगान्पथः सृजते' इत्यादिना सृष्टिरभिधीयते । सैषा जीवकृता परमेश्वरकृता वेति संशयः॥

एवं सति जीवकृतेत्यवगम्यते । 'अथ वेशान्ताः पुष्करिण्यः स्रवन्त्यः सृजते स हि कर्ता' इति स्वप्नदृशं जीवमेव कर्तारमाह हि श्रुतिः ॥

तया ऋतुमतीनां योषितां गर्भगोलकप्रवेशानंतरमेव क्वचिज्जन्मनि भोगाश्रयस्य भोगमोक्षसाधनोपयोगिनश्च शरीरस्य लाभ इति 'योनेश्शरीर'मिति (ब्र० ३–१–२७) सूत्रेण संसूचितम्। एवं वैराग्यदृढीकरणाय गतागतनिरूपणेन जीवस्य जागरावस्थाविचारो निष्पन्नः । इह पादे तदवस्थान्तरविचारः क्रियत इत्यर्थः । यद्यपि सांसारिकविषयवैराग्यदृढीकरणानंतरं तद्विलक्षणब्रह्मप्रेप्सादृढीकरणाय ब्रह्मणो महिमात्र पादे वर्ण्यते तथापि जीवावस्थाविशेषाश्रयणोपक्रममिह तन्महिमनिरूपणं स्वप्नाद्यवस्थास्वपि प्रजापतिविद्योक्तदोषाविष्करणेन ततोऽपि वैराग्यस्यातिदृढीकरणमानुषंगिकं प्रयोजनान्तरं लंभयितुमिति पूर्वपादसंगतिप्रदर्शनार्थमेवमुक्तिः । सूत्रगतं संध्यशब्दं विषयवाक्यगततत्रशब्दं च विवृण्वन्नेव विषयवाक्यमुदाहृत्य संशयं दर्शयति–संध्ये स्वप्न इति ॥ जागरसुषुप्त्योः सन्धौ भवनं सन्ध्यशब्दप्रवृत्तिनिमित्तम् । तेन जागरावस्थाविचारानंतरं प्रथमं स्वप्नावस्थाविचारेऽपि संगतिर्लब्धा 'स हि कर्त्ते'त्यस्य प्रकृतजीवपरामर्शकत्वसंभवासंभवाभ्यां संशयः । पुष्करिण्यः स्रवन्त्य इति द्वितीयार्थे प्रथमा । स्वप्नदृशं जीवमेवेति । अत्रायमाशयः । सन्ध्यं तृतीयं स्वप्नस्थानं तस्मिन्संध्ये स्थाने तिष्ठन्निति जीवं प्रकृत्य 'उभयान्पाप्मन आनंदांश्च पश्यती'ति स स्वप्नद्रष्टृत्वेन निरूपितः । स एव 'स हि कर्त्ते'त्य'त्र तच्छब्देन परामृश्यते । स प्रकृतो जीवो यस्मात्कर्ता भवितुमर्हति प्रजापतिवाक्योदितसत्यसंकल्पादिमत्त्वात् अतस्स सृजतीति युक्तमिति वाक्यार्थः । अन्यथा 'सृजत' इत्यस्य 'कर्ते'त्यस्य चैकार्थ्ये हेतुहेतुमद्भावानुपपत्तेः । न च सत्यसंकल्पत्वादिसद्भावे जागरेऽपि तस्य रथादिस्रष्टृत्वं स्यादिति वाच्यम् । जागरदशायां तिरोभूतस्य तस्य मुक्ताविव स्वप्नेऽप्याविर्भावसंभवात् । न चैतदयुक्तम्। पूर्वं पश्चाच्चासतां रथानां रथान्युंजानानामश्वानां रथगमनोचितानां राजपथानां च स्वप्नकालमात्रे भवनवत्सत्यसंकल्पत्वस्यापि तत्कालवृत्तित्वोपपत्तेः। एवं जीवस्य स्वप्नस्रष्टृत्वोपपादनाय स्वप्नकालमात्रे सत्यसंकल्पत्वाद्याविर्भावं 'स हि कर्त्ते' त्यनेन विवक्षितं दृष्टान्तमुखेन युक्ततां नेतुमेव 'न तत्र रथा'इत्यादिकमुक्तम् । तेन हि रथाद्यभावो न स्वप्ने प्रतिपाद्यते । 'सृजत' इति स्वोक्तिविरोधात् । न हि यस्मिन्काले यस्य सृष्टिः प्रतिपादयिषिता तस्मिन्नेव काले तदभावोऽपि प्रतिपादयितुं शक्यते । अतः पूर्वं पश्चाच्च तदभावस्यायमुपन्यास इति वक्तव्यम् । स्वप्नरथादिदर्शनदेशे पूर्वापरकालयोस्तदभावश्च लोकानुभवसिद्धत्वान्न शास्त्रेण प्रतिपादनीयः । अतस्तद्वैयर्थ्यपरिहाराय पूर्वापरकालयोरसतां रथादीनां स्वप्नकालमात्रे भवनवत्स्वप्नदृशस्तत्सृष्टावुपयुक्तस्य सत्यसंकल्पत्वस्य तत्कालमात्र एवाविर्भवनमपि युक्तमिति दृष्टान्तप्रदर्शनार्थत्वमेव तस्य वक्तव्यम् । अपि च। प्राकृतदेहयोगादिर्जीवस्य सत्यसंकल्पत्वादेस्तिरोधायकः न तु परमेश्वरः । मुक्तावपि तत्तिरोधानप्रसंगात्। न च स्वप्नदशायां तद्योगोऽस्ति । तस्मिन्मृतकल्पे शयाने स्वप्नव्यवहारात्तस्य

---

(१) 'तत्कालमात्र एवाविर्भवनोपपत्तेः' इति ख पाठः।

॥ सू ॥ निर्मातारं चैके पुत्रादयश्च ॥ २ ।.

'य एष सुप्तेषु जागर्ति कामंकामं पुरुषो निर्मिमाणः' इति जीवमेव स्वप्ने कामानां निर्मातारमेके शाखिनोऽधीयते । तत्र कामशब्दनिर्दिष्टाः काम्यमानाः पुत्रादयः, पूर्वत्र 'सर्वान् कामान् छन्दतः प्रार्थयस्व' इत्युक्त्वा 'शतायुषः पुत्रपौत्रान् वृणीष्व' इति विवृतत्वात् । ततश्च जीवकृतैव स्वप्नसृष्टिः ॥

इति प्राप्तेऽभिधीयते–

व्यवहारानुपयोगित्वमभावश्चेत्युभयं समानम् । अत एव सूत्रकारो वक्ष्यति 'तन्वभावे संध्यवदुपपत्ते'रिति (ब्र० ४–४–१३) न चैवं सति प्रबुद्धस्य रथादीनद्राक्षमिति परामर्शवद्रथादीनद्राक्षमित्यपि परामर्शः स्यादिति वाच्यम् । स्वप्नेऽपि चिरातीतपितृपितामहादीन्पश्यतां प्राक्तदतीतत्वनिश्चयवतामपि तदानीं तदतीतत्वाननुसंधानवत् स्वप्ने स्वगतस्वाप्नरथादिस्रष्टृत्वनिश्चयवतामपि प्रबोधानंतरं तदननुसंधानोपपत्तेः । इयांस्तु विशेषः। पित्राद्यतीतत्वानुभव[1]जन्मदृढसंस्कारानुवृत्तौ प्रबोधानंतरानुसंधानोपयोगिन्यां सत्यामेव स्वप्नकाले तदनुद्बोधेनावस्थाविशेषमहिमप्रयुक्तेन तदननुसंधानमुपपादनीयम्। स्वप्नदशायां जातस्य स्वकीयस्वप्नार्थस्रष्टृत्वानुभवस्य शैशवावस्थोत्पन्नानुभवबृंदस्येव संस्कारानाधायकतयैतदनुसंधानमुपपादयितुं शक्यम् । न च तथा सति शैशवकृतस्येव स्वाप्नस्यापि व्यवहारस्य कार्त्स्न्येनाननुसंधानं स्यादिति वाच्यम् । पूर्वजन्मव्यवहारान्तराननुसन्धानेऽपि गोमर्कटमार्जारादिजन्मसु तत्तज्जात्युचितप्राचीनतत्तज्जन्माभ्यस्तव्यवहारानुसंधानवद्व्यवस्थोपपत्तेः । न च जीवस्य स्वाप्नार्थस्रष्टृत्वे शुभसूचकानेव सृष्ट्वा स पश्येत् न त्वशुभसूचकानिति वाच्यम् । तदानीं स्वप्नत्वस्याशुभसूचकत्वस्य चाननुसंधानेन तत्सृष्ट्युपपत्तेः । स्वप्ने स्वयं क्रियमाणतैलपानतैलकटाहावगाहनबिसबक्षणमध्वशनैकपुण्डरीकधारणकृष्णधेनुकालनादिष्वेवमेव सिद्धान्तेऽप्युपपादनीयत्वात् । तस्माद्यथाश्रुति जीव एव स्वाप्नपदार्थानां स्रष्टा । श्रुतनिर्वाहार्थमश्रुतसत्यसंकल्पाविर्भावकल्पनोपपत्तेः॥ ननु 'य एष सुप्तेष्वि'ति कठवल्लीमन्त्रे परमेश्वरस्तेषां स्रष्टा प्रतिपाद्यते । तस्यैव हि तत्र प्रकरण'मन्यत्र धर्मा'दिति । अतस्तदैकार्थ्यात् 'स हि कर्त्ते'त्येतदपि तद्विषयं स्यात् । तस्य प्रकृतत्वाभावेऽपि 'तदेते श्लोका भवन्ती'ति प्रक्रान्ते तदनन्तरश्लोके स्वप्नेन शारीरमभिप्रहत्यासुप्तस्सुप्तानभिचाकशीती'ति वर्णयिष्यमाणत्वात् । तत्र हि शारीरस्य जीवस्य स्वप्नावस्थाप्रदानेनाभिप्रहन्ता परमेश्वर एवेति शङ्कानिराकरणार्थं सूत्रम्–सू ॥ निर्मातारं चैके पुत्रादयश्च ॥ २ ॥ चकारोऽवधारणार्थ इत्यभिप्रेत्य व्याचष्टे–जीवमेवेति । ननु कामशब्द इच्छार्थः परमेश्वरेऽपि सङ्गच्छते इत्याशङ्कानिराकरणाय 'पुत्रादयश्चे'ति सूत्रशेषं व्याचष्टे–तत्रेति । द्वितीयचकारोऽप्यवधारणार्थः इच्छार्थत्वव्यवच्छेदार्थः । अत्र प्रकरणे कामशब्दस्य पुत्रादिषु प्रयुक्तत्वादिहापि मन्त्रे तस्य तादर्थ्यमवसीयते । अतः पुत्रादिसंबंधलिङ्गं परमेश्वरप्रकरणाद्बलवत् । नचात्यंतं जीवस्याप्रस्तुतत्वम् । 'हन्त तदिदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम् । यथा च मरणं प्राप्य आत्मा भवति गौतम । योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः । स्थाणुमन्येऽनुसंयंति यथाकर्म यथाश्रुत' मित्यव्यवहितमन्त्रप्रस्तुतत्वा-

---

(१) ' अन्यसंस्कारानुवृत्तौ' इति ख—पाठः ।

॥ सू ॥ मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ ३ ॥

स्वप्ने यद्रथादि सृष्टमर्थजातं तदिदं मायामात्रमीश्वरकृतं, न जीवकृतम्। स्वप्नदृशैकेनानुभाव्यं तत्कालमात्रावसायीति आश्चर्यरूपतया मायामात्रमित्युक्तम्। जीवस्य सत्यसंकल्पत्वादिकं तिरोहितमिति तस्य रथादिसृष्टिसामर्थ्यं न संभवति। अतः 'पुरुषो निर्मिमाणः' इति न जीवविषयम्। किं तु,

---

दिति भावः ॥ सू० ॥ मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ ३ ॥ मायामात्रमित्यनेन विवक्षितं साध्यं दर्शयति–ईश्वरकृतमिति। तुशब्दार्थमाह–न जीवकृतमिति। ईश्वरकृतत्वे साध्ये पर्यवसानमुपपादयितुं मायामात्रमित्यस्य साक्षादर्थमाह–आश्चर्यरूपेति। माया इन्द्रजालादिकं तत्सादृश्यादिह मायाशब्दः। आश्चर्यरूपत्वं तत्सादृश्यम्। मात्रशब्दोऽवधारणार्थः। तथा च स्वाप्नमर्थजातं सर्वमाश्चर्यरूपमेव। न तत्रानाश्चर्यरूपं किमप्यस्तीति भावः। आश्चर्यरूपत्वमुपपादयति–स्वप्नदृशेति। स्वप्नदृक् यस्मिन्देशे रथं यदा पश्यति तदानीं तत्र स्थितोऽन्यस्तन्न पश्यतीति स्वप्नदृगपि प्रबोधानन्तरं तत्र गतस्तन्न पश्यति नै वा तस्यान्यत्र नयनचिह्नानि नेमिपदानि तत्रैव नाशचिह्नानि तदवयवविशरणादीनि वा पश्यति। केवलमैंद्रजालिकेन यो मोहितस्स एव यथा समुद्रादिकं पश्यति सोऽपि मोहापाये तन्न पश्यति न वान्यत्र जलनिस्सरणचिह्नं तत्रैव शोषचिह्नं वार्द्रतादिकं पश्यति। ततश्च यथैवमाश्चर्यभूतसमुद्रादिद्रष्टुरन्यस्तथाभूतसमुद्रादिसंपादयितैंद्रजालिकस्तथैवाश्चर्यस्वाप्नपदार्थद्रष्टुस्तथाभूतस्य तस्य स्रष्टान्यः स्वीकरणीयः। स च परमेश्वरादन्यो न संभवतीत्येवं मायामात्रशब्दस्य परमेश्वरकर्तृकत्वे साध्ये पर्यवसानमित्यर्थः। ननु यथैंद्रजालिको मन्त्रौषधादिबलात्तथाभूतमर्थजातं सृजति दर्शयति वा एवं स्वप्नदृगेव प्रजापतिवाक्यप्रतिपन्नसत्यसङ्कल्पत्वबलात्स्वाप्नपदार्थजातं सृजत्वित्याशङ्कानिराकरणाय प्रवृत्त 'मनभिव्यक्तस्वरूपत्वा'दिति सौत्रं हेतुं व्याचष्टे–जीवस्येति। 'उत्तराच्चेदाविर्भूतस्वरूपस्त्वि'त्यत्र तत्तिरोधानं समर्थितमिति भावः। ननु स्वप्नदशामात्रे सत्यसङ्कल्पत्वाभिव्यक्तिर्भवत्विति शङ्कानिराकरणाय 'कार्त्स्न्येने'ति विशेषणम्। संसारकालत्वावच्छेदेनैव तत्तिरोहितम्। तिरोधायकसत्त्वाविशेषादिति भावः। ननु 'स हि कर्ते'ति श्रवणात्तन्निर्वाहाय स्वप्नावस्थामात्रे सत्यसङ्कल्पत्वाभिव्यक्तिः कल्प्येत्याशंक्य तस्याः परमेश्वरविषयत्वमुपपादयितुमाह–अत इति। 'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाण'-इत्येतदनंतरं 'तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते। तस्मिंल्लोकाः श्रितास्सर्वे तदु नात्येति कश्चने'ति श्रूयते। अत्र यच्छब्दप्रतिनिर्देशकस्य तच्छब्दस्य ब्रह्मशब्दसामानाधिकरण्यरूपाद्वाक्यप्रमाणात् यच्छब्दप्रतिनिर्दिष्टे सर्वलोकाश्रयत्वसर्वोत्तरत्वरूपलिङ्गदर्शनाच्च कठवल्ल्युक्तस्वप्नस्रष्टा परमेश्वर इत्यवसीयते। उदाहृतलिंगवाक्यापेक्षया कामशब्दस्य पुत्रादिपरत्वं कल्पयित्वा क्लिष्टगत्या समर्थनीयस्य पुत्रादिसंबंधलिंगस्य दुर्बलत्वात्। अतः 'कामंकाममि'ति शब्दो णमुलन्ततया संकल्प्यसंकल्प्येत्येवमर्थतया योजनीयः। ततश्च 'स हि कर्ते'त्येतदपि परमेश्वरविषयम्। तदैकार्थ्यात् 'स्वप्ने न शारीर'मित्यनंतरमन्त्रे तत्सङ्कीर्तनाच्च। तस्यापि मन्त्रस्य 'असुप्तस्सुप्तानभिचाकशीती'त्युदाहृतकठवल्लीमन्त्रैकार्थ्यादिति भावः। एवञ्च यद्यपि परमेश्वरस्य स्वाप्नरथादिस्रष्टृत्वप्रतिपादने तदुपपादकहेत्वपेक्षा नास्ति, तस्य सर्व-

'तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ।
तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन ॥'

इति वाक्यशेषादीश्वरविषयम् । तदैकार्थ्यात् 'स हि कर्ता' इत्यपि तद्विषयमेव । अतः परमेश्वरकृता स्वप्नसृष्टिरिति ॥

जीवस्वरूपानभिव्यक्तिहेतुमाह—

॥सू॥ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ४ ॥

जीवस्यानाद्यपचारप्रवाहेण पराभिध्यानात् परमेश्वरसंकल्पात् तस्य सत्यसंकल्पत्वादिकं तिरोहितम् । तदपचारतदनुवृत्तिकृतात् तस्मादेव परमेश्वरसंकल्पादस्य बन्धमोक्षौ भवतः । तथाहि श्रुतिः—'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति । यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति' इति ॥

शक्तिमत्त्वेन सर्वस्रष्टृत्वेन च प्रसिद्धत्वात् । तथापि तस्यैव प्रसिद्धस्य हेतोरयमनुवादरूपो हेतुवन्निगदार्थवादः । यतः स्वप्नकालमात्रे भवन्तः स्वाप्नरथादयोऽत्याश्चर्यभूताः । आश्चर्याणाञ्च कर्ता परमेश्वरः प्रसिद्धः । अतः स तान्सृजतीत्येतदुचितमिति । स्यादेतत् । 'स हि कर्ते'त्येतदनंतरश्लोको न परमेश्वरविषयः । 'प्राणेन रक्षन्नवरं कुलायं बहिष्कुलायादवरश्चरित्वा । स ईयते अमृतो यत्र कामं हिरण्मयः पुरुष एकहंसः' इति तदनन्तरश्लोकस्य 'स' इति तेन श्लोकेनोक्तं परामृशतो जीवविषयत्वात् । तस्यापि श्लोकस्य 'शुक्रमादाय पुनरेति स्थानं हिरण्मयः पुरुष एकहंसः' इत्युत्तरार्धे शुक्रं प्रकाशकं चक्षुरादीन्द्रियजातं गृहीत्वा पुनर्जागरस्थानप्राप्तिरूपस्य जीवलिंगस्य दर्शनात् जीवपरतदनंतरश्लोकचतुर्थपादप्रत्यभिज्ञानाच्च । तत्र ह्येकहंसशब्दः एक एव हंति गच्छति इह परत्र च संचरतीति व्युत्पत्त्या जीवपरः । एवं च 'स हि कर्ते' त्यस्य कथञ्चिदपि प्रस्तावरहिते परमेश्वरे योजयितुमशक्यत्वात्पूर्वापरमन्त्रसन्दर्भगोचरजीवविषयत्वमेव वक्तव्यम् । श्रुतनिर्वाहार्थं जीवस्य स्वप्नावस्थायां सत्यसङ्कल्पत्वाभिव्यक्तिरपि कल्पनीया । न च तिरोधायकानुवृत्तावभिव्यक्तिकल्पना बाधितेति वाच्यम् । प्राकृतस्थूलदेह एव तिरोधायक इति कल्पनोपपत्तेः । तस्य च स्वप्नदशायां व्यवहारानुपयोगिनोऽसत्कल्पत्वादिति शङ्कानिराकरणार्थं सूत्रम्—पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ४ ॥ यदेति । यदा खल्वेष जीव एतस्मिन्प्रकृते आनन्दमयरूपे ब्रह्मणि अरं छिद्रमपचारं तदाज्ञारूपविधिनिषेधातिक्रमम् । अन्तरं सत्यसङ्कल्पत्वादिस्वरूपतिरोधानकरम् । अन्तरशब्दादन्तर्धानवाचिनस्तत्करोतिण्यन्तात्पचाद्यच्यन्तरमिति रूपम् । एवंभूतमपचारं उत्कुरुते अथ तस्य संसारभयं भवति । यदा त्वेष एतस्मिन्नदृश्ये प्रत्यक्षागम्ये अनात्म्ये आत्मसंबंधिलिंगरहिते अनुमानागम्ये अनिरुक्ते शब्देनापि इदन्तया परिच्छेत्तुमशक्ये अनिलयने स्वयमाश्रयरहिते अभयं सकललौकिकभयपरित्यागपूर्वकं प्रतिष्ठां शरणागतिं विंदते अथ सोऽभयं संसारभयनिवृत्तिं प्राप्नोतीत्यर्थः । एवं चानाद्यपचारप्रवाहे स्वरूपतिरोधायकेऽनुवर्तमाने स्वप्नदशायां तदभिव्यक्तिकल्पनमयुक्तमिति 'स हि कर्ते'त्येतदपि यथाकथञ्चित्परमेश्वरविषयतया योजनीयम् । अथ तथा योजयितुं न शक्यते । पूर्वापरसंदर्भयोः

॥सू॥ देहयोगाद्वा सोऽपि ॥ ५ ॥

जीवस्य स्वरूपतिरोधानभावोऽपि देवमनुष्यादिदेहाकाराचियोगाद्भवति सृष्टिसमये, प्रलये पुनर्नामरूपविभागानर्हसूक्ष्माकाराचियोगादित्येवं तस्य तिरोहितसत्यसंकल्पत्वादिकस्य तात्कालिकविचित्रसृष्टिसामर्थ्यं स्वप्ने न संभवति॥

उपपत्त्यन्तरमाह—

॥ सू ॥ सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ६ ॥

'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति ।
समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने ॥'

'अथ स्वप्नाः पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति' इत्यादिश्रुतेः परमेश्वरप्रस्तावाभावात् 'स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिती'ति पूर्वसंदर्भे 'स्वप्नांत उच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि । उतेव स्त्रीभिस्सह मोदमानो जक्षदुतेवापि भयानि पश्य'न्नित्युत्तरसन्दर्भे च जीवस्य स्वाप्नपदार्थजातस्रष्टृत्वप्रतिपादनाच्चेत्युच्येत तदा 'सृजत' इत्येतदपि तस्यैव स्वाप्नरथादिस्रष्टृत्वप्रतिपादनपरम् । तस्य तिरोहितसत्यसङ्कल्पत्वादिकस्य तत्स्रष्टृत्वं कथमित्याकांक्षायामदृष्टद्वारेति तदुपपादयितुं स ह्यदृष्टजनककर्मणां कर्तेत्येवमर्थपरं 'स हि कर्ते'ति वाक्यमिति योजनीयम् । सर्वथा तद्वाक्यं तिरोहितशक्तिकस्य जीवस्य सङ्कल्पपूर्वकं स्वाप्नरथादिस्रष्टृत्वप्रतिपादकं न भवतीति भावः । ननु मुक्तौ प्राकृतदेहवियोगे सति स्वरूपाभिव्यक्तिरिष्यते, अतस्तद्योगस्तस्य तिरोधायक एष्टव्य इति तदभावात्स्वप्ने स्वरूपाभिव्यक्तिः स्यादित्याशंक्य स परमेश्वरसङ्कल्पद्वारतया तिरोधायको न साक्षादिति प्रतिपादनार्थं सूत्रम्—देहयोगाद्वा सोऽपि ॥ ५ ॥ सोऽपि परमेश्वरसङ्कल्पकृतस्तिरोभावो देहयोगात् देहयोगं द्वारमपेक्ष्येति सूत्रार्थः । तर्हि द्वाराभावात्परमेश्वरसङ्कल्पो न स्वरूपतिरोधायक इत्याशङ्कानिराकरणाय वाशब्दश्चार्थः अचित्प्रकृतेरपि तिरोधायकत्वसंग्राहकः । सा प्रलय इव स्वप्नेऽपि तिरोधायिका भविष्यतीति दर्शयितुं प्रलये तस्याः स्थूलदेहनिरपेक्षायास्तिरोधायकत्वं सम्प्रतिपन्नमित्युदाहरति—प्रलये पुनरिति । आणवमलशक्तेस्सांसारिकत्वरूपपुरुषत्वापादकतया 'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्य'मिति श्रुतौ पुरुषशब्देन प्रसिद्धायास्तिरोधायकत्वं भाष्ये तत्र तत्र प्रागाविष्कृतम् । तस्या अपि संग्राहकोऽयं वाशब्दो द्रष्टव्यः । ननु 'सृजत'इतिं स्वातन्त्र्यप्रतिपादकाख्यातस्वारस्यात् जीवस्य संकल्पपूर्वकमेव स्वाप्नरथादिस्रष्टृत्वमस्तु तदर्थं द्वारभूतेषु तिरोधायकेषु सत्स्वपि परमेश्वरस्यैव संकल्पविशेषवशात् स्वप्नदशामात्रे सत्यसंकल्पत्वाभिव्यक्तिः कल्प्यतां यथा निधितिरोधायकेषु भूतलादिषु सत्स्वपि 'दिशां व्रतं दशानुगानाम् एतेन कल्पेन चत्वारि वर्षाणि प्रयुञ्जीत निधयोऽस्य प्रकाशन्ते'इत्यादिश्रुतिविहितमन्त्राद्यनुष्ठानप्रसादितपरमेश्वरसंकल्पविशेषबलान्निध्यभिव्यक्तिरिति शङ्कानिराकरणार्थं सूत्रम्—सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ६ ॥ चकारेण स्वप्नस्य तात्कालिकशुभाशुभकारकत्वं समुच्चीयते । तदपि भाष्योदाहृतश्रुतावेवाम्नातम् । स एनं हन्तीति । आदिशब्देन 'वराह एनं हंति, 'मर्कट एनमास्कंदयति' इत्यादिवाक्यान्तराणि गृह्यन्ते । स्वप्ने वराहवानर-

चोराग्निसर्पपिशाचराक्षसादयः स्वात्मानमभिभवन्तो महद्भयं दुःखं च जनयन्तो दृश्यन्ते। तेषामशुभसूचकत्वस्याननुसंधानेऽपि तत्कारकत्वस्यानुसंधानसत्त्वात् जीवकर्तृत्वे तेषां सृष्टिर्न स्यादिति भावः। अत्रेदं विचारणीयम्। यत्र देशे स्वप्नद्रष्टा रथादीन्पश्यति तत्र स्वयं गत्वा पश्यति उतापवरके शयान एवेति। यांश्च पश्यति ते सत्या मिथ्याभूता वेति च। केचिदाहुः–तत्तद्देशं गत्वा सत्यानेव रथादीन्पश्यतीति। अत्रेयं शङ्कावतरति। काश्यां रात्रावर्गलितेऽपवरके शयितः स्वप्ने स्वशरीरेणैवोत्तरां दिशं प्रस्थितं मुहूर्तमात्रेण कांचीं प्राप्य तत्र वस्तुतो रथादिमत्सु प्रदेशेषु रथादीन्पश्यंतमन्यत्र गजादिमत्सु प्रदेशेषु तान्पश्यंतं तस्यामेव बहुतिथं कालमतिवाहयन्तमात्मानमनुभवन्नेव यथापूर्वमर्गलितापवरकशयितेन स्वशरीरेण शयनानंतरं मुहूर्तमात्रेण प्रतिबुध्यत इति तावत्सर्वलोकसिद्धम्। कथमस्य देशांतरगमनोपपत्तिः कथञ्च देशकालवस्तुविपर्यासे सत्यपि स्वाप्नरथादीनां सत्यत्वोपपत्तिरिति। अत्रेत्थं परिहारमाहुः–शयितेन शरीरेण न स्वप्नानुभवः किं तु यथानुभवं तत्सदृशेन विसदृशेन वा शरीरान्तरेण काश्यादितो निर्गत्य कांच्यादिकं गत्वा तदनुभवः। 'प्राणेन रक्षन्नवरं कुलायं बहिष्कुलायादवरश्चरित्वे'तिश्रुतेः। तथा च तपोबलसृष्टैश्शरीरांतरैस्सौभरेरिव परमेश्वरसृष्टेन शरीरान्तरेण स्वप्नदृशो बहिर्व्यापार उपपद्यते। न च तस्य निर्गमने कवाटोद्घाटनापेक्षा। नापि तस्य योजनशतप्राप्यदेशप्राप्तौ बहुकालापेक्षा। तस्याश्चर्यरूपस्य प्रसिद्धशरीरविलक्षणत्वात् देशकालविपर्यासश्च घटते। स्वप्न ईश्वरसृष्टैस्तदेकानुभाव्यैरादित्यगत्याद्युपाधिविशेषैरवच्छिन्नानां दिक्कालानां तत्तत्स्वप्नद्रष्टृपुरुषापेक्षया व्यवस्थोपपत्तेः। मार्गगतानां प्राप्यदेशगतानां च जागरावस्थानुभाव्यानां वस्तुविशेषाणामुपलंभाभावश्च युज्यते। स्वप्नसृष्टशरीरगतानां चक्षुरादीनां स्वप्नार्थमात्रग्रहणयोग्यत्वात्। गजादिमत्सु देशेषु रथाद्युपलंभश्चोपपद्यते। स्वप्नार्थानां जागरितार्थानां च जलालोकपवनन्यायेन मूर्तत्वेऽपि मिथः प्रतिघातकत्वाभावकल्पनोपपत्तेः। आलोको ह्यगाधस्वच्छजलपरिपूर्णे सरसि जलेनाप्रतिहन्यमान एवान्तः प्रविश्य तलस्थितानुपलादीन्प्रकाशयति। आलोकपूर्णे च नभसि पवनो वाति। मुहूर्ताभ्यन्तरेण बहुरात्रातिवाहनं च संगच्छते। देवादिकालोपाधिभ्यो मनुष्यादिकालोपाधीनामिव जाग्रत्कालोपाधिभ्यः स्वाप्नकालोपाधीनां सूक्ष्मत्वतारतम्यकल्पनोपपत्तेरिति। अन्ये त्वाहुः–स्वप्नदृष्टा घटादयः परमेश्वरसृष्टाः पदार्थास्सत्या एव न तु बाह्या मृदाद्युपादाना वा। बहिर्देशे प्रागूर्ध्वंच मृत्पिण्डकपालादिपूर्वोत्तरावस्थयोरनुपलंभात्। किंत्वान्तरा वासनामयाश्च। वासनानामतींद्रियत्वादन्तरपि प्रागूर्ध्वावस्थयोरनुपलम्भः। ते च मनसैव ग्राह्याः। चक्षुरादीनामुपरतत्वात्। तेषु बाह्यत्वमृण्मयत्वचाक्षुषत्वाद्यभिमानस्तु भ्रमरूप इति। अपरे त्वाहुः–प्रतिभासमात्रशरीरास्ते न तु पारमार्थिकाः। प्रबोधानंतरं बाध्यमानत्वात्। 'आरुक्षमिव शैलाग्रमाविक्षमिव कानन'मित्यादिरूपेण तन्मिथ्यात्वव्यवहाराच्च, 'उतेव स्त्रीभिस्सह मोदमानो जक्षदुतेवापि भयानि पश्यन्' इति श्रुतावपि लोकानुभवसिद्धतन्मिथ्यात्वानुवादाच्च। 'अथ रथा'नित्यादौ तत्सृष्टश्रुतिस्तु भाक्तया व्याख्येया। अन्यथा प्रधानप्रकरणार्थविरोधापत्तेः। आत्मनः स्वयं ज्योतिष्ट्वं प्रतिपादयितुं प्रवृत्ते हि प्रकरणे जाग्रदवस्थायामादित्यादिज्योतिर्व्यतिकरात्तद्दुर्विवेचमिति तद्विवेचनार्थं स्वप्नावस्थावतारिता।

तत्र यदि सृष्टिः प्रतिपाद्येत तदा तत्रापि तद्वैविध्यं स्यात् । आदित्यचंद्राग्नियावत्प्रतिभासस्य तदानीमपि सत्त्वात् । अतः प्रधानप्रतिपाद्यविरोधात् स्वर्गार्थे ज्योतिष्टोमप्रकरण तदंगविध्यर्थवादस्य 'को हि तद्वेद यद्यमुष्मिँल्लोकेऽस्ति वा न वेती'ति वाक्यस्येव स्वाप्नसृष्टिवचनस्य न स्वार्थे तात्पर्यम् । किंत्वर्थप्रतिभाससत्त्वमात्रेण तदौपचारिकं यथा 'चन्द्रमा इवादित्यो दृश्यते न रश्मयः प्रादुर्भवन्ति लोहिनी द्यौर्भवति यथा मंजिष्ठे'ति द्युलौहित्यभवनवचनम् । न हि दिवो लौहित्यं सत्वेनासञ्चारिष्टेन दृश्यमानं तात्त्विकं किंतु भ्रांतिकल्पितमेव । अत एव तत्र प्रकरणे 'यत्र छिद्र इवादित्यो दृश्यते यत्र नील इवाग्निर्दृश्यते यथा मयूरग्रीवां महामेघं वा मरिचिमिव पश्येत् यत्र भूमिं ज्वलंतीमिव पश्ये'दिति तत्रतत्रापारमार्थिकत्वद्योतका इवशब्दाः। इहापि 'न तत्र रथा न रथयोगा न पंथानो भवंती'त्युपक्रमेणैव सृष्टिवचनस्यापारमार्थिकविषयत्वं द्योतितम् । 'न तत्र रथा' इत्यादेः स्वाप्नरथाद्यपारमार्थिकत्वे न तात्पर्यं तस्य लोकसिद्धत्वादिति चेन्न । लोकसिद्धस्यैव स्वाप्नरथादिमिथ्यात्वस्य स्वयं ज्योतिष्ट्वविवेचनोपयोगित्वेनानुवादोपपत्तेः । तस्मान्मनोराज्यविषयार्थजातवत् पैत्त्यप्रकोपासञ्चारिष्टादिदशोद्भूतचित्तविभ्रमविषयवच्च स्वप्नार्थजातमपि प्रातिभासिकमबाह्यमचक्षुरादिवेद्यञ्च । न हि मनोराज्यादिदशायामपि जीवस्य शरीरं हित्वा बहिर्निर्गमनं तद्विषयार्थजातसृष्टिश्चांगीक्रियते । न वा तत्र वस्तुतश्चक्षुरादिप्रवृत्तिरस्ति । आद्यन्तयोर्व्यभिचारदर्शनञ्च मनोराज्याद्यपेक्षया विशेषः । स्वप्ने हि रथोऽयमित्यनुभूयमान एव मनुष्यः सम्पद्यते । मनुष्योऽयमित्यनुभूयमान एव वृक्षस्संपद्यते । एवं च बहिष्कुलायश्रुतिरपि बहिरिव कुलायादित्येवं भाक्ततया व्याख्येया । अत एव 'स यत्रैतत्स्वप्नयाचरति' इत्युपक्रम्य स्वे शरीरे यथाकामं परिवर्तेत इति श्रुत्यंतरं 'नेत्रस्थं जाग्रतं विद्यात् कण्ठे स्वप्नं समादिशेत् । सुषुप्तं हृदयस्थं तु तुरीयं मूर्धनि स्थित' मित्यादीनि श्रुत्यंतराणि च एकस्मिन्नेव शरीरेऽवस्थाभेदेन जीवस्य स्थानभेदं दर्शयन्ति । तस्माद्यथापूर्वं स्वशरीरे स्थितस्यैव मनोराज्यादिविभ्रमवत् स्वप्नविभ्रम इति । आचार्याणां तु नैतेषु पक्षेषु क्वचित्पक्षविशेषेऽभिनिवेशः। किं तु मनोराज्यादिव्यवहार इव स्वप्नव्यवहारो न जीवसङ्कल्पकृतः,किं तु परमेश्वरसङ्कल्पमात्राधीनः इत्येतावन्मात्रेऽभिनिवेशः।तस्यैव सूत्रार्थत्वात्। अतोऽत्र पक्षविशेषो न चिन्तितः। ननु'स्वप्नदृशैकेनानुभाव्यं तत्कालमात्रावसायीत्याश्चर्यतया मायामात्र'मित्युक्तं भाष्ये। तेन प्रथमपक्षोऽभिमत इत्युन्नीयते।स्वप्नरथादीनां बाह्यत्वे खल्वन्येषामपि दर्शनप्रसक्तौ स्वप्नदृशैकेनानुभाव्यत्वमाश्चर्यं भवेदिति चेदुच्यते । स्वाप्नरथादीनां सत्यत्वे तेषां स्वप्नदृगेकानुभाव्यत्वमेव तावदसिद्धम् । स्वप्नदृशेव स्वप्नदृष्टमनुष्यादिभिरपि तेषां निरीक्ष्यमाणत्वात् । न च स्वप्नदृष्टाश्चेतना असत्या रथादय एव तु सत्या इत्यर्धजरतीयेऽस्ति प्रमाणम् । तेषामाश्चर्यरूपत्वमप्यसिद्धम्। जाग्रत्पदार्थानामपि स्वप्नदृगननुभाव्यत्वेनाविशेषात् । न हि यत्र देशे स्वप्नदृग्रथादीन्पश्यति तत्र तदा जाग्रद्भिस्ते नानुभूयन्ते । न च स्वप्नार्थानां जाग्रत्स्वस्वकार्याजनकत्वमाश्चर्यरूपत्वम्। जाग्रदर्थानामपि स्वप्नदृक्षु तज्जनकत्वाभावस्याविशेषात् । यथा हि क्वचिद्देशे स्वप्नदृशा दृश्यमानाः दावदहनचण्डवायुनदीप्रवाहादयः तत्र तेषु जाग्रत्सु दाहादिकार्यं न जनयन्ति तथा ततोऽन्यस्मिन्देशे वस्तुतो दावदहनादिमत्येव सौधवनितादिभिर्मोदमानेषु स्वप्नदृक्षु तत्त जनयन्त्येव । न च यथा-

शुभाशुभसूचकश्च हि स्वप्नः । स्वप्नाध्यायविदश्च शुभाशुभसूचकान् स्वप्नविशेषानाचक्षते । अतो न जीवसृष्टाः स्वप्नार्थाः, जीवसृष्टत्वे तदशुभसूचकानां

न्यजाग्रद्दर्शनयोग्या जाग्रदर्था न तथान्यस्वप्नदृग्दर्शनयोग्याः स्वप्नार्था इतीदं तद्वैलक्षण्यमाश्चर्यरूपत्वं स्यादिति शंक्यम् । बहूनां स्वप्नसंवादे तथाभावस्यापि संभवात् । न चैकस्मिन्देशे कश्चिद्रथं पश्यत्यन्यो गजमपरोऽश्वमित्येवं पुरुषभेदेन व्यवस्थिततया दृश्यमानत्वमाश्चर्यरूपत्वम् । जाग्रद्दशायामप्येकत्र चैत्रे सति संततानां तद्देशकालावच्छेदानुभवितृभिरेव पुरुषैर्व्यवस्थया दृश्यमानत्वात् । न च वस्तुतो रथादिमति प्रदेशे तदप्रतिघातेन स्वाप्नगजादीनामवस्थानमाश्चर्यरूपत्वम् । तेषामपि रथादीनां स्वाप्नगजाद्यविरोधेनावस्थानस्याविशिष्टत्वात् । न च मनुष्यत्वेनानुभूयमानस्य तदानीमेव मर्कटमार्जारादिरूपेण दृश्यमानत्वमाश्चर्यरूपत्वम् । एकस्मिन्नेव वस्तुनि क्रमेण सत्यस्य मनुष्यत्वमर्कटत्वादेरन्योन्यबाध्यबाधकभावं विना समावेशांगीकारे जाग्रद्दशायामपि नन्दिकेश्वरे क्रमेण मनुष्यत्वदेवत्वयोर्नहुषे देवत्वसर्पत्वयोश्च समावेशस्य सम्प्रतिपन्नत्वेन तदविशेषात् । एकस्य वस्तुनः परस्परविसदृशानेकभ्रमविषयत्वसमावेशास्पदत्वमाश्चर्यरूपत्वमित्यङ्गीकारे स्वप्नार्थानामसत्यत्वेनैवाश्चर्यरूपत्वोपपादनापत्तेः । नापि स्वप्नानुभवकालावसायित्वमाश्चर्यरूपत्वम् । एकत्र स्वप्ने दृष्टस्य गजादेर्दिनांतरेऽपि स्वप्ने(१) दर्शनस्य लोकसिद्धत्वेन तत्र तदसिद्धेः । तत्र स्वाप्नार्थभेदे प्रमाणाभावाद्दिनांतरेऽपि तं दिदर्शयिषोः परमेश्वरस्येच्छया पुनर्दर्शनपर्यन्तमवस्थानकल्पनस्यैव लघुत्वात् स्थायिन एव स्वप्नप्रपञ्चस्य स्वप्नदशामात्रेऽनुभवः जाग्रत्प्रपञ्चस्येव जाग्रद्दशामात्र इत्यपि कल्पनसम्भवेन क्वचिदपि तदसिद्धेश्च । न च 'पथस्सृजत' इत्यादिश्रुतिबलात् प्रतिस्वप्नं स्वप्नप्रपञ्चभेदकल्पनम् । तथा सति 'यत्रैतत्पुरुषः सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवति तदेनं वाक्सर्वैर्नामभिस्सहाप्येति चक्षुः सर्वैरूपैस्सहाप्येति श्रोत्रं सर्वैश्शब्दैस्सहाप्येति मनस्सर्वैर्भूतैस्सहाप्येति स यदा प्रबुध्यते यथाग्नेर्विष्फुलिंगा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोका' इत्यादिश्रुतिबलेन जाग्रत्प्रपञ्चस्यापि प्रतिप्रबोधं भेदकल्पनापत्त्या स्वप्नजागरप्रपञ्चयोरुभयोरपि तत्तदवस्थामात्रावसायित्वस्याविशेषापत्तेः । तस्मादुदाहृतभाष्यं शांबरिकदर्शितप्रपञ्चस्य शाम्बरिकमोहितैकानुभाव्यत्वेन शाम्बरीप्रसरणमात्रकालावसायित्वेन च यथाश्चर्यरूपत्वं तथा स्वप्नप्रपञ्चस्य परमेश्वरमोहितस्वप्नदृगेकानुभाव्यत्वेन तत्प्रसारितस्वप्नावस्थामात्रानुभाव्यत्वेन चाश्चर्यरूपत्वमिति प्रातिभासिकत्वाश्रयेऽप्यर्थे योजयितुं शक्यमिति न तदनुसारेण भाष्यस्य प्रथमपक्षे तात्पर्यसिद्धिः । न च स्वप्नप्रपञ्चस्य पारमार्थिकत्व एव परमेश्वरस्य तत्स्रष्टृत्वेन महामहिमसिद्धिरिति पादसङ्गत्यर्थं भाष्यस्य प्रथमपक्षे तात्पर्यं कल्पनीयमिति वाच्यम् । अनंतप्राणिदृश्यमानपरस्परविरुद्धानंतस्वप्नप्रपञ्चप्रदर्शकत्वेनापि तस्य महामहिमसिद्धेः । मायिकपंचषवस्तुप्रदर्शकत्वेनापि हि शांबरिकस्य लोके महामहिमा गण्यते । अवश्यं चैवमेवाभ्युपेयम् । अन्यथा स्वप्नसत्यत्वपक्षे स्वसंकल्पात्क्षणेनैवातिविपुलप्राकारगोपुरादिकं गिरिनदीसमुद्रादिकं वा निर्मिमाणमाकाशगमनमेरुमंदरादिदेशसञ्चारं कृत्स्नभूगोलभ्रमणादिकं कुर्वन्तं वा यत्र स्वप्नदृगात्मानमीक्षते

(१) 'दिनान्तरस्वप्नेऽपि' इति ख० पाठः ।

सृष्ट्यभावप्रसङ्गात् । तस्मात् परमेश्वरकृता स्वप्नसृष्टिरिति युक्तमेव ॥

इति सन्ध्याधिकरणम् ॥ १ ॥

तत्र स्वप्नसत्यत्ववादे यथानुभवं तथैवाभ्युपगन्तव्यमिति जीवस्याप्यत्याश्चर्यस्वप्नप्रपञ्चस्रष्टृत्वे समाने परमेश्वरस्य ततः कोऽतिशयस्सिद्ध्येत् । तस्मात्तत्र तथा तथात्मनः स्रष्टृत्वादिभ्रममापादयतः स्वप्नावस्थां प्रापय्य मोहयतः परमेश्वरस्यैव तेन महामहिमा सिध्यतीत्येव तत्रोपपादनीयमिति तस्मादाचार्याणामिह यथोपपत्त्यंगीकरणीयमित्यभिप्रायः ॥

इति संध्याधिकरणम् ॥ १ ॥

नयमणिमालायाम्

अथ तृतीयस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

अथ संध्याधिकरणम् ॥ १ ॥

सू० ॥ संध्ये सृष्टिराह हि ॥ १ ॥ निर्मातारं चैके पुत्रादयश्च ॥ २ ॥ मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ ३ ॥ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ४ ॥ देहयोगाद्वा सोऽपि ॥ ५ ॥ सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ६ ॥

स्वप्नस्रष्टा जीवोऽथ रथानिति तं प्रकृत्य सृष्ट्यभिधानात् । तस्यापि हि प्रजापतिवाक्योदितमस्ति सत्यसंकल्पत्वम् ॥ १८० ॥
मुक्तौ तस्य तदुक्तेः स्वप्नार्थेष्वहितसृष्टिदृष्टेश्च । स्रष्टा तत्र न जीवः किं त्वीशः श्रुतिवचोऽपि तद्विषयम् ॥ १८१ ॥

इति संध्याधिकरणम् ॥ १ ॥

सूत्रार्थचन्द्रिकायाम्

अथ तृतीयस्याध्यायस्य द्वितीयःपादः ।

अथ सन्ध्याधिकरणम् ॥ १ ॥

सू ॥ संध्ये सृष्टिराह हि ॥ १ ॥ निर्मातारं चैके पुत्रादयश्च ॥ २ ॥ मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ ३ ॥ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ४ ॥ देहयोगाद्वा सोऽपि ॥ ५ ॥ सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ६ ॥

भगवत्पादमते, पूर्वं जीवस्य गत्यागतिचिन्तया जाग्रदवस्था निरूपिता । अथ त्वंपदार्थस्य स्वयंज्योतिष्ट्वसिद्धये स्वप्नावस्थां निरूपयति–सू ॥ **सन्ध्ये सृष्टिराह हि** ॥ १ ॥ स्वप्नमधिकृत्य श्रूयते–'अथ रथान्रथयोगान्पथःसृजते' इति । तत्र किं स्वप्नसृष्टिर्व्यावहारिकी, उत मायामात्रमिति **संदेहः** । **सन्ध्ये**=जाग्रत्सुषुप्त्योस्सन्धौ भवे स्वप्ने **सृष्टिः** व्यावहारिक्येव । **हि**=यस्मात् 'अथ रथा' नित्यादिका श्रुतिरेव**माह** ।

किंच । सू । **निर्मातारं चैके पुत्रादयश्च** ॥ २ ॥ एके शाखिनः जीववत्तथा अस्मिन्नेव स्वप्ने कामानां निर्मातारमीश्वरमामनन्ति 'य एष सुप्तेषु जागर्ति कामंकामं पुरुषो निर्मिमाणः' इति । पुत्रादयश्च तत्र कामा अभिधीयन्ते काम्यन्त इति । एवं च 'स्वप्नसृष्टिः व्यावहारिकी, ईश्वरकर्तृकत्वात् क्षित्यादिवत्' इत्यनुमानमनेन सूत्रेण सूचितम् । तस्मात्पूर्वोदाहृतश्रुत्या एतदनुमानेन च स्वप्नसृष्टिर्व्यावहारिकीति सिद्धमिति **पूर्वपक्षः । सिद्धान्तस्तु,** सू ॥ **मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्** ॥ ३ ॥ तुशब्दः पूर्वपक्षनिरासार्थः । स्वप्नसृष्टिः शुक्तिरूप्यवन्**मायामात्रम्** । कुतः । **कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्** । न हि कार्त्स्न्येन देशकालादिसंपत्त्यबाधरूपपरमार्थवस्तुधर्मेण अभिव्यक्तस्वरूपः स्वप्नः । यदुक्तम् 'अथ रथान्रथयोगान्पथःसृजते' इति तच्च 'न तत्र रथा रथयोगा न पन्थानो भवन्ति' इत्येवमाविकया श्रुत्यैव परिहृतम् । यच्चानुमानमुक्तं तत्रोचितदेशकालादिजन्यत्वमुपाधिः । हेत्वसिद्धिश्च 'स्वयं विहत्य स्वयं निर्माये'त्यादिना श्रुत्यन्तरेण स्वप्नसृष्टेर्जीवकर्तृकत्वश्रवणात् । अतः स्वप्नसृष्टिर्मिथ्येति युक्तम् । ननु स्वप्नस्य मिथ्यात्वे तत्सूचितोऽप्यर्थः सत्यो न स्यादित्याशंक्याह–**सू ॥ सूचकश्च हि श्रुतेराचक्षते च तद्विदः** ॥ ४ ॥ 'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति । समृद्धिं तत्र जानीयात्' इत्यादिश्रुतेः स्वप्ने जायमानः स्त्रीदर्शनादिः सत्य एव । स च सत्यस्य साध्वसाधुवस्तुनः **सूचको** हेतुः । इत्यवगम्यते । **आचक्षते च स्वप्नाध्यायविदः** शुभाशुभसूचकत्वं स्वप्नदर्शनस्य । वस्तुतस्तु दर्शनस्य व्यावहारिकत्वेन सत्यत्वेऽपि शुक्तिरूप्यज्ञानस्य सत्यहर्षादिजनकत्ववत्सत्यशुभादिसूचकत्वमविरुद्धमिति भावः । अस्यसूत्रस्याधिकरणान्तिमसूत्रतया पाठः श्रीकण्ठरामानुजमतयोरिति पाठक्रमेऽस्ति विशेषः । आनन्दतीर्थमते शांकरमतानुसार्येव सूत्रपाठक्रमः ॥

नतु पूर्वमुचितदेशादिनिमित्ताभावात्स्वप्नो मायेत्युक्तमयुक्तम् । ऐश्वर्ययोगात्संकल्पमात्रेणापि स्रष्टुः संभवादित्याशंक्याह–**सू ॥ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ५ ॥**

अस्य जीवस्य **तिरोहितमैश्वर्यं परस्य**=परमेश्वरस्य **अभिध्यानात्**=आभिमुख्येन ध्यानादभिव्यक्तं भवति । कुतः । **ततः**=तस्मादज्ञातादीश्वराद्**बन्धः** ज्ञाताद्**विपर्ययः**=मोक्षः इति 'ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः, तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः' इति श्रुतिर्दर्शयति । एवं च जीवेश्वरयोरभेदेऽप्यैश्वर्यस्य तिरोहितत्वान्न जीवस्य संकल्पमात्रेण स्रष्टृत्वमिति भावः ।

नतु जीवस्यैश्वर्यतिरोभावे को हेतुरित्याशंक्याह–**सू ॥ देह योगाद्वा सोऽपि ॥ ६ ॥** सोऽपि जीवस्यैश्वर्यतिरोभावः । **देहयोगात्**=देहादावात्मत्वाभिमानलक्षणाविद्यावशात् । यथा भस्मयोगाद्वह्नेः प्रकाशनशक्तितिरोभावस्तद्वदित्यर्थः । वाशब्दः ईश्वरत्वासंभवशंकानिरासार्थः । अभेदस्याम्नायसहस्रप्रसिद्धत्वात् । अतः स्वप्नप्रपञ्चस्य मायामात्रत्वेन ततो विनिर्मुक्तस्य जीवस्य स्वयं ज्योतिष्ट्वसिद्धिरिति ॥

श्रीकण्ठमते, तथा **रामानुजमते** च स्वप्नमधिकृत्य श्रूयते 'न तत्र रथा रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथस्सृजते' इत्यारभ्य 'अथ वेशान्ताः पुष्करिण्यस्स्रवन्त्यस्स हि कर्ते' ति । अत्र किं स्वाप्नपदार्थस्रष्टा जीव एव उत परमात्मेति **संशयः** । स्वप्नदृशो जीवस्य सन्निधानात् 'स हि कर्ते'ति जीव एव परामृश्यते । जीवस्यापि सत्यसंकल्पत्वं प्रजापतिवाक्योदितमस्ति । अतस्स एव स्रष्टेति **पूर्वपक्षः** । **सिद्धान्तस्तु** जीवस्य सत्यसंकल्पत्वं स्वाभाविकमपि संसारदशायां परमपुरुषसंकल्पात्तिरोहितमिति न जीवस्य संकल्पमात्रेण स्रष्टृत्वमुपपद्यते । अतः परमात्मैव सकलेतरपुरुषानुभवाविषयांस्तत्तत्पुरुषमात्रानुभाव्यांस्तत्तत्कालावसानान्स्वाप्नान्पदार्थान्सृजतीति ॥ **सूत्रार्थस्तु सन्ध्ये**=स्वप्ने श्रूयमाणा । **सृष्टिः**=रथादिसृष्टिः स्वप्नदृशा जीवेन कृता । कुतः । **आह हि**='स हि कर्ते' ति प्रकृतस्य तस्यैव परामर्शादित्यर्थः । **सू ॥ निर्मातारं चैके पुत्रादयश्च ॥ २ ॥** एनमेव जीवं निर्मातारं स्वाप्नार्थानामेके शाखिनोऽधीयते 'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाण' इति । अत्र कामशब्दनिर्दिष्टाः काम्यमानतया पुत्रादय एव । चशब्दोऽवधारणे । पूर्वत्र 'सर्वान्कामान्छन्दतः प्रार्थयस्व' इत्युक्त्वा 'शतायुषः पुत्रपौत्रान्वृणीष्वे' ति विवृतत्वात् ।

अथ सिद्धान्तसूत्राणि व्याख्यायन्ते–**सू ॥ मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ ३ ॥** तुशब्दात्पक्षो व्यावर्तते । न जीवेन सृष्टं स्वाप्नमर्थजातम् । अपि त्वीश्वर**मायामात्रम्** । सकलेतरपुरुषानुभवाविषयं स्वप्नदृगेकानुभाव्यं तत्कालावसानमाश्चर्यरूपमर्थजातमीश्वरस्सृजतीत्यर्थः । जीवस्य सत्यसंकल्पत्वादेः **कृत्स्नस्य** संसारदशाया**मनभिव्यक्तस्वरूपत्वात्तस्य** संकल्पमात्रेण स्रष्टृत्वं नोपपद्यते । अतः 'पुरुषो निर्मिमाणः' इति न जीवविषयम् । किं तु 'तदेव शुक्र' मित्यादिवाक्यशेषादीश्वरविषयम् । तदैकार्थ्यात् 'स हि कर्ते' त्यपि तद्विषयमेव । अतः परमात्मकृता स्वप्नसृष्टिरिति ॥

जीवस्वरूपानभिव्यक्तिहेतुमाह–**सू ॥ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ४ ॥** तुशब्दश्शंकानिवृत्त्यर्थः । **पराभिध्यानात्**=परमेश्वरसंकल्पात् अस्य स्वाभाविकं रूपमनादिकर्मप्रवाहेण कृतापराधतया **तिरोहितम्** । **ततः**=परमात्मनस्संकल्पादेव **ह्यस्य**=जीवस्य । **बन्धविपर्ययौ**=संसारमोक्षौ श्रूयेते । **श्रीकण्ठभाष्ये** 'यदा ह्येवैष एतस्मिन्' इत्युपक्रान्तं जीवस्य भयाभयप्राप्तिबोधकं श्रुतिद्वयमुपन्यस्तम् । **रामानुजभाष्ये** तु 'को ह्येवान्यात्कः प्राण्यात्' परंज्योतिरुपसंपद्य' इत्युपक्रान्तं श्रुतिद्वयं तत्प्रमाणतयोपन्यस्तमित्यनयोर्मतयोर्विशेषः ।

तिरोधानप्रकारमाह–**सू ॥ देहयोगाद्वा सोऽपि ॥ ५ ॥ सोऽपि**=तिरोभावः । **देहयोगाद्वा** भवति । वाशब्दो विकल्पार्थः । व्यवस्थितश्च विकल्पः । देवमनुष्यादिदेहाकारपरिणताचिद्योगात्सृष्टिवेलायां नामरूपविभागानर्हसूक्ष्मदशापन्नाचिद्योगेन प्रलयकाले ॥

उपपत्त्यन्तरमाह–**सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ६ ॥** इतश्च स्वाप्ना रथादयो न जीवसंकल्पकृताः । यतः स्वप्नश्शुभाशुभयोस्**सूचक** इति **श्रुते**रवगम्यते । **तद्विदः**=स्वप्नाध्यायविदः 'यदा कर्मसु काम्येषु' 'अथ स्वप्ने पुरुषं कृष्ण' मित्यादिषु स्वप्नविशेषाञ्शुभाशुभसूचकाना**चक्षते** । स्वप्नानां जीवसृष्टत्वे तदशुभसूचकानां सृष्ट्यभावप्रसंगात् । अतः स्वाप्नानामर्थानां परमात्मैव स्रष्टेति ॥

आनन्दतीर्थमते, यद्यध्याये पूर्वस्मिन्पादे वैराग्यं निरूपितं या चोपासनांगं तां माहात्म्यज्ञानपूर्वकस्नेहरूपां भक्तिं निरूपयत्यस्मिन्पादे–**सू ॥ संध्ये सृष्टिराह हि ॥ १ ॥** अत्राधिकरणे स्वाप्नप्रपञ्चस्य भगवदधीनत्वमहिमा वर्ण्यते । अत्र स्वाप्नप्रपञ्चस्य भगवदधीनत्वेन पारमार्थिकत्वं वा मरुमरीचिकाजलादिवत्प्रातीतिकत्वेनासत्यत्वं वेति **संदेहः** । स्वाप्नप्रत्ययानां विभ्रमत्वात्तद्विषयाश्शुक्तिरजतादिवदसत्या इति न तेषां सृष्टिवादो युक्त इति **पूर्वपक्षः** । **सिद्धान्तस्तु** 'अथ रथा' नित्याद्यनेकश्रुतिसिद्धा स्वाप्नपदार्थसृष्टिर्नापह्नवार्हा । तत्तत्कर्मानुसारिपरमेश्वरेच्छामात्रप्रभवाः स्वाप्नार्थास्सत्या एवेति तेषां सृष्टिर्भगवदधीनेत्यतस्तत्सृष्टिवादो युक्त एवेति । **सूत्रार्थस्तु, हि** यस्मात्='अथ रथा' निति **श्रुतिः सन्ध्ये**=जाग्रत्सुषुप्तिसंधौ भवे भगवतस्**सृष्टिमाह** । अतः **सृष्टिः** स्वाप्नपदार्थसृष्टिर्भगवतैव जायत इत्यर्थः ।

अथ तदभावाधिकरणम्. ॥ २ ॥

॥ सू ॥ तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥

स्वप्नाभावः सुषुप्तिः । 'तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानाति, आसु तदा नाडीषु सृप्तो भवति' इति 'अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते' इति 'यत्रैतत् पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति' इति च श्रुतिभिर्जीवस्य सुषुप्तौ नाडीषु पुरीतति ब्रह्मणि च शयनमवगम्यते । तेष्वस्य विकल्पः समुच्चयो वेति संशयः ॥

नाड्यादीनि स्थानानि विकल्पितानि भवितुमर्हन्ति, एकप्रयोजनत्वात् । यथा 'व्रीहिभिर्यजेत, यवैर्यजेत' इत्यत्र पुरोडाशनिष्पादनप्रयोजनस्यैकत्वेन विकल्पः स्वीक्रियते, तथा सुषुप्तिप्रयोजनस्यैकत्वात् कदाचित् पुरीतति शेते कदा-

---

अथ तदभावाधिकरणम् ॥ २ ॥

सू० ॥ तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥ सौत्रतदभावपदव्याख्यानेन स्वप्नावस्थाश्रयविचारानंतरं स्वप्नानंतरभाविसुषुप्त्याश्रयविचारः क्रियत इति संगतिं दर्शयति—स्वप्नाभाव इति । तेष्वस्येति । कार्यैक्यतद्भेदाभ्यां संशयः । एकप्रयोजनत्वादिति । नाडीपुरीतद्ब्रह्मणां हि सुषुप्तौ जीवं प्रत्यधिकरणभावेनोपयोगः । अधिकरणभावश्च प्रत्येकं सप्तमीभिर्निरपेक्षाणामवगम्यते । ततश्च यथा व्रीहीणां यवानाञ्च पुरोडाशसाधनत्वेन क्रतावुपयुक्तानां प्रत्येकं तृतीयाभ्यां निरपेक्षसाधनत्वावगतेर्विकल्पः तथात्रापि विकल्प एव न्याय्य इत्यर्थः । ननु 'सता सोम्ये' त्यत्र सप्तमी न श्रूयत इति

सू ॥ निर्मातारं चैके पुत्रादयश्च ॥ २ ॥ च=यतः । एके=शाखिनः एनं भगवन्तं 'य एष सुप्ते' ष्विति स्वाप्नपदार्थनिर्मातारमामनन्ति । अपरे च पुत्रादयस्तस्माद्विष्णोरेव जायन्त इति वदन्ति । तस्माद्विष्णोरेव स्वाप्नसृष्टिरित्यर्थः ।

सू ॥ मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ ३ ॥ तुरेवार्थे । संध्यं मायामात्रं निमित्तोपादानभूताभ्यां मायाशब्दितेच्छावासनाभ्यामेव निर्मितम् । न बाह्यकारणकम् । कुतः । कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्=बाह्यवत्सम्यगनभिव्यक्तस्वरूपत्वादित्यर्थः ।

सू ॥ सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ४ ॥ च=यतः स्वाप्नपदार्थः । सूचकः=शुभाशुभज्ञापकः । अतोऽपि नासत्यः । तत्कुतः । 'यदे' ति श्रुतेः प्रत्यक्षतः फलदर्शनाच्चेति हिशब्दार्थः । किंच । तद्विदः=स्वप्नविदः व्यासादयः । आचक्षते च='यदे' ति श्रुतौ स्वाप्नानामर्थक्रियाकारित्वं वदन्त्यतोऽपीत्यर्थः ॥

इत्यानन्दतीर्थमते सन्ध्याधिकरणम् ॥ १ ॥

अथ पराभिध्यानाधिकरणम् ॥ २ ॥

सू ॥ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ५ ॥ अत्र स्वप्नतिरोधानं भगवदधीनं वा न वेति संदेहः । बाह्याज्ञानकृतस्य स्वप्नस्य बाह्यज्ञानेनैव विलयोपपत्तेर्न तत्तिरोधानं भगवदधीनमिति पूर्वपक्षः । अज्ञानमूलस्य बन्धस्य ज्ञानमूलस्य मोक्षस्य च तादधीन्यदर्शनात् न ह्यज्ञानमूलस्य ज्ञानेन लये न भगवदपेक्षेत्यस्ति नियमः । अतः स्वप्नतिरोधानमपि भगवदधीनमेवेति सिद्धान्तः ॥ इति पराभिध्यानाधिकरणम् ॥ २ ॥

अथ देहयोगाधिकरणम् ॥ ३ ॥

सू ॥ देहयोगाद्वासोऽपि ॥ ६ ॥ अत्र जाग्रदवस्था भगवधीना न वेति संदेहः । तस्याः कालाधीनत्वदर्शनान्न सा भगवदधीनेति पूर्वपक्षः । सिद्धान्तस्तु, कालस्याचेतनस्यास्वातंत्र्येण कालाधीनत्वप्रत्यक्षस्य निमित्ततामात्रविषयत्वात् 'स एव जागरिते स्थापयती' त्यादिश्रुतेश्च जागरावस्थापि भगवदधीनैवेति । सूत्रार्थस्तु, देहयोगाद्वासः=देहाभिमानेनावस्थितिरूपा जाग्रदवस्थापि पराभिध्यानादेव भवति नान्यत इत्यर्थः ॥ इति देहयोगाधिकरणम् ॥ ३ ॥

चिन्नाडीषु कदाचित् ब्रह्मणीति विकल्प एवात्र समुचित इति पूर्वः पक्षः ॥

चेत्सत्यम् । तद्वाक्यशेषे श्रूयते 'सति सम्पद्य न विदुस्सति सम्पत्स्यामह इती'ति । 'ननु सन्मूलास्सोम्येमाः सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठा' इति श्रवणान्नियमेन ब्रह्माश्रितस्य जीवस्य कथं तदनपेक्ष्य कदाचिन्नाड्यां पुरीतति वा सुषुप्तिराशंक्यते ? उच्यते । न केवलस्य ब्रह्मणोऽत्र विकल्पकोटित्वं किं तु दहराकाशरूपस्य । छांदोग्य एव हि दहरविद्यायां दहराकाशरूपं ब्रह्म प्रकृत्य तस्य सुषुप्तिस्थानत्वं श्रूयते । 'एवमेवेमास्सर्वाः प्रजा अहरहर्ब्रह्म गच्छंत्यः एतं ब्रह्मलोकं न विंदती'ति । तदेतद्दहराधिकरण एव 'गतिशब्दाभ्या' मिति (ब्र० १-३-१४) सूत्रे निरूपितमिति नात्राविष्कृतं भाष्ये । अपि च सद्विद्यावाक्यशेषेऽपि 'सत आगत्य न विदुस्सत आगच्छामह' इति श्रूयते । तेन किञ्चित्प्रदेशावच्छिन्नमेव सच्छब्दोक्तं ब्रह्म सुषुप्तिस्थानमिति गम्यते । न हि ग्रामादिवापरिच्छिन्नाद्ब्रह्मण आगमनं संभवति । तत्रैव जीवब्रह्मणोस्सूत्रप्रबद्धशकुनितदाधारयष्टिदृष्टान्तश्रवणेन चैतत्सिध्यति । नहि किञ्चित्प्रदेशावच्छिन्नब्रह्माविवक्षायां शकुनेराधारयष्टित इव जीवस्य ब्रह्मणो निष्क्रम्य प्रतिदिशं पतनं वक्तुं शक्यम् । स चावच्छेदको हृदयपुण्डरीकरूप इति श्रुतिभ्य एव प्रदेशान्तरपर्यालोचनया निश्चीयते । स्पष्टं चैवमेव श्रुत्यंतरे समाम्नायते- 'यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोन्तर्हृदय आकाशस्तस्मिन्छेत' इति । तस्मादुपपन्नात्र ब्रह्मणोऽपि वैकल्पिकाधिकरणत्वशङ्का । ननु 'तासु तदा भवति यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथाऽस्मिन्प्राण एवैकधा भवती'ति नाडीनां प्राणशब्दोक्तस्य ब्रह्मणश्च समुच्चयः श्रूयते । तथा 'ताभिः प्रत्यवसृप्य पुरीतति शेत' इति नाडीनां पुरीततश्च समुच्चयः श्रूयते । एककार्याणामपि समुच्चयश्रवणे सति न विकल्पः प्रवर्तते । अत एवानुष्ठेयार्थप्रकाशनैककार्याणामप्यभ्यादानमंत्राणां 'चतुर्भिरभ्रिमादत्त' इति समुच्चयश्रुतिसत्त्वात् व्रीहियववदैन्द्राबार्हस्पत्ययाज्यानुवाक्यायुगलत्रयवच्च न विकल्प इष्यते । न चाणोर्जीवस्यानेकाधिकरणसमुच्चयानुपपत्तिः । नाडीनां पुरीतत्प्राप्तौ ब्रह्मप्राप्तौ च मार्गत्वेन समुच्चयोपपत्तेः । पुरीतद्ब्रह्मणोरपि प्राकारपर्यंकन्यायेन समुच्चयोपपत्तेः । पुरीतदिति हि हृदयपुण्डरीकपरिवेष्टनमुच्यते । तथा च यथा प्राकारपरिवेष्टितप्रासादमध्यगते पर्यंके शयानः प्राकारे शेत इत्यपि व्यपदिश्यते, तथा च पुरीतद्वेष्टितहृदयपुण्डरीकमध्यगते ब्रह्मणि शयानः पुरीतति शेत इत्यपि व्यपदेष्टुं शक्यते नात्र कश्चिद्विरोध इति चेदुच्यते । 'यदा सुषुप्तो भवती' त्यादिश्रुतौ हृदयाकाशं प्राप्तस्य जीवस्य पुनर्हृदयान्नाडीभिर्निष्क्रम्य पुरीतति शयनं श्रूयते 'ताभिः प्रत्यवसृप्य पुरीतति शेते' इति । एतद्वाक्यं हृदयाकाशं विहाय केवले पुरीतति शयनेनोपपादनीयम् । 'न हि प्रासादान्निर्गत्य प्राकारे शेते नृपति' रिति वाक्यं प्राकारवेष्टितप्रासादमध्यगतपर्यंकशयनेनोपपादयितुं शक्यम् । अतो हृदयाकाशे पुरीतति च शयनस्य वैकल्पिकत्वं तावदवश्यमेष्टव्यम् । एवमेव नाडीनामपि वैकल्पिकत्वं भविष्यति । 'आसु तदा नाडीष्वि'ति निरपेक्षसप्तमीश्रुतिबाधनायोगात् प्राकारवेष्टितप्रासादमार्गभूतमध्यगतकक्ष्याविशेषे कदाचिद्राज्ञ इव जीवस्य नाड्यामपि कदाचिच्छयनोपपत्तेश्च । तस्मादेषां विकल्प एव । एवं

(१) 'छांदोग्य एव' इति ख. पाठः ।

समुच्चय इति सिद्धान्तः । कुतः ? नैकप्रयोजनत्वात् । तथा हि–जीवस्य हृदयनिष्ठब्रह्मगमनमार्गतया नाडीनां साधनत्वं पुरीतति ब्रह्मणि च प्रासादपर्यङ्कवदविरोधः । अतो नाडीभिरुपसृप्य पुरीतति ब्रह्मणि जीवः शेत इत्युपकारभेदात् समुच्चय एव ॥

प्राप्ते सिद्धान्तमाह–समुच्चय इति । सूत्रे चकारात्पुरीतद्ग्रहणमिति त्रयाणां समुच्चय इत्यर्थः । 'तच्छ्रुते' रित्यस्य समुच्चयश्रुतेरिति नार्थः । त्रयाणां समुच्चयश्रुतेरभावात् । किं तु त्रयाणां स्थानत्वश्रवणादित्यर्थः । तच्च श्रीहियववन्नाडीनां नाडीमार्गगम्यस्य पुरीततस्तथाभूतस्य दहराकाशरूपब्रह्मणश्च निरपेक्षकारकत्वश्रवणरूपं विकल्पस्यैव साधकं न समुच्चयस्येत्याशंक्य हेतोराशयमाविष्करोति–नैकप्रयोजनत्वादिति । नैकेति नसमासः । भिन्नप्रयोजनत्वादित्यर्थः । ननु फलभूमाल्पत्वरूपप्रयोजनभेदेऽपि षोडशिग्रहाग्रहयोर्विकल्प इष्यते । विरुद्धयोस्तयोरेकत्र समुच्चयायोगात् । तथेहापि विकल्पो युक्तः । अणुं जीवं प्रति परस्परविप्रकृष्टानां बहूनामधिकरणत्वसमुच्चयायोगादित्याशंक्य द्वारद्वारिभावेन भिन्नप्रयोजनतया समुच्चयमुपपादयति–तथाहीति । प्राकारस्थानीयस्यापि पुरीततः प्रासादस्थानीयत्वोक्तिः प्राकारस्य प्रासादपरिवृत्तिरूपतया तदेकदेशत्वाभिप्रायेण । अत्रायमाशयः । 'ताभिः प्रत्यवसृप्येति' हृदयात्प्रत्यागमनं नोच्यते किं तु स्वप्नवहनाडीभ्यः । पूर्वं हि 'स यत्रैतत्स्वप्नयाचरति ते हास्य लोका तदुतेव महाराजो भवति उतेव महाब्राह्मणः उतेवोच्चावचं निर्गच्छती' त्यादिना स्वप्नावस्थां निरूप्य 'अथ यदा सुषुप्तो भवती' त्यादिना सुषुप्त्यवस्था निरूपयितुमुपक्रान्ता । स्वप्नावस्थायाञ्च स्वप्नवहनाडीष्ववस्थानमन्यत्र प्रसिद्धम् । तथा हि–हृदयस्य सुषुम्नां परितो दश नाड्यो दशेन्द्रियव्यापारहेतवो दशप्राणाधिष्ठिताः । तासां च वृक्षाणामिव प्रत्येकं दश दश शाखारूपा नाड्यः । तासां शतस्य शाखानाडीनामेकैकस्या द्वासप्ततिर्द्वासप्ततिरित्येवं द्विशतोत्तराणि सप्तसहस्राण्युपशाखानाड्यः । तासामवान्तरशाखानाड्यो द्वासप्ततिसहस्रसंख्याः सहस्रधा भिन्नकेशांशवदतिसूक्ष्माः यासामुदाहृतबृहदारण्यवाक्ये हिता इति नामोपन्यस्तम् । तत्र प्रधानभूतासु दशसु नाडीषु यदा प्राणेन संयुज्यते जीवः तदा स्वप्ने नदीनगरहर्म्यप्राकारादीनां दर्शनं भवति । यदा व्यानेन तदा देवर्षीणां यदापानेन तदा यक्षराक्षसगन्धर्वाणां यदोदानेन देवलोकानां देवानां स्कन्दजयन्तयोश्च यदा समानेन तदा देवानां लोकानां धनानां च यदा वैरम्भेण तदा जागरदृष्टादृष्टश्रुताश्रुतभुक्ताभुक्तादीनां यदा स्थूलनाडीभ्यः प्रत्यवसृप्योपशाखानाडीषु प्रत्यवसर्पति तदैहलौकिकपारलौकिकव्यापाराणां दर्शनं भवति । एतत्सुबालोपनिषद्यपि 'हृदयस्य दश छिद्राणि भवन्ति । तेषु प्राणाःप्रतिष्ठिताः।स यदा प्राणेन सह संयुज्यते तदा पश्यति नद्यो नगराणि बहूनि विविधानि चे' त्यादिना 'प्राणश्शरीरं परिरक्षती' त्यतेन प्रतिपादितम् । एवञ्चात्र 'ताभिः प्रत्यवसृप्ये' त्यस्य स्वप्नवहनाडीभ्यः अतिसूक्ष्महितनाडीमार्गेण प्रतिनिवृत्त्येत्येवार्थो ग्राह्यः । न तु हृदयादिति । हृदयस्य स्वप्नस्थानत्वाभावात् । 'अतो हृदयात्पुरीततमभिप्रतिष्ठन्त' इति वचनं द्वासप्ततिसहस्रसंख्यावचनवत्स्वरूपकथनार्थं न तु हृदयात्पुरीततमभिप्रविशतो मार्गख्यापनार्थम् । 'प्रत्यवसृप्ये' त्यत्र प्रत्युप-

(१) 'प्रत्यवसर्गश्च' इति. ख. पाठः.

॥ सू ॥ अतः प्रबोधोऽस्मात् ॥ ८ ॥

'सत आगम्य न विदुः सत आगच्छामहे' इति ब्रह्मणः सकाशादस्य प्रबोधं श्रुतिराह । अतः समुच्चयः । विकल्पेऽङ्गीकृते ह्यष्टदोषप्रसङ्गः । यदा जीवो नाडीषु शेते तदा पुरीतद्ब्रह्मवाक्ययोः प्रामाण्यं प्राप्तं परित्यज्येत । अप्राप्तं चाप्रामाण्यं स्वीक्रियेत । यदा पुरीतद्ब्रह्मणोः शेते तदा पुरीतद्ब्रह्मवाक्ययोः पूर्वं त्यक्तं प्रामाण्यं स्वीक्रियेत । पूर्वं स्वीकृतं चाप्रामाण्यं परित्यज्येत । इति प्राप्तपरित्यागोऽप्राप्तस्वीकारः परित्यक्तस्वीकारः स्वीकृतपरित्यागश्चेति दोषचतुष्टयं पुरीतद्ब्रह्मवाक्यकोटौ । तथा नाडीवाक्यकोटौ च दोषचतुष्टये योजिते सत्यष्टौ दोषा भवन्ति । ततो न विकल्पः समुच्चयोपपत्ताविति समाधिः ॥

इति तदभावाधिकरणम् ॥ २ ॥

सर्गश्च प्रतिसुषुप्ति हितनाडीमार्गेण निवृत्तिरस्तीत्यभिप्रायकः । न तु पुरीततो नाडीमार्गेण हृदयं प्रविष्टस्य पुनर्हृदयात्पुरीतत्प्रवेशार्थं प्रतिनिवृत्त्यभिप्रायकः । अतः 'प्रासादे शेत' इति वचनस्य प्रासादान्तर्वर्त्तिपर्यङ्के शयान इव हृदयान्तर्वर्त्तिनि ब्रह्मणि शयाने पुरीतति शेत इति वचनस्य न काचिदनुपपत्तिः । नाडीषु सुप्तो भवतीत्यस्यापि नानुपपत्तिः । हृदयाकाशरूपे ब्रह्मणि स्वप्तुं यो नाडीः प्रविशति स तु नाडीषु सुप्त एव भवति । श्रावयति च तत्र वाक्यशेष एव ब्रह्मसम्पत्तिं 'तन्न कश्चन पाप्मा स्पृशति तेजसा हि तदा सम्पन्नो भवती'ति । एवं तार्ष्यदर्भमयाहतवासोन्यायात्प्रयोजनभेदेन नाडीपुरीतद्ब्रह्मणां समुच्चये समर्थयितुं शक्ये वक्ष्यमाणाष्टदोषदुष्टो विकल्पो नाङ्गीकर्तव्यः । व्रीहियवयोस्तु प्रयोजनभेदाद्युपायान्तरादर्शनात् 'एवमेषोऽष्टदोषोऽपि यद्व्रीहियववाक्ययोः । विकल्प आश्रितस्तत्र गतिरन्या न विद्यत' इत्युक्तरीत्या गत्यन्तराभावेन विकल्पाङ्गीकार इति । एवमुपपादितायां सुषुप्तेर्ब्रह्माधिकरणत्वस्य नियततायामुपपत्त्यन्तरप्रदर्शनार्थं सूत्रम्—सू ॥ अतः प्रबोधोऽस्मात् ॥ ८ ॥ अतस्समुच्चय इति । अन्यथा 'सत आगत्येति' नित्यवच्छ्रवणविरोध इति भावः । इत्यष्टौ दोषा इति । इदं पुरीतद्ब्रह्मवाक्ययोरेकीकृत्य प्रदर्शनादुक्तम् । वस्तुतस्तु नाडीवाक्य इव तयोरपि प्रत्येकं चत्वारश्चत्वारो दोषा इति द्वादश दोषा द्रष्टव्याः । अष्टदोषदुष्टो विकल्प इति प्रसिद्धिस्तु प्रसिद्धोदाहरणयोः व्रीहियवशास्त्रयोर्द्वित्वात् । इहैकस्यां सुप्तौ नाड्यां शयने पुरीतद्वाक्ये ब्रह्मवाक्ये च प्रत्येकं प्राथमिकौ द्वौ द्वौ दोषौ सुषुप्त्यन्तरे पुरीतति शयने नाडीब्रह्मवाक्ययोः प्रत्येकं प्राथमिकौ द्वौ दोषौ पुरीतद्वाक्ये तूपरितनमपि दोषद्वयमिति पुनस्सुप्त्यन्तरे ब्रह्मणि शयने ब्रह्मवाक्येऽप्युपरितनं दोषद्वयं ततस्सुप्त्यंतरे नाड्यां शयने नाडीवाक्येऽप्युपरितनं दोषद्वयमिति स्वापचतुष्टयेन द्वादश दोषाः प्रादुःष्युः । व्रीहियवशास्त्रयोस्तु प्रयोगत्रयेणाष्टौ दोषा इति विशेषः । नन्वनेनाधिकरणेन कः परब्रह्मणो महिमविशेषः सिध्यति । सुप्तजीवविश्रांतिस्थानत्वगुणनियम इति चेन्न । तस्य पूर्वपक्षेऽप्यनपायात् । मुक्तिसंसारयोरविशेषेण ब्रह्माश्रितस्य जीवस्य नाड्यां पुरीतति वा कदाचित्सुप्तिरिति पूर्वपक्षेऽप्यस्त्येव हि तत्तदवच्छिन्नब्रह्माश्रितत्वं दहराकाशरूपेण ब्रह्मणस्सुषुप्तिस्थानत्वगुणनियम इति चेन्न । ततस्तस्य महिम्नि कस्यचिद्विशेषस्यालाभादिति चेदुच्यते । सुप्तौ तावज्जीवस्य सकलपापास्पर्शः श्रुतिषु च

प्रसिद्धः । नाडीवाक्येऽपि श्रूयते स तु नित्यवदाम्नातः । पूर्वपक्षे सुषुप्त्यवस्थाविशेषप्रयुक्तो भवति स तु पाक्षिकब्रह्मसम्पत्तिप्रयुक्तः 'तेजसा हि तदा सम्पन्नो भवती'ति नाडीवाक्यशेषोऽपि पूर्वपक्षे नाडीनामेव तेजस्त्वेन कथञ्चित्स्तुतिपरतया योजनीयो भवति । सिद्धान्ते तु दहराकाशरूपब्रह्मसम्पत्तिप्रयुक्त एव स सिध्यति । प्रसिद्धो हि, दहरविद्यायां तत्सम्पन्नस्य सर्वपाप्मास्पर्शः 'सर्वे पाप्मानोऽतो निवर्तन्ते अपहतपाप्मा ह्येष ब्रह्मलोक' इति । एवं सुषुप्तौ यस्य दहराकाशरूपस्य सम्पत्त्या जीवस्य सकलपाप्मास्पर्शः तद्ब्रह्म महामहिमेत्यनेनाधिकरणेन ख्याप्यत इत्युक्तरूपमहिमसिद्धिरस्याधिकरणस्य फलम् । एतत्फलावलम्बनेनोत्तराधिकरणपूर्वपक्षप्रवृत्तिरिति ॥ इति तदभावाधिकरणम् ॥ २ ॥

नयमणिमालायाम्

अथ तदभावाधिकरणम् ॥ २ ॥

सू ॥ तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥ अतः प्रबोधोऽस्मात् ॥ ८ ॥

नाड्यादीनां सुप्तौ निरपेक्षत्वाद्विकल्पः स्यात् । मैवं समुच्चयोऽर्हति मार्गप्रासादमञ्चनयात् ॥ १८२ ॥

इति तदभावाधिकरणम् ॥२॥

सूत्रार्थचन्द्रिकायाम्

अथ तदभावाधिकरणम् ॥ २ ॥

सू ॥ तदभावोनाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥ अतः प्रबोधोऽस्मात् ॥ ८ ॥

भगवत्पादमते, अत्र परस्परं विप्रतिपन्नानि सुषुप्तिवाक्यानि विचार्यन्ते। क्वचित् 'आसु तदा नाडीषु सुप्तो भवति' इति सुषुप्तिकाले नाडीप्रवेशः श्रूयते, क्वचि 'ताभिः प्रत्यवसृप्य पुरीतति शेते' इति क्वचित् 'य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' इति । तत्र किं जीवस्य नाडीपुरीतत्परमात्मनां मध्ये यत्र क्वचित्सुषुप्तिरिति विकल्पः । उत नाडीपुरीतत्प्रवेशानन्तरं परमात्मन्येवेति समुच्चयः । इति **संदेहे** एकफलत्वाद्व्रीह्यादिवद्विकल्प इति **पूर्वपक्षः** । **सिद्धान्तस्तु,** नाडीपुरीतत्प्रवेशानन्तरं परमात्मन्येवेति समुच्चय एव न्याय्य इति । **सूत्रार्थस्तु, तदभावः**=स्वप्नाभावः सुषुप्तिः। नाडीषु आत्मनि च इति नाड्यादीनां समुच्चय एव न विकल्पः । स च समुच्चयः नाडीपुरीतत्प्रवेशं विना सत्संपत्तेरभावान्नाडीपुरीततोर्गुणभूततया परमात्मनः प्राधान्येनावगन्तव्यः । कुतः । **तच्छ्रुतेः**=तस्य नाड्यादीनां सुषुप्तिस्थानत्वस्य श्रुतत्वात् । उक्तसमुच्चयानङ्गीकारे श्रुतीनां संग्रहो न स्यादिति भावः ।

किं च । **सू ॥ अतः प्रबोधोऽस्मात्** ॥ ८ ॥ यतः परमात्मैव सुषुप्तिस्थानम् अत एव हेतोः अस्मात्परमात्मनो जीवस्य प्रबोध उपदिश्यते । 'सत आगम्य न विदुस्सत आगच्छामह' इति सद्रूपात्परमात्मनस्सकाशाज्जीवा आगच्छन्ति' इति श्रवणादन्यस्य सुषुप्तिस्थानत्वे इदं श्रवणं बाध्येत । अन्यत्र सुप्तस्यान्यस्मात्समुत्थानायोगादिति भावः । तस्मात्सुषुप्तौ मिथ्याज्ञानाभावमात्रेण ब्रह्मसंपत्तेः सत्वान्मूलाज्ञाननिवृत्तौ साकल्येन ब्रह्मसंपत्तिरविरुद्धेति । अतो जीवस्य ब्रह्मैक्यमिति सिद्धम् ॥

श्रीकण्ठमते, तथा रामानुजमते, च **संदेहपूर्वपक्षादिषु** नास्ति वैलक्षण्यं पूर्वस्मात् । **श्रीकण्ठमते** तु विकल्पपक्षाङ्गीकारे प्राप्तपरित्यागोऽप्राप्तस्वीकारः परित्यक्तस्वीकारः स्वीकृतपरित्यागश्चेति प्रतिपक्षं दोषचतुष्टयापादनेनाष्टदोषोपपादनमधिकमुपन्यस्तमिति विशेषः । **आनन्दतीर्थमते,** अधिकरणद्वितयात्मतया विभक्ते इमे सूत्रे । स्वप्नजागरन्यायेन सुषुप्तेरपि भगवदधीनत्वे सिद्धे तस्याः स्थानविचारः प्रस्तूयते–'सता सोम्य तदा संपन्नो भवती' ति श्रुत्या भगवत्येव सुषुप्तिर्वाच्या । 'आसु तदा नाडीषु सुप्तो भवती' ति श्रुतिरप्रमाणमिति **पूर्वपक्षः** । सुषुप्तौ नाडीष्ववस्थाने दुःखित्वप्रसंगादुभयविधश्रुतिदर्शनाच्च नाडीस्थे भगवति सुषुप्त्युपपत्तेरुभयविधश्रुतिप्रामाण्यसंभवे कस्याश्चिदप्रामाण्यकल्पनायोगात् ॥ इति **सिद्धान्तः** । अस्मिन्मते 'तच्छ्रुतेरात्मनि ह' इति पाठः । हेत्ययं शब्दः श्रुतिप्रसिद्धिवाचकः । सूत्रार्थः स्पष्टः ॥

इति तदभावाधिकरणम् ॥ ४ ॥

अथ प्रबोधाधिकरणम् ॥ ५ ॥

सू ॥ अतः प्रबोधोऽस्मात् ॥ ८ ॥ अत्र सुप्तस्य प्रबोधो भगवदधीनो वा उत भेरीताडनाद्यधीनो वेति **संदेहे** भेरीताडनाद्यधीनत्वं लोकदृष्टमेव युक्तमिति **पूर्वपक्षः** । 'एष एव सुप्तं प्रबोधयत्येतस्माज्जीव उत्तिष्ठती' ति सावधारणकौण्डिन्यश्रुत्यनुरोधेन भेरीताडनाद्यधीनत्वदर्शनस्य निमित्तमात्रत्वविषयत्वादिति **सिद्धान्तः** ॥ इति प्रबोधाधिकरणम् ॥ ५ ॥

इति सूत्रार्थचन्द्रिकायां तदभावाधिकरणम् ॥ २ ॥

अथ कर्मानुस्मृत्यधिकरणम् ॥ ३ ॥

॥ सू ॥ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥

अत्र 'सता सोम्य तदा संपन्नो भवति' इति विषयः ॥

पूर्वत्र जीवस्य सुषुप्त्यवस्था निरूपिता। तत्र ब्रह्मणि सुप्त एव प्रतिबुध्यते, उतान्य इति संशयः ॥

इहान्य इति प्राप्तम्, ब्रह्मप्राप्तस्यावृत्तेरनुचितत्वात्। निरतिशयानन्दे ब्रह्मणि साम्यं प्राप्तस्य जीवस्य पुनर्न दुःखमयसंसारावृत्तिरुपपद्यते। सता संपन्नः कथमुत्तिष्ठेत्, को वात्र विभागः ॥

अथ कर्मानुस्मृत्यधिकरणम् ॥ ३ ॥

सू० ॥ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥ इति संशय इति। पूर्वाधिकरणफलत्वेन विवक्षितस्य सुषुप्तौ सर्वपाप्मास्पर्शस्य मुक्ताविव सर्वोपाधिविनिर्मोक्षादिप्रयोजकत्वाप्रयोजकत्वाभ्यामयं संशयः। **ब्रह्म प्राप्तस्येति ।** मुक्तस्येव सुषुप्तस्यापि ब्रह्मप्राप्त्या सकलपाप्मोत्तीर्णत्वं तेन सर्वदुःखोत्तरणं च बृहदारण्यके श्रूयते 'अनन्वागतं पुण्येन अनन्वागतं पापेन तीर्णो हि तदा सर्वान्पाप्मनः शोकान्हृदयस्य भवती'ति। सर्वपाप्मोत्तरणपूर्वकं निरतिशयानंदरूपब्रह्मसम्पत्त्या स्वरूपानंदाभिव्यक्तिरपि जीवस्य तत्रैव श्रूयते। 'स यथा कुमारो वा महाराजो वा महाब्राह्मणो वातिघ्नीमानन्दस्य गत्वा शयीत एवमेवैष एतच्छेत इति तद्वा अस्यैतदतिच्छन्दाः अपहतपाप्माभयं रूपं तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नांतरमेवमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरं तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं शोकान्तर'मिति । अतिघ्नीमतिशयेन दुःखहन्त्रीं दशाम्। अतिछन्दा अतिछन्दमिच्छावर्जितमकामं काम्यविषयरहितं शोकान्तरं शोकतिरोधायकमित्यर्थः। एवञ्च सुषुप्तिमुक्ताद्विभागस्य पुनरावृत्तिहेतोर्वैलक्षण्यस्याभावादन्य एवोत्तिष्ठतीति[1] वक्तव्यम्। उपायसहस्रेणापि मुक्तवद्ब्रह्मप्राप्तस्य पुनरावृत्तेरुपपादयितुमशक्यत्वात् । अतः कर्मानुस्मृतिशब्दविधयो यथाकथञ्चिदुपपादनीयाः। कथं कर्मफलभोगनियमः। अतः पुण्यं फलभोगार्थिना संकीर्त्तनादिभ्य इव सुषुप्तितोऽपि रक्षणीयम्। पापवृन्दस्य सुषुप्त्या शुद्धिः स्त्रीणां मानसव्यभिचारादेः[2] रजसेव । स्वविषया परविषया वा प्रत्यभिज्ञा स्वप्न इव भ्रान्तिरूपा। स्वप्ने हि स्वात्मानं राजचोरव्याघ्रादिरूपमनुभवन्प्रागप्यहमेवंरूप इति मन्यते प्रागदृष्टमेव कंचित्पुरुषं पश्यन् प्रागप्ययं दृष्टो मयेति मन्यते। अत इह 'व्याघ्रो वे'त्यादिशब्दो यच्छरीरकः प्राचीनस्तच्छरीरक एवान्य उत्तिष्ठतीत्येवंपरः। मोक्षार्थविधयश्च ब्रह्मानन्दानुभवार्थिविषयतया चरितार्थाः। सुषुप्तस्य हि स्वरूपानन्दानुभव एव केवलं न तु ब्रह्मानन्दानुभवोऽपि। ब्रह्मसाक्षात्काराभावात्। एवञ्च यस्य केवलस्वरूपानन्दानुभूतौ न पर्याप्ता बुद्धिः तेन प्रयत्नतः सुषुप्तिं वर्जयित्वा भोगमोक्षार्थं विहितानुष्ठाननिषिद्धपरिहारश्रवणमननादिषु यतितव्यमिति अतः सुषुप्तविषयश्रुत्यनुरोधादन्य एवोत्तिष्ठतीत्यभ्युपगन्तव्यमिति पूर्वपक्षाभिप्रायः। एवञ्च 'अतः प्रबोधोऽस्मादिति' पूर्वाधिकरणसूत्रे सुषुप्तस्य ब्रह्मणस्सका-

(१) 'तीत्यङ्गीकर्तव्यम्' इति ख. पाठः। (२) 'व्यभिचारदोषस्य' इति ख. पाठः।

इति प्राप्ते ब्रूमः—सता संपन्नोऽपि सुप्त एव प्रतिबुद्ध उत्तिष्ठति, ज्ञानवैधुर्येण कृतस्य कर्मणस्तेनानुभाव्यत्वात्, पूर्वानुभूतप्रत्यभिज्ञानाच, 'त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति' इति तद्भावश्रुतेश्च, मोक्षोपायविधिवाक्यानर्थक्यप्रसङ्गाच। 'सत आगम्य न विदुः' इति संपन्नस्य ब्रह्मानन्दज्ञानाभावोक्तेर्मुक्तावित्र न तल्लयः। अतः सुप्त एव पुनः समुत्तिष्ठतीति युक्तम् ॥

इति कर्मानुस्मृत्यधिकरणम् ॥ ३ ॥

शात्प्रबोध इति यदुक्तं तन्नोपपद्यत इति तदाक्षेपेणास्याधिकरणस्य प्रवृत्तिः। सुप्त एवेति। अयमाशयः। सुप्तविषयपाप्मास्पर्शाद्यर्थवादमनुरुध्य न कर्मानुस्मृत्यादीनामेतावद्व्याकुलीकरणं न्याय्यम्। 'नो ह खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि नाहमत्र भोग्यं पश्यामी'ति सुषुप्तौ निन्दार्थवादोऽपि श्रूयते। अतो यद्यपि जीवस्य दहराकाशरूपब्रह्मसम्पत्त्यर्थे हृदयानुप्रवेशे मनुष्यस्य दिव्यक्षेत्रानुप्रवेशे तं गृहीतवतः पिशाचस्येव पुण्यपापाधिकरणस्यान्तःकरणस्य बहिरेवावस्थानमिति तदानीं न जीवस्य पुण्यपापस्पर्शः ब्रह्मसम्पन्नस्योपसंहृतसकलबाह्येंद्रियकरणत्वान्न शोकोदयः, जागरस्वप्नदशापन्नस्येव तस्य व्याक्षेपाभावादीषत्स्वरूपानन्दाभिव्यक्तिश्च। तथाप्यग्रिमसंसारनिमित्तयोः पुण्यपापयोः स्वरूपतो नाशाभावात्तस्यैवोत्थाने न काचिदनुपपत्तिः। अतः कर्मानुस्मृत्याद्यनुसारेण स एवोत्तिष्ठतीत्यङ्गीकरणीयम्। एवं सति 'अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः' इत्यादिश्रुतयोऽप्याञ्जस्यं लभेरन्निति ॥

इति कर्मानुस्मृत्यधिकरणम् ॥ ३ ॥

नयमणिमालायाम्

अथ कर्मानुस्मृत्यधिकरणम् ॥ ३ ॥

सू० ॥ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥

मुक्ताविवास्य सुप्तावाम्नानाद्ब्रह्मसम्पत्तेः। सुप्तो नोत्तिष्ठति पुनरुत्तिष्ठन्नन्य एवात्मा ॥ १८३ ॥

भोक्तव्यकर्मसत्त्वात्स्मरणात्त इहेति च श्रवणात्। मोक्षोपायविधानादुत्तिष्ठति सुप्त एवात्मा ॥ १८४ ॥

इति कर्मानुस्मृत्यधिकरणम् ॥ ३ ॥

सूत्रार्थचन्द्रिकायाम्

अथ कर्मानुस्मृतिशब्दविध्यधिकरणम् ॥ ३ ॥

सू ॥ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥

भगवत्पादमते, अत्र यस्सुप्तो जीवस्स एव प्रतिबुध्यते वा उत स एव अन्यो वेत्यनियमो वेति **संशये अनियम** इति **पूर्वपक्षः। सिद्धान्तस्तु** यस्सुप्तो जीवस्स एव प्रतिबुध्यते नान्यः। कुतः। **कर्मानुस्मृतिशब्दविधिभ्यः** पञ्चभ्यो हेतुभ्यः—दिनद्वयसाध्यस्य कर्मणोऽर्धं कृत्वा सुप्तः पुनरुत्थायावशिष्टमर्धं करोति। अनुशब्देन प्रत्यभिज्ञा सूच्यते। योऽहमतीतेऽप्यहनि घटमद्राक्षं स एवैतं घटं स्पृशामीत्याद्याकारा। पश्चात्स घट इत्यादिस्मरणं स्मृतिशब्देनोच्यते। पुनः 'प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव' इत्यादिश्रुतिसमूहः शब्देनोच्यते। कर्मविद्याविधयो विधिशब्देनोच्यन्ते। यदि सुप्तस्य पुनर्नोत्थानं तर्हि उक्तहेतवो बाध्येरन्। अतः सुप्त एवोत्तिष्ठतीति सिद्धम्। **श्रीकण्ठमते** तथा **रामानुजमते** च यद्यपि सन्देहपूर्वपक्षादिकमविशिष्टम्। तथापि 'कर्मानुस्मृतिशब्दविधिभ्य' इत्यस्यार्थवर्णनमात्रेऽस्ति कियती भिदा पूर्वस्मात्। ज्ञानवैधुर्येण कृतस्य कर्मणस्तेनानुभाव्यत्वात् पूर्वानुभूतप्रत्यभिज्ञानात् 'त इह व्याघ्रो वे' त्यादितद्भावश्रुतेः मोक्षोपायविधिवाक्यानर्थक्यप्रसङ्गाच्चेति तदर्थः। इति ॥

अथ मुग्धाधिकरणम् ॥ ४ ॥

॥ सू ॥ मुग्धेऽर्धसंपत्तिः परिशेषात् ॥ १० ॥

मूर्छितः पुरुष इति व्यवहारान्मूर्छेति काचिदवस्थानुभूयते । सैषा सुषुप्त्या-दिभ्यो भिन्ना न वेति संदेहः॥

जागरस्वप्नसुषुप्तिभ्यो भिन्नाया अवस्थाया अप्रसिद्धत्वान्मूर्छा जागरादि-ष्वन्तर्भूता ॥

इति पूर्वपक्षे प्राप्त उच्यते—मूर्छिते पुरुषे यावस्था सा मरणार्धसंपत्तिः इति परिशेषात् भिन्ना सुषुप्त्यादेः । प्रपञ्चप्रतीतेरभावान्न जागरस्वप्नयोरन्तर्भावः । सुषुप्तेः प्रसन्नवदनादिलक्षणाया विकृतमुखादिलक्षणाया अस्याश्च विशेषात् ततोऽप्यन्यावस्था मूर्छेति सिद्धम् ॥ इति मुग्धाधिकरणम् ॥ ४ ॥

अथ मुग्धाधिकरणम् ॥ ४ ॥

सू० ॥ मुग्धेऽर्धसम्पत्तिः परिशेषात् ॥ १० ॥ जीवावस्थाविचारप्रसंगादिदमधि-करणम् । मूर्छावस्था उक्तावस्थाभ्यो भिन्ना न वेति तद्भेदकसद्भावासद्भावाभ्यां संशये विशेषविज्ञानाभावसाम्यात् सा सुषुप्तिः करालवदनत्वादिसाम्यात्क्रोधदशेव जागरावस्था भीषणस्वप्नदर्शनदशेव वा स्वप्नावस्था वृक्षाग्रपतनादिकारणकत्वाद्वा मरणावस्था न तु सुषुप्त्यादिभ्यो भिन्ना अवस्थान्तरश्रुत्यभावादिति पूर्वः पक्षः । विशेषविज्ञानाभावान्न जागरः स्वप्नो वेयं प्रसन्नवदनत्वश्वासपूर्णत्वाद्यभावान्न सुषुप्तिः सूक्ष्मश्वासवत्वान्न मरणं किं तु वृक्षाग्रपतनाद्यभिघातनिमित्तसौक्ष्म्यापन्नप्राणयुक्ता तच्चिकित्साद्यभावे मरणपर्य-वसायिनी मरणावस्थार्धसम्पत्तिरूपा सुषुप्त्यादिभ्यो विलक्षणेति सिद्धान्तः ।

इति मुग्धाधिकरणम् ॥ ४ ॥

नयमणिमालायाम् अथ मुग्धाधिकरणम् ॥ ४ ॥

जाग्रत्स्वप्नसुषुप्तिष्वन्तर्भूतैव मूर्छा स्यात् । तदवस्थात्रयभिन्नावस्था न कुत्रचिद्विदिता ॥ १८५ ॥

ज्ञानोपरमाद्विषमश्वासत्वादेश्च तत्त्रयादन्या । मर्त्यं प्रकृत्य ततो................षे वयम् ॥ १८६ ॥

* (परिशेषान्मूर्छाख्या ज्ञेया मरणार्धसम्पत्तिः ।)

इति मुग्धाधिकरणम् ॥ ४ ॥

* नयमणिमालायामंतिममर्धं त्रुटितत्वान्न लभ्यते । अतस्तदन्यथा विरच्य (   ) एतद्रेखामध्यपातितया संयोजितमिति वेद्यम् ।

आनन्दतीर्थमते अत्राधिकरणे सर्वपुरुषीयसार्वकालिकसर्वावस्थानां भगवदधीनत्वमहिमा वर्ण्यते । अत्र न सर्वेषां सार्वकालिकसर्वावस्था भगवदधीनाः । किं तु केषांचित्किंचित्कालिकावस्था एवेति **पूर्वपक्षः** । **सिद्धान्तस्तु, स परमे**श्वर एव सर्वेषां सर्वावस्थाप्रेरकः । न देशकालान्तरेऽन्यः । कुतः । **कर्मानुस्मृतिशब्दविधिभ्यः**—'एष ह्येव साधुकर्म कारयती' त्यादिना कर्मणामीशाधीनत्वश्रुतेः, 'प्रदर्शकस्तु सर्वेषां स्वप्नादेरेक एव तु । परमः पुरुषो विष्णुस्ततोऽन्यो नास्ति कश्चन ॥' इत्यादितदनुसारिस्मृतेश्च 'एष स्वप्नान्प्रदर्शयत्येष प्रबोधयत्येष एव परम आनन्दः' इत्यादिश्रुतेः 'आत्मानमेव लोकमुपासीत' इति विधिवाक्याच्च । इति । सूत्रार्थोऽपि व्याख्यातः । परमात्मनोऽन्यस्य प्रेरकत्वे तस्याप्युपास्यत्वप्राप्त्या श्रुतौ परमात्मन एवोपास्यत्वावधारणानुपपत्तिरिति भावः ॥ **इति कर्मानुस्मृत्यधिकरणम् ॥ ६ ॥**

---

(१) 'मूर्छा सुषुप्त्यादिभ्यो' इति ख. पाठः ।

अथोभयलिङ्गाधिकरणम् ॥ ५ ॥

॥ सू ॥ न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥ ११ ॥*

पूर्वेष्वधिकरणेषु त्वंपदार्थस्य जीवस्य स्वरूपधर्मगत्यागत्यवस्थाविशेषनिरूपणं कृतम् । अतः परं तत्पदार्थस्य परमेश्वरस्य स्वरूपधर्मादिकं निरूप्यते । 'सोऽन्तरादन्तरं प्राविशत् दिशश्चान्तरं स प्राविशत्' 'यः पृथिव्यां तिष्ठन्' इत्यादिषु

अथ उभयलिंगाधिकरणम् ॥ ५ ॥

सू० ॥ न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥ ११ ॥ पेटिकासंगतिं दर्शयितुं वृत्तानुकीर्तनपूर्वकमापादसमाप्तेरुत्तराधिकरणानामर्थमाह–पूर्वेष्विति । प्रथमाधिकरणे स्वप्नावस्थाविषयश्रुतिवाक्यार्थविचारेण जीवस्य स्वप्रकाशज्ञानात्मकं स्वरूपं निरूपितम् । तत्रैव संसारदशायां गुणाष्टकतिरोधानरूपो धर्मो निरूपितः । तदनंतराधिकरणे सुषुप्तौ ब्रह्मगतिः प्रबोधे तत आगमश्चेत्युभयं निरूपितम् । तृतीयाधिकरणे तत आगतिराक्षेपसमाधानाभ्यां व्यवस्थापिता । चतुर्थाधिकरणे मूर्छाया मरणार्धसम्पत्तिरूपो विशेषो निरूपित इत्यर्थः । स्वरूपधर्मादिकमिति । 'प्रकाशवच्चे'ति सूत्रे परमेश्वरस्य ज्ञानात्मकं स्वरूपमुभयलिंगादिसूत्रैर्दोषाभावकल्याणगुणात्मका धर्माः तत उपरि समाभ्यधिकप्रतिषेधः फलदातृत्वं चेत्येतत्सर्वं निरूप्यत इत्यर्थः । तथा च जीवस्वरूपादिनिरूपणपर्यवसायिभिर्विचारैः पूर्वपादसंगत्या प्रथमप्रवृत्तैः परमेश्वरमहिमाविष्करणानन्तरं साक्षात्तत्स्वरूपधर्मादिविचारैस्तन्महिमाविष्करणं क्रियत इति पेटिकासंगतिरिति भावः । यद्यपि पूर्वेष्वधिकरणेष्वितिवृत्तसंकीर्तनस्य 'नात्माश्रुते' रित्यादिषु वियत्पादाधिकरणेषु यज्जीवस्य स्वरूपधर्मनिरूपणं पूर्वपादाधिकरणेषु यद्गत्यागतिनिरूपणम् एतत्पादाधिकरणेषु यत्स्वप्नाद्यवस्थानिरूपणं कृतं तस्य सर्वस्यापि प्रतिपत्तिसौकर्यार्थोऽनुवाद इति तात्पर्यं वक्तुं

सूत्रार्थचन्द्रिकायाम् अथ मुग्धाधिकरणम् ॥ ४ ॥

सू ॥ मुग्धेऽर्धसंपत्तिः परिशेषात् ॥ १० ॥

भगवत्पादमते, पूर्वं सोऽहमिति प्रत्यभिज्ञानात्सुषुप्तप्रतिबुद्धैक्यमुक्तम् । तद्वद्विशेषाभावप्रत्यभिज्ञानात्सुषुप्तिरेव मूर्छेति दृष्टान्तसंगत्येदमाह–**मुग्धेऽर्धसंपत्तिरित्यादि** । अत्र किं मूर्छावस्था सुषुप्त्यन्तर्गता उतातिरिक्ता इति **संदेहे** सुषुप्त्यन्तर्गतेति **पूर्वपक्षः** । **सिद्धान्तस्तु,** न तावत्स्वप्नजागरिते मूर्छावस्था । अत्र ज्ञानाभावात् । नापि मरणावस्था । प्राणोष्मणोस्सत्त्वात् । नापि सुषुप्तिः । भयानकवदनत्वादिलक्षणभेदात् । किं तु **परिशेषात्**=प्रसक्तस्य प्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणे वस्तुनि यः संप्रत्ययः स परिशेषः । तस्मात् । **मुग्धे=**मुग्धिर्मूर्छावस्था तदवस्थापन्ने विशेषज्ञानराहित्यादिना अर्धेन धर्मजातेन मूर्छावस्थायास्संपन्नत्वात् अर्धेन कम्पनादिना मरणावस्थाधर्मजातेन च युक्तत्वादर्धसंपत्तिर्मूर्छावस्था सुषुप्तिव्यतिरिक्तैवेति ॥

श्रीकण्ठमते, मूर्छावस्था सुषुप्त्याद्यन्तर्गता वा भिन्ना वेति **संदेहे** सुषुप्त्यादिष्वन्तर्भूतेति **पूर्वपक्षे** प्राप्ते परिशेषात् मरणार्धसंपत्तिरूपा मूर्छावस्था सुषुप्त्यादेर्भिन्नैवेति **सिद्धान्तः** । सूत्रार्थः पूर्ववत् ।

रामानुजमते, किं मूर्छावस्था मरणादर्थान्तरमुत मरणमेवेति **संदेहे** सर्वेन्द्रियप्राणव्यापारोपरतेर्मरणमेवेति **पूर्वपक्षे** प्राप्ते आकारावैरूप्येण सूक्ष्मप्राणास्तित्वावगमान्मरणार्धसंपत्तिर्मूर्छावस्थेति **सिद्धान्तः** । सूत्रार्थः पूर्ववत् ॥

आनन्दतीर्थमते, मूर्छावस्थापि स्वप्नजागरादिन्यायेन भगवदधीनेति सिद्धमेव । तस्याः स्थानमिह विचार्यते । जागरस्वप्नयोरिव स्थूलसूक्ष्मप्रपञ्चदर्शनाभावेन सुषुप्तिसाम्यात्तस्यामप्यस्ति ब्रह्मसंपत्तिरिति **पूर्वपक्षे** प्राप्ते तस्यां ब्रह्मण्यर्धसंपत्तिरेव । कुतः । दुःखमात्रानुसंधानसत्त्वादिति **सिद्धान्तः** । सूत्रार्थस्तु, **मुग्धे**=मूर्छावस्थायां । जीवस्यार्ध**संपत्तिः**=परमात्मन्यर्धप्रवेशः । कुतः । **परिशेषात्**=प्रसक्तप्रतिषेधपूर्वकानुमानादित्यर्थः ॥ **इतिसंपत्त्यधिकरणम्** ॥ ७ ॥

सूत्रार्थचन्द्रिकायां मुग्धाधिकरणम् ॥ ४ ॥

परमेश्वरस्य सर्वात्मकतयानुप्रवेशः श्रूयते । तस्य सर्वावस्थासु सर्वान्तर्यामितयावस्थितौ तत्तद्दोषकलङ्कः प्रसज्यते न वा ॥

इति संशये प्रसज्यत इति पूर्वः पक्षः । तथा हि–'अस्थूलमनण्वह्रस्वम्' 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' इत्यादिना च परमेश्वरस्य रूपादिकं निषिध्यते । तद्दोषस्पर्शभयादेव 'सत्यं ज्ञानमनन्तं ब्रह्म' इति च तस्यापरिच्छिन्नसत्यज्ञानमात्ररूपत्वमुच्यते । यदि प्रकृतिविकारसंबन्धोऽप्यस्याभ्युपगम्येत, जीववदसावपि सकलविकारदोषास्पदं भवेदिति ॥

शक्यते तथापि तेनात्र वक्तव्यत्वेनापेक्षिता पेटिकासंगतिर्न लभ्यते । न चात्रार्थौचित्यमस्ति । पूर्वाध्याययोर्ब्रह्मस्वरूपतद्धर्माणामपि कियतांशेन निरूपिततया तेषां निरूपयिष्यमाणतया परिशेषायोगात् परब्रह्मज्ञानमात्रस्वरूपं निर्विशेषं तस्य 'सोऽन्तरा'दित्यादिश्रुतिभिः प्रतीयमानं सर्वानुप्रवेशसर्वनियन्तृत्वसर्वशरीरत्वादिकमतात्त्विकम् उत यथा परं ब्रह्म ज्ञानस्वरूपम् एवं सर्वानुप्रवेशादिधर्मवदपीति संशये तदर्थसंशयं दर्शयति–**तस्य सर्वावस्थास्विति** । 'सर्वावस्था' स्वित्यनेन यथा लोकद्वयगतागतव्रीहियवादिपितृवीर्यान्तसंश्लेषमात्रगर्भस्थितिजननजातव्यापाररूपायां जागरावस्थायां स्वप्नसुषुप्तिमूर्छामरणावस्थासु च सूक्ष्मस्थूलशरीरावस्थितिनिबन्धना जीवस्य दोषास्तथा ब्रह्मणोऽपि स्युः । शरीरावस्थितेरविशेषात् । 'देहयोगाद्वा सोऽपी'ति सूत्रे संसारदोषाणां शरीरसंबंधनिबंधनत्वस्योक्तत्वात् मलमूत्रपूयमांसशोणितादिकर्दमितेषु शरीरेषु रौरवादिष्विवावस्थानस्यातिहेयतायास्सर्वसम्प्रतिपत्त्यर्हत्वाच्चेति पूर्वपक्षबीजमधिकरणसंगतिश्चेत्युभयं सूचितम् । 'अन्तर्यामितये' त्यनेन सैद्धान्तिकं तत्प्रत्याख्यानबीजं सूचितम् । ननु, यथैवास्थूलादिवाक्यजातं श्रुतिस्तथा सर्वशरीरत्वप्रतिपादकवचनजातमपि श्रुतिरेव । तथा च तदविरोधाय कर्माधीनशरीरनिषेधपरमस्थूलादिवचनमित्युपपादनीयम् । न तु शरीरित्वे तत्प्रयुक्तदोषभाक्त्वं स्यादिति भिया शरीरमात्रनिषेधपरमित्युपपादनीयम् । तथात्वे श्रुत्यन्तरस्य निर्विषयत्वापातात् कर्माधीनशरीरयोगस्यैव दोषावहत्वेन स्वेच्छाधीनया नियन्तृतया तत्रावस्थानस्य दोषावहत्वाभावाच्च । न हि राज्ञो विषये वसतां राजाज्ञया सुखदुःखभाक्त्वमस्तीति तत्र वासाविशेषात् राज्ञोऽपि तद्भवति । श्रुतिरपि शरीरस्थित्यविशेषेऽपि पारतन्त्र्यमेव शरीरप्रयुक्तसुखदुःखभाक्त्वे निमित्तं दर्शयति 'समाने वृक्षे पुरुषो निमग्न' इत्यादिकेत्याशंक्याह–**यदि प्रकृतिविकारसंबंध इति** । अयमाशयः । राजविषयवासमात्रं न राजाज्ञाननुवृत्तिप्रयुक्तसुखदुःखभाक्त्वे निमित्तं किं तु राजाज्ञाविषयत्वविशेषितम् । राजा न हि राजाज्ञा विषयः । अतो युक्तं राज्ञः स्वविषयवासित्वेऽपि स्वाज्ञाननुवृत्तिप्रयुक्तदुःखास्पृष्टत्वम् । शरीरप्रयुक्तदुःखभाक्त्वे तु शरीरित्वमात्रं निमित्तम् । अतो यथा पूतिगन्धादियुक्तकारागृहप्रयुक्तदुःखभाक्त्वे कारागृहावस्थितिमात्रं निमित्तमिति तत्कारागृहनिक्षिप्तस्येव स्वेच्छया तन्नियंतृत्वेन तत्रावस्थितस्यापि भवति । एवं देहप्रयुक्तं दुःखं देहबद्धस्येव तत्र तन्नियन्तृतया स्थितस्यापि भवेदेव । तस्माज्ज्योत्क्रापत्त्यधिकरणगतं लोकवदित्युदाहरणमयुक्तम् । गुहाधिकरणगतं 'समाने वृक्ष' इति श्रुत्युदाहरणमप्ययुक्तम् । श्रुतिरपि हि न दृष्टविरुद्धमर्थं बोधयितुमीष्टे । ईश्वरो जीववद्देहकारागृहेऽतिजुगुप्सितेऽवतिष्ठते जीववत्तत्प्रयुक्तदुःखेन न स्पृश्यते इति । तस्मादस्थूलत्वादि-

नेति सिद्धान्तः । सर्वावस्थासु सर्वान्तर्यामितया स्थितिमतोपि परमेश्वरस्य न कश्चिद्दोषकलङ्कप्रसङ्गः । कुतः ? सर्वत्र श्रुतिषु चास्य निरस्तदोषकलङ्कत्वं निरतिशयमङ्गलाकरत्वं चेत्युभयं लिङ्गं हि प्रसिद्धम् 'एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः'

'अस्ति कश्चिदपर्यन्तरमणीयगुणाश्रयः ।
सर्वलोकविनिर्माता पशुपाशविलक्षणः ॥'

इत्यादिषु । अतः पृथिव्यादिष्वन्तर्यामितयावस्थानतोऽपि न दोषः ॥

॥ सू ॥ भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥

यथा जीवस्य स्वतोऽपहतपाप्मत्वादिगुणस्यापि देवादिशरीरसंबन्धित्वावस्थाभेदादुक्तदोषवत्वं तथा परमेश्वरस्यापि 'यस्य पृथिवी शरीरम्' इति शरीरसंबन्धित्वावस्थाभेदात्तद्दोषाः स्युः इति चेत्–न, प्रत्येकं प्रतिपर्यायमतद्वचनात् दोषासंबंधित्ववचनात् । 'यस्य पृथिवी शरीरम्' इत्यादिषु 'एष त आत्मान्तर्याम्यमृतः' इत्यन्तर्यामिणो हि निर्दोषत्वमुच्यते । जीवस्य तु पराभिध्यानात् तत्स्वरूपं तिरोहितमित्युक्तम् ॥

॥ सू ॥ अपि चैवमेके ॥ १३ ॥

वचनानि जुगुप्सितशरीरप्रयुक्तदोषभियैव परमेश्वरस्य तथाभूतं शरीरं प्रतिषेधन्ति । तस्य पृथिव्यादिशरीरकत्वतन्नियन्तृत्वादिवचनानि त्वतात्विकं तत्तच्छरीरकत्वादिकमर्थवादविधया कल्पयन्तीत्येव व्यवस्थोपपादनीयेति 'न स्थानतोऽपी'ति सूत्रभागं प्रतिषेध्याध्याहारेण योजयति–न कश्चिद्दोषकलंकप्रसंग इति । उभयलिङ्गं हि प्रसिद्धमिति । दोषाभावश्रवणमिव दोषविरोधिगुणश्रवणमपि दोषप्रतिक्षेपकमित्युभयलिंगोपन्यासः । ननु दहरविद्यादिष्वीश्वरस्येव जीवस्यापि प्रजापतिविद्यायामुपन्यस्तमस्त्युभयलिङ्गत्वं कोऽत्र विशेषः येन देहावस्थितत्वेऽपि जीवो दुःखमनुभवेन्नेश्वरः । तस्मादीश्वरोऽपि शरीरसंबंधावस्थाविशेषप्रयुक्तं दुःखमनुभवेदेव यदि सर्वशरीरकः स्यादित्याशङ्कामुद्भाव्य तन्निराकरणार्थं सूत्रम्–भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥ अतद्वचनादित्यस्य दोषाभाववचनादित्यर्थमभिप्रेत्य व्याचष्टे–निर्दोषत्वमुच्यत इति । ननु प्रतिपर्यायमुच्यतां शरीरप्रयुक्तदोषास्पर्शित्वं प्रयत्नेन कथं तच्छरीरित्वस्य पारमार्थिकतायामुपपादनीयम् । दोषास्पर्शवचनादेव तस्यापारमार्थिकता विवक्षितेत्युन्नीयत इत्याशंक्याह–जीवस्य त्विति । जीवस्यापहतपाप्मत्वादिकं तिरोहितमिति पराभिध्यान (ब्र० ३-२-४) सूत्रे दर्शितमीश्वरस्य तन्नित्याविर्भूत 'मित्युत्तराच्चेदाविर्भूतस्वरूपस्त्विति' (ब्र० १-३-१९) सूत्रे दर्शितम् । अस्मादेवोभयलिंगत्वानाविर्भावाविर्भावविशेषात् जीवेश्वरयोश्शरीरप्रयुक्तदुःखस्पर्शास्पर्शविशेषोपपत्तौ श्रुतिप्रतिपन्नमीश्वरस्य सर्वशरीरत्वादिकमविवक्षितमिति कल्पयितुं न युक्तमिति भावः । अमुमेव विशेषमभिप्रेत्य जीवेश्वरयोरेकशरीरस्थितावपि भोक्तृत्वाभोक्तृत्वविशेषं प्रतिपादयन्मंत्रो दृश्यत इति प्रतिपादनार्थं सूत्रम् अपि चैवमेके ॥ १३ ॥ ननु, जीवेश्वरयोरुभयलिंगतिरोधानातिरोधानाविशेष उक्त इति 'द्वा सुपर्णेति' मन्त्रे तयोर्भोक्तृत्वाभोक्तृत्वविशेष उक्तः । सोऽपि 'स्थित्यदनाभ्यां चे-

अपि च—एकस्मिन् शरीरे शरीरित्वेनावस्थितयोरपि जीवेश्वरयोर्दोषसंबन्धित्वतद्विपरीतत्वलक्षणो विशेषो यथा प्रसिद्ध्यत्येवमेके स्वशब्देनाधीयते—

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥'

अतो न जीववदीश्वरे दोषप्रसङ्गः ॥

जीवेश्वरयोः शरीरस्थितिसाम्येऽपि स्थितिवैषम्यमाह—

॥ सू ॥ अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥

तद्ब्रह्म परमेश्वरो देवादिशरीरेषु शरीरितया स्थितावपि रूपरहितवस्तुवदेव वर्तते। कुतः ? नामरूपनिर्वोढृत्वप्रधानत्वात् । तथा हि श्रुतिः 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म' इति। नामरूपयोरन्तराले तत्कार्यस्पर्शरहित एव वर्तते। मध्य इति स्वातन्त्र्यमुक्तम्। कर्मफलभोगार्थं हि जीवस्य

ति सूत्रेण दर्शित इत्येतत्सर्वमस्तीति सत्यम्। इदमप्यस्त्येव यच्छरीराभिघातादिप्रयुक्तैश्शरीरगतधातुवैषम्यादिकृतरोगप्रयुक्तैस्तद्गतमलमूत्राद्यनुभवप्रयुक्तैश्च दुःखैर्यज्जीवोऽभिभूयते तत्र शरीरित्वमेव प्रयोजकमिति। न च सत्यपि शरीरित्वे नित्याविर्भूतापहतपाप्मत्वादिशालितया कर्मरहितस्य परमेश्वरस्य शरीरित्वप्रयुक्तदुःखं न भवेदिति वाच्यम्। कर्माण्यपि हि दुःखविशेषानुगुणदेवमनुष्यपशुपक्षिसरीसृपादिशरीरसंबंधमापाद्य तदनुप्रविष्टं जीवं दुःखं भोजयन्ति। ईश्वरस्य विनापि चेत्कर्मभिस्तेन तेन शरीरेण शरीरित्वं स्यात् तदा कर्माभावोपन्यासेन किं समाहितं भवेत्। न खलु राजापराधेन कारागृहे निबद्धस्य तद्गतदुर्गंधादिप्रयुक्तं दुःखं तन्नियन्तृतया कारागृहमनुप्रविष्टस्याधिकारिपुरुषस्य राजापराधाभावमात्रेण न भवतीत्याशंक्य जीवेश्वरयोरेकशरीरस्थितावपि तत्प्रयुक्तदुःखभोगाभोगवैषम्योपपादनार्थत्वेनोत्तरसूत्रमवतारयति—जीवेश्वरयोरिति । सू ॥ अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥ अरूपवदिति वतिप्रत्ययान्तम् । इदं शरीररहितं वस्तु यथा शरीरित्वप्रयुक्तदुःखभाजनं न भवत्येवं ब्रह्मापीत्यर्थः । ननु, नामरूपनिर्वोढृत्वेन तत्र स्वातन्त्र्यलक्षणं नामरूपकार्यापेक्षया प्राधान्यं ब्रह्मणो भवतु नाम। तथापि तदनुप्रवेशे पूतिगन्धकारागृहनिर्वोढुस्तत्प्रवेश इव तदवस्थितिप्रयुक्तं कार्यं केन वार्यते इत्याशङ्क्य नामरूपनिर्वोढृत्वलक्षणप्रधानहेतूक्तिसूचितां श्रुतिमुदाहरति—तथा हीति। उदाहृतश्रुतौ नामनिर्वोढुस्तत्संबंधाभाव उक्तः। स च बाधितः। निर्वाह्यनिर्वाहकभावरूपस्यैव संबंधस्य सत्त्वात्। अतस्तत्कार्यदुःखेर्ष्यादिसंबंधाभावपरा तदुक्तिरिति भावः। ननु 'ते यदन्तरा तद्ब्रह्मे'ति श्रूयत इति सत्यं, तत्तु नामरूपनिर्वोढृत्वस्यातात्त्विकत्वेनैवोपपादनीयं गत्यंतराभावादित्याशङ्क्य नामरूपनिर्वोढृत्वादिश्रुत्यबाधेनैव तदुपपादयति—कर्मफलभोगार्थमिति। कर्माधीनमेवार्थानां दुःखकरत्वं न वस्तुस्वभावप्रयुक्तम्। पुत्रदारादीनां शीतोष्णादिविषयाणाञ्च समयभेदेन दुःखकरत्वतदभावदर्शनात्। स्मरन्ति च—'तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते। तदेव कोपाय यतः प्रसादाय च जायते। तस्माद्दुःखात्मकं नास्ति न च किञ्चित्सुखात्मक' मिति । तस्मान्नित्याविर्भूतापहतपाप्मादिगुणकत्वेन श्रुतस्य परमेश्वरस्य कर्मलेशोऽपि नास्तीति तस्यास्मदादिशरीरेषु स्थितस्यापि